



॥ अथ श्रीमुद्गलपुराणे प्रथमः खंडः प्रारभ्यते ॥



खंड १ श्रीगणेशयोगीन्द्राचार्याणां पिता श्रीमोरेश्वरः माता च सौ. सुशीला, मयूरेशं पूजयतः ।



खंड १ चित्र २ — ॥ श्रीमन्मुद्गलावताराः ब्रह्मभूयमहासिद्धिपीठाधीश्वरः ॥ ॥ श्रीयोगीन्द्रमठः ॥ श्रीभूस्वानंदमयूरेश्वरक्षेत्रम् ॥
(योगीन्द्रावतारः श्रावणे शुक्लपंचमी, भौमवासरः, शके १४९९) (अवतारसमाप्तिः माघे वद्यदशमी, भौमवासरः, शके १७२७)

॥ ॐ नमः श्रीस्वानंदेशगणेशाय पूर्णयोगात्मने ॥

॥ श्रीगणेशाय नमः ॥ अथ श्रीमन्मौद्गलपुराणप्रारंभः। ध्याये स्थिरेण चित्तेन गणेशं सर्वसिद्धिदम्। बुद्धिप्रकाशकं पूर्णं योगिनां हृदि संस्थितम् ॥१॥ जितं तेनाखिलं नानाब्रह्मवर्णनवर्णितम्। नानाजगत्समूहं वै गणेशेनोभयं कृतम् ॥२॥ भक्तसंरक्षणार्थाय निर्गुणः सगुणस्तु यः। नानावतारवान्सोऽपि नानाभेदधरो बभौ ॥३॥ तस्मै नमो गणेशाय नरकुंजररूपिणे। सगुणो नररूपो यो निर्गुणो गजवक्त्रकः ॥४॥ नमः शिवाय शांताय विष्णवे प्रभविष्णवे। सूर्याय शक्तये चैव चतुर्धा ते विभागिने ॥५॥ ब्रह्माणं शेषनागं च नरं नारायणं सदा। नमामि भावयुक्तोऽहं पुराणपुरुषं परम् ॥६॥ देवानां योगिनां चैव महर्षीणां महात्मनाम्। व्रजामि शरणं नित्यं पुराणज्ञानसिद्धये ॥७॥ पुराकल्पेऽभवन्विप्राः शौनकाद्याः सुसाधनाः। कलिदोषभयात्सर्वे नैमिषारण्यमाश्रिताः ॥८॥ तस्मिन्कलियुगावासं ज्ञात्वादौ ब्रह्मणो मुखात्। मुनिधर्मप्रसिद्ध्यर्थं कर्मज्ञान-प्रसिद्धये ॥९॥ अन्यच्च ब्रह्मणा प्रोक्तं पुराणश्रवणं सदा। कलिदोषहरं पुण्यं तदर्थमभवन्यताः ॥१०॥ कस्मिंश्चित्समये सूतो लोमहर्षण आययौ। मुनीनां दर्शनार्थाय पुराणज्ञो विचक्षणः ॥११॥ नैमिषारण्यशोभां च पश्यंस्तत्र सुविस्मितः। अहो धन्यं महारण्यं कलिदोषविवर्जितम् ॥१२॥ दृष्टा वै मुनयस्तेन सुप्रसन्नाननाम्बुजाः। नित्यनैमित्तिककराः स्वधर्माचरणप्रियाः ॥१३॥ पंचयज्ञरतास्तत्र वेदाध्ययनकारिणः। ब्रह्मतेजःसमायुक्ता ज्वलन्तः पावका इव ॥१४॥ विनाऽस्तेन यथा सूर्यो योगिनो वेदवेदिनः। तारकाः सर्वजन्तूनां शौनकाद्या महर्षयः ॥१५॥ तत्रागत्य महाभागः स सूतो रोमहर्षणः। साष्टाङ्गं प्रणतः पूर्वं परमाह्लादसंयुतः ॥१६॥ अभिवाद्य मुनीन्सर्वान्भक्त्या नम्रात्मकन्धरः। प्राञ्जलिः प्रयतो भूत्वा प्रोवाच मधुरं वचः ॥१७॥ सूत उवाच। वंशो धन्यो मदीयोऽद्य पितरौ च कुलं वयः। विद्या व्रतं तपो ज्ञानं धन्यं सर्वं मुनीश्वराः ॥१८॥ भवतां पादपद्मं च सर्वाशुभविनाशनम्। काङ्क्षितं यत्सदा देवैर्मया दृष्टं सुपुण्यतः ॥१९॥ साक्षाद् ब्रह्मस्वरूपा वै ब्राह्मणा ब्रह्मवित्तमाः। येषां दर्शनमात्रेण कृतकृत्याश्च जन्तवः ॥२०॥ कृतार्थोऽहं कृतार्थोऽहं कृतार्थोऽहं न संशयः।

भवतां दर्शनेनैव मुक्तोऽहं भवसागरात् ॥२१॥ इति ब्रुवाणं साधुं तं सूतं वै रोमहर्षणम्। प्रत्यूचुर्ब्राह्मणाः सर्वे भक्तियुक्तं तपोधनाः ॥२२॥ ब्राह्मणा ऊचुः। सूत सूत महाभाग स्थीयतां पुण्यवर्धन। तव दर्शनमात्रेण संतुष्टाः स्मो वयं खलु ॥२३॥ इत्युक्तस्तत्र सूतस्तु मुनिदत्ते शुभासने। समासीनो महाबुद्धिः साञ्जलिः सत्प्रतापवान् ॥२४॥ सुखासीनं च सूतं तं दृष्ट्वा तत्र महामुनिः। भृगुप्रेष्ठश्च मुख्योऽसौ मुनीनां प्रत्युवाच ह ॥२५॥ शौनक उवाच। सूत सूत महाभाग सर्वज्ञ सुखदायक। आराधितस्त्वया प्राज्ञः कृष्णद्वैपायनो महान् ॥२६॥ नारायणावतारो यः साक्षान्नारायणः स्वयम्। वेदस्य भागकारी स पुराणानां विभागकृत् ॥२७॥ त्वं वै तस्मात्पुराणानि सेतिहासानि वेत्सि च। तेन सर्वज्ञता जाता तवेयं पुण्यवर्धन ॥२८॥ वयं भीताश्च कालेन कलिकल्मषरूपिणा। नैमिषारण्यमास्थाय स्थिताज्ञप्ताः स्वयंभुवा ॥२९॥ तत्र विश्रान्तिदाता वै त्वं प्राप्तोऽसि महाद्युतिः। पुराणानां प्रवक्ता च पुण्यवान्पुण्यवर्धनः ॥३०॥ यत्र पौराणिकी गाथा कलिस्तत्र न तिष्ठति। तस्मात्कारुण्यभावेन पुराणं ब्रूहि नः प्रभो ॥३१॥ तव यद्दर्शनं जातं महापुण्येन सत्तम। धन्यं धन्यं महाभाग साक्षात्संशयछित्त्वयम् ॥३२॥ छेदनं संशयानां वै मतो त्वं रोमहर्षणम्। करोषि तेन ते नाम रोमहर्षण इत्यहो ॥३३॥ इति पृष्टो महात्मा स शौनकेन महर्षिणा। संहृष्टः सन्नुवाचेदं वचनं धर्मसंस्कृतम् ॥३४॥ सूत उवाच। अद्याऽहं कृतकृत्यो वै कृतोऽनुग्रहकारिणा। सकलं कथयिष्यामि व्यासेन कथितं च यत् ॥३५॥ इत्युक्त्वा कथयामास पुराणानि स कृत्स्नशः। नानाख्यानविभक्तानि नानाधर्मयुतानि च ॥३६॥ सर्वार्थसाधनान्येव दुःखनाशकराणि च। ब्रह्मभूतप्रदान्येव नानामतयुतानि च ॥३७॥ पुराणोपपुराणानि सेतिहासानि भागशः। धर्मार्थकाममोक्षाणां दातृत्वात्पुण्यदानि च ॥३८॥ श्रुत्वा श्रुत्वा मुनीन्द्रास्ते हर्षयुक्ता बभूविरे। नित्यं प्रमुदितास्तेन प्रीताः संपूर्णभावतः ॥३९॥ युगस्योत्क्रमणं तस्य चक्रुस्ते मुनयोऽखिलाः ॥४०॥ पुराणेषु च सर्वेषु सेतिहासेषु सर्वतः। नानाभेदमतादीनि श्रुत्वा भ्रान्ता मुनीश्वराः ॥४१॥ निश्चयं नाधिगच्छन्ति परं किं सर्वसंमतम्। तदर्थं मुनिवर्यस्तं पर्यपृच्छत्स शौनकः ॥४२॥ शौनक उवाच। भो भोः सूत महाभाग शृणु मे वचनं लघु। पुराणानि च संश्रुत्य भ्रान्ताः स्मो वै महाद्युते ॥४३॥ इदं परमिदं नेति त्वया सर्वत्र वर्णितम्। भिन्नं भिन्नं महाबुद्धे तेन नो निश्चयः कथम् ॥४४॥ कुत्रापि शंकरः श्रेष्ठः कुत्र विष्णुस्तथा रविः। शक्तिश्चैव गणेशश्च विराजः कुत्र रूपकम् ॥४५॥ कुत्र ब्रह्म च योगश्च ज्ञानं कर्म च कुत्र वै। आत्मा प्राणोऽन्नमित्युक्तं मनो वै परतः परम् ॥४६॥ कुत्र

बुद्धिर्महाभाग सांख्यं स्वानंद एव च। इत्यादिमनभेदेन निश्चयो नैव जायते ॥४७॥ अतस्त्वं कृपया ब्रूहि वेदशास्त्रार्थसंमतम्। सर्वेषां मान्यमेकं च सर्वसंशयनाशनम् ॥४८॥ इति पृष्टो महातेजाः शिष्यो व्यासस्य सत्तमः। एकं श्रुतिस्मृतीनां यत् सारं कथितुमारभत् ॥४९॥ सूत उवाच। शृणुध्वं मुनयः सर्वे सारं मुद्गलभाषितम्। सर्वश्रुतिस्मृतीनां च सर्वमान्यं विशेषतः ॥५०॥ पुरा दक्षाध्वरे जातं यज्ञविध्वंसनं महत्। रुद्रेणागत्य सहसा कृतो विघ्नो महत्तरः ॥५१॥ देवाः पराजिताः सर्वे रुद्रैः परमदारुणैः। दक्षमस्तकसंछेदो वीरभद्रेण वै कृतः ॥५२॥ ब्रह्मणागत्य तत्रासौ सान्त्वितो बहुलोक्तिभिः। शंकरो जीवयामास दक्षं योगेन तत्त्वतः ॥५३॥ यज्ञविध्वंसशोकार्तो दक्षः शापेन मोहितः। अज्ञानावरणेनापि न किञ्चिन्निश्चयं ययौ ॥५४॥ तत्राजगाम भगवान् साक्षात्सूर्य इवोदितः। वेदशास्त्रार्थतत्त्वज्ञो योगीन्द्रो मुद्गलो मुनिः ॥५५॥ गणेशभक्तप्रवरः सर्ववंद्यो महायशाः। तपसां कर्मणां साक्षान्निधिरेष सनातनः ॥५६॥ तं दृष्ट्वोत्थाय दक्षोऽसौ प्रणनाम महामुनिम्। आसनाद्यैः सुसंपूज्य वक्तुं समुपचक्रमे ॥५७॥ दक्ष उवाच। भो भो मुनीन्द्र वन्द्यस्त्वमांगिरस महाद्युते। यज्ञविध्वंसशोकार्तं मां पालय जडीकृतम् ॥५८॥ मुद्गल उवाच। मा चिन्तां कुरु भो दक्ष प्रजापालेन्द्रसत्तम। विघ्नराजं स्मर त्वं वै तेन सर्वं न दुर्लभम् ॥५९॥

॥ ओमिति श्रीमदांत्ये पुराणोपनिषदि श्रीमन्मौद्गले महापुराणे प्रथमे खण्डे वक्रतुंडचरिते शौनकसूतसंवादो नाम प्रथमोऽध्यायः ॥

॥ श्रीगणेशाय नमः ॥ सूत उवाच। दक्षेण मुनिशार्दूलाः श्रुतं मुद्गलभाषितम्। प्रणिपत्य पुनः सोऽपि पप्रच्छ हितकारकम् ॥१॥ शौनक उवाच। दक्षमुद्गलसंवादं श्रोतुमिच्छामहे वयम्। विस्तरेण समाचक्ष्व सूत संतोषकारक ॥२॥ सूत उवाच। शृणुध्वं मुनयः सर्वे कथां लोकैकपावनीम्। यां श्रुत्वा पुरुषस्येह नान्यत्कृत्यं प्रविद्यते ॥३॥ दक्षमुद्गलसंवादं समासेन विवर्णये। सारं सर्वत्र संपूर्णं भवरोगविमोचनम् ॥४॥ मुद्गलोक्तं वचः श्रुत्वा दक्षः प्रोवाच धर्मवित्। प्राञ्जलिः प्रयतो भूत्वा हृष्टरोमा महायशाः ॥५॥ दक्ष उवाच। पुण्यं महन्मेऽस्ति पुरातनं यत्तेनैव जातं तव दर्शनं भोः। मोक्षप्रदं तत्परलोकदं च भोगप्रदं धर्म्यमनंतपुण्यम् ॥६॥ शापेन नष्टो मम सर्वबोधः प्रजापतित्वं प्रगतं मदीयम्। यज्ञस्य भङ्गो विविधं हि कष्टं तत्रैव ते

दर्शनमत्र चित्रम् ॥७॥ तव दर्शनमात्रेण किंचित् स्फूर्तिः समागता । धन्योऽसि योगिनां मध्ये पूतत्वं त्वीदृशं त्वयि ॥८॥ कोऽसौ विघ्नपतिः पूर्णः कीदृशः किंस्वभाववान् । कति तस्यावताराश्च कस्यांशो वाऽपि किंस्तवः ॥९॥ पूजितो विधिवत्कैश्च किं फलं दत्तवान् परम् । किंविहारश्च कस्मिन्वै लोके वसति स प्रभुः ॥१०॥ एतत्सर्वं सुविस्तार्य पृच्छते ब्रूहि सादरम् । ज्ञात्वा तं देवदेवेशं भविष्यामि हितावहम् ॥११॥ इत्येवं कथयन्तं तं मुनयो विस्मयान्विताः । पप्रच्छुः सकलं तद्वै दक्षचेष्टितमादरात् ॥१२॥ शौनकाद्या ऊचुः । दक्षः प्रजापतिः साक्षात्कथं मूढत्वमागतः । प्रजापतित्वं तस्यापि कथं नष्टं महात्मनः ॥१३॥ यज्ञध्वंसः कथं प्राप्तः शंभुः प्रकुपितः कथम् । एतत्सर्वं सुविस्तार्य ब्रूहि सूत महामते ॥१४॥ श्रुत्वा मुनिवचो रम्यं कृष्णद्वैपायनस्य च । शिष्यः प्रोवाच मधुरं वचनं संप्रहर्षयन् ॥१५॥ सूत उवाच । शृणु शौनक यत्नेन कथां भुवनपावनीम् । कथयामि यथातथ्यं श्रुतां व्यासमुखेन याम् ॥१६॥ ब्रह्मणो दश पुत्रा ये तत्र दक्षो महान्प्रभुः । अतः प्रजापतिस्त्राता कृतस्तेन स वेधसा ॥१७॥ स राज्यं प्राप्य मत्तोऽभूद् गर्वेणैव परिप्लुतः । अहं प्रजापतीनां च श्रेष्ठो राजा न मत्समः ॥१८॥ एकदा गिरिवर्ये तु कैलासे शंकरस्य च । दर्शनार्थं गता देवा मुनयः सिद्धकिन्नराः ॥१९॥ गन्धर्वा नागमुख्याश्च विद्याधर्यप्सरोगणाः । ब्रह्मा विष्णुर्महेन्द्रश्च सर्वे तेन सुसत्कृताः ॥२०॥ सभामध्ये समासीनाः शंकरेण च पूजिताः । वामभागे स्थितो विष्णुर्दक्षिणांगे पितामहः ॥२१॥ क्रमेण सर्वे देवाश्च यथायोग्यं स्थिता मुने । गणा नंदिमुखास्तत्र समीपे संस्थिता बभुः ॥२२॥ तत्र ते मुनयो हृष्टा वसिष्ठाद्याः प्रतुष्टुवुः । नारदप्रमुखाः सर्वे गन्धर्वा ललितं जगुः ॥२३॥ नृत्यमप्सरसश्चक्रुरेवं सर्वे पुपूजिरे । शंकरं परिवाराढ्यमानंदेन समन्वितम् ॥२४॥ कथा नानाविधास्तत्र तेऽकुर्वन् भावपूर्वकम् । तत्राजगाम दक्षः स प्रजापतिपतिः स्वयम् ॥२५॥ शिवेन मानितस्तत्र वचसा चैव सत्कृतः । नमनं न कृतं तस्मा ईश्वरेण प्रभावतः ॥२६॥ तेन संकुपितोऽत्यन्तमुचिवान गर्वमोहितः । शृणुध्वं ये सभाश्रेष्ठा याथातथ्यानुवर्तिनः ॥२७॥ रुद्रस्य श्वशुरोऽहं वै पुत्रतुल्यो ममाप्ययम । नमनं न कृतं कस्मात् तस्मात्त्याज्यो महेश्वरः ॥२८॥ ऐश्वर्यगर्वयुक्तोऽयं स्वधर्मत्यूननां गतः । देवपंक्तौ कथं योग्यः पिशाचानामधीश्वरः ॥२९॥ वर्णाश्रमविहीनोऽयं नग्नो भिक्षाशने रतः । सर्पभूषणसक्तश्च चिताभस्माङ्गलेपनः ॥३०॥ व्याघ्राजिनपरीतश्च मुण्डमालाधरः सदा । इत्यादिदोषयुक्तत्वान्न स्पृश्योऽयं महात्मभिः ॥३१॥ अशिवः शिवनामा वै वृथाशिवाभिमानवान् । अतो न भाषणीयोऽयं दोषकारी पिशाचराट् ॥३२॥ इति

ब्रुवन्तमत्यन्तं स्वयंभूस्तं निराकरोत् । न गृहीतं पितुर्वाक्यं क्रोधावेशेन तेन तत् ॥३३॥ नानानिंदायुतं वीक्ष्य भगवान्नन्दिकेश्वरः। उवाच सर्वसान्निध्ये क्रोधेनारक्तलोचनः ॥३४॥ नंदिकेश्वर उवाच। धिक्त्वां व्यर्थं प्रजापाल शिवनिन्दापरायण। शिवतत्त्वं न जानासि मदेनासिक्त दुर्मते ॥३५॥ मायाखेलनवानेष तथा तद्दोषवर्जितः। तेनायं शिवतां प्राप्तः कथं निन्दां करोषि रे ॥३६॥ शिवनिन्दाकराः शास्त्रे नारका ज्ञानवर्जिनाः । अतस्त्वं ज्ञानहीनस्तु भवितास्य-पवाक्यतः ॥३७॥ निंदा येनैव वक्त्रेण कृता शंभोर्महात्मनः। अजास्यो भवितासि त्वं भ्रष्टराज्यो भविष्यसि ॥३८॥ इति श्रुत्वा वचः सोऽपि तं पुनः प्रत्युवाच ह। न त्वं जानासि दुर्बुद्धे शंकरं कर्मदूषितम् ॥३९॥ वर्णाश्रमविहीनश्च यस्तिष्ठेत्पुरुषः कदा। पदे पदे महापापो नारकी मरणे भवेत् ॥४०॥ तस्माद्यूयं महापापाः शैवाः स्पृश्या न कुत्रचित्। भुवि ये शांकरा नित्यं ज्ञानहीना भवन्तु ते ॥४१॥ कलौ प्राप्ते च पाखण्डा भविष्यन्ति जटाधराः। शूद्रा नेदं पठिष्यन्ति नग्ना भस्माङ्गलेपनाः ॥४२॥ स्त्रीमांसमदिरासक्ता नानाभोगकरास्तथा। नरके वै पतिष्यन्ति शंभुमार्गपरायणाः ॥४३॥ प्रजापतिं प्रभुः साक्षाद् ब्रह्मा तं निरभर्त्सयत्। ततो जगाम स्वगृहं दक्षः क्रोधपरिप्लुतः ॥४४॥ सर्वे ते स्वस्थलं जग्मुर्दुःखितास्तेन वै कृताः। शिवोऽपि दुःखसंयुक्तो म्लानतां परमां गतः ॥४५॥

॥ ओमिति श्रीमदान्त्ये पुराणोपनिषदि श्रीमन्मौद्गले महापुराणे प्रथमे खण्डे वक्रतुंडचरिते दक्षनंदिविवादो नाम द्वितीयोऽध्यायः ॥



॥ श्रीगणेशाय नमः ॥ सूत उवाच। शृणुध्वं मुनयः सर्वे स्थिरीकृत्य मनश्चलम्। विघ्नेशभक्तिहीना ये विघ्नाक्रान्ता भवन्ति ते ॥१॥ दक्षोऽभूत् स्वगृहं गत्वा क्रोधामर्षसमन्वितः । न किंचित् सुखवान् विप्राः शूलयुक्तो यथा नरः ॥२॥ शिक्षां शिवस्य कर्तुं स हृदि व्यवसितोऽभवत् । न किंचित्प्राप्तवांस्तत्र विचारं भृशदुःखितः ॥३॥ एतस्मिन्नंतरे तत्र नारदो दिव्यदर्शनः। आजगाम महातेजा दक्षेणैव सुसत्कृतः ॥४॥ आसनं पाद्यमर्घ्यं च दत्वा सम्यक् प्रपूजितः। पृष्टः स कुशलं प्रश्नैः प्रसन्नो नारदोऽब्रवीत् ॥५॥ नारद उवाच । दक्ष किं दुःखितस्त्वं ते मुखं म्लानतया युतम्। कथयस्व महातेजाः प्रजापतिपतिर्भवान् ॥६॥ दक्ष उवाच । शृणु

नारद येनाहं दुःखितो म्लानतां गतः । शिवेनासत्कृतस्तत्र सभायां सर्वसन्निधौ ॥७॥ दर्पेणैवावृतः शंभुस्तस्य दर्पहृतिः कथम् । तादृशं ब्रूहि मे शीघ्रं सर्वार्थज्ञ विचक्षण ॥८॥ नारद उवाच । बृहस्पतिसवं दक्ष कुरु त्वं सर्वभावनः । यज्ञभागविहीनं तं तत्र शंभुं कुरुष्व भोः ॥९॥ यज्ञभागेन हीनोऽयं देवपंक्तिबहिष्कृतः । पिशाचेशो भवेच्छंभुर्देवत्वं तत्र संहृतम् ॥१०॥ प्रजापतिपतिः साक्षाद्भवान्सर्वत्र संमतः । करिष्यसि यथा पूर्वं पश्चाद्वै तादृशं भवेत् ॥११॥ एवं परम्पराप्राप्तं तस्यैश्वर्यं प्रकाशितम् । इति मे मनसि प्राप्तं यथेच्छसि तथा कुरु ॥१२॥ इत्युक्त्वा नारदस्तस्माद् गतो ब्रह्माण्डमण्डले । वीणागानरतो भूत्वा योगी ब्रह्मणि तत्परः ॥१३॥ दक्षोऽपि हर्षितो जातः सत्यं मानितवानभूत् । बृहस्पतिसवं कर्तुं समारेभे स तत्क्षणात् ॥१४॥ तत्राजगाम भगवान् विष्णुर्देववरः प्रभुः । आजग्मुर्देवगन्धर्वा नानावाहनशोभिताः ॥१५॥ तत्राजग्मुर्द्विजाः सर्वे नानातत्त्वार्थकोविदाः । जामातरः सपत्नीकाः कश्यपप्रमुखास्तथा ॥१६॥ यथोद्दिष्टं चकारासौ दक्षः परमहर्षितः । गणनाथविहीनं तं यज्ञं शंकरवर्जितम् ॥१७॥ गणेशस्यास्मृतिर्जाता सर्वेषां भाविगौरवात् । दधीचिप्रमुखास्तत्र शैवाः क्रोधेन पूरिताः ॥१८॥ दधीचिस्तत्र तूवाच क्रोधावेशसमन्वितः । शृणु दक्ष महाप्राज्ञ हितं वचनमुत्तमम् ॥१९॥ शंकरेण विहीनोऽयं यज्ञो नैव प्रशोभते । प्राणहीनो यथा देहस्तथैवासौ न राजते ॥२०॥ इति श्रुत्वा वचस्तस्य दक्षो रोषसमन्वितः । उवाच गर्वमोहेन शापेनैव विमोहितः ॥२१॥ शिवोऽशिवरूपश्च पिशाचानामधीश्वरः । वर्णाश्रमविहीनत्वान्न योग्यो यज्ञकर्मणि ॥२२॥ यत्र लक्ष्मीपतिः साक्षाद् भगवान्मंगलालयः । तत्र किं न्यूनतां याति मिथ्यावाचं तु मा वद ॥२३॥ श्रुत्वा तस्य वचः क्रूरं दधीचिः पुनरब्रवीत् । शिवनिन्दां करोषि त्वमज्ञानेन विमोहितः ॥२४॥ यज्ञनाशो भवेद् दक्ष शंकरद्वेषतस्तव । न सिद्धिं लभसे त्वं तु नष्टभाग्यो न संशयः ॥२५॥ अत्र ये ब्राह्मणाद्या वै वर्णा नाना समागताः । सर्वे कलियुगे पापाः पाखण्डाश्च भवंतु ते ॥२६॥ स्वधर्महीनतां प्राप्य नरकेऽन्ते पचन्तु वै । विष्णुः प्रमोदयुक्तोऽत्र स वै पाखंडकारकः ॥२७॥ कलौ देवो भवन्नित्यं पाखंडानां सहायवान् । पाखंडप्रियवज्जन्तुः कलौ मलकरः सदा ॥२८॥ शिवहीने तथा यज्ञे मुख्यो जातो हि केशवः । वेदबाह्यं स्वयं कर्म कुरुते तेन शापितः ॥२९॥ सर्वे देवाश्च शीघ्रं हि भवितारः पराजिताः । मुनयो दुःखसंयुक्ता एवं शप्त्वा गतो मुनिः ॥३०॥ तमनुप्रययुः सर्वे शैवाः परमधार्मिकाः । गौतमो गालवश्चैव वामदेवो द्वितस्त्रितः ॥३१॥ मार्कण्डेयो भृगम्याद्याः क्रोधयुक्ता महर्षयः । यज्ञोऽयं नावलोक्यो वै वेदबाह्यक्रियात्मकः ॥३२॥

विष्णुनान्ये ततः सर्वे सान्त्विताः संस्थिताः पदे। देवता मुनयो वर्णा द्रष्टुं यज्ञं प्रहर्षिताः ॥३३॥ भृग्वादिमुनिभिस्तत्र यज्ञारम्भः कृतोऽभवत्। यथाविधि यथाभागं देवास्तत्राश्रिता मखे ॥३४॥ दक्षो हृष्टोऽभवत् तत्र यजमानः सुमंदधीः। वेद-कल्पानुसारेण मुनयस्तन्विरे मखम् ॥३५॥ एतस्मिन्नन्तरे तत्र कैलासे नारदो गतः। शिवया सह शंभुं च प्रणतोऽभूत्स भाविकः ॥३६॥ सतीं प्रति प्रहस्याह नारदः कलहप्रियः। देवि दक्षाध्वरे कस्माद् गमनं न कृतं त्वया ॥३७॥ हृष्टपुष्टजनाः सर्वे महोत्सवसुमोदिताः। भगिन्यस्तत्र ते रेजुः पतिभिः सह मोदिताः ॥३८॥ पितृभर्तृगृहे स्त्रीणां मानामानं न विद्यते। इत्युक्त्वा नारदस्तस्मात्प्रययौ कौतुकी मुनिः ॥३९॥ गते मुनौ सती तत्र मानसे दुःखिता भृशम्। शंकरं प्रणिपत्याह हृदयेन विदूयता ॥४०॥ नीलकण्ठ नमस्तुभ्यं शंकराय शिवाय च। सगुणाय मृडायैव निर्गुणाय नमो नमः ॥४१॥ गन्तु-मिच्छा त्वया सार्धमस्ति मे दक्षमंदिरे। तत्र यज्ञोत्सवो नाथ प्रसीद प्रार्थये विभो ॥४२॥ एवं श्रुत्वा भारतीं तां सतीं शंभुः सुबोधयन्। स्मयमानश्च तामूचे किमिदं भाषसे प्रिये ॥४३॥ मद्द्वेषी जनको दक्षस्तव तेन निमन्त्रितः। नाहं तस्मान्न गन्तव्यं विपरीतं भविष्यति ॥४४॥ भवनी च महामाया मायिकोऽहं न संशयः। सृज त्वं मुनिदेवादीनत्र यज्ञं करोम्यहम् ॥४५॥ श्रुत्वा शंभुवचो रम्यं हृदयेन विदूयता। उवाच दुःखिता देवी ममाज्ञां देहि शंकर ॥४६॥ न किंचिदुक्तवान् शंभुस्तदा देवी पितुर्गृहे। न प्रयोजनमाज्ञाया विचार्यैवं जगाम च ॥४७॥ एतज्ज्ञात्वा महाऽऽश्चर्यं विस्मितेन शिवेन च। भावि यद्भविना तद्वै विमानं प्रेषितं वरम् ॥४८॥ विमानमास्थाय शक्तिराजगाम विहायसा। पितुर्गृहं महाभागा मानिना सर्वबन्धुभिः ॥४९॥ मात्रा पित्रा स्वसृभिस्तु सत्कृता हर्षितात्मभिः। दक्षस्तत्र प्रमोदेन जगाद तनयां प्रति ॥५०॥ आगता त्वं महाभागे यज्ञोऽयं शोभितस्त्वया। श्रुत्वा पितृवचो रम्यं तं सा प्रोवाच दुःखिता ॥५१॥ सत्युवाच। शोभयामि कथं यज्ञं नाहूता भवतात्र भोः। अनाहूताऽगता चाहं त्वदीये यजनालये ॥५२॥ ततः स कुपितो दक्ष उवाच शृणु पुत्रिके। मदीयो बहुलो दोषस्तेन त्वां दत्तवान्भ्रमात् ॥५३॥ पिशाचभूतराजाय पित्रा मे कथितं कृतम्। वर्णाश्रमविहीनाय वृथेश्वर-पदाय च ॥५४॥ तस्य दोषेण देवि त्वं नाहूता यज्ञकर्मणि। स्वागतं ते तथाप्यद्य तिष्ठ त्वं मत्समीपगा ॥५५॥ सूत उवाच। पितुर्वचनमाकर्ण्य शिवनिंदायुतं महत्। क्रोधसंतप्तगात्रा सा पश्यन्ती यज्ञमन्दिरम् ॥५६॥ अरुद्रभागसंयुक्तं यज्ञं दृष्ट्वा चुकोप ह। उवाच किं कृतं तात वेदबाह्यक्रियात्मकः ॥५७॥ रुद्रभागविहीनोऽयं यज्ञो नैव फलप्रदः। शिवनिंदां करोषि त्वं

ह्यशिवोऽसि न संशयः ॥५८॥ शिवेति द्व्यक्षरं ब्रह्म निर्गुणं गुणधारणम्। न जानासि यतस्त्वं भोस्तेनाहं दुःखिता भृशम् ॥५९॥ नव देहात् समुद्भूतो मम देहस्त्वयं पितः। न योग्यः शिवनिंदायाः कारणात् तं त्यजाम्यहम् ॥६०॥ इत्युक्त्वा सा हृदि ध्याने नीत्वा तं शंकरं प्रभुम्। योगाग्निना समुज्ज्वाल्य देहं धाम्नि गताऽभवत् ॥६१॥ पुनः स्वमायया देवी हिमाचलसुताऽभवत्। शिवध्यानपरा साक्षात्तं लेभे सा पुनः पतिम् ॥६२॥ तपस्तप्तं सुतीव्रं यत्तेन चात्मवशेन सा। लेभे मुदं शिवेनापि पार्वती प्रेमविह्वला ॥६३॥

॥ ओमिति श्रीमदान्त्ये पुराणोपनिषदि श्रीमन्मौद्गले महापुराणे प्रथमे खण्डे वक्रतुंडचरिते पार्वतीदेहत्यागो नाम तृतीयोऽध्यायः ॥



॥ श्रीगणेशाय नमः ॥ सूत उवाच। कैलासशिखरे रम्ये शिवश्चिन्तापरोऽभवत्। अनाहूता गता देवी द्विट्गृहे किं भविष्यति ॥१॥ वटमूले समासीनो नंदिकेशादिभिर्वृतः। योगिभिः सेवितस्तत्र कथा नाना प्रवर्तयन् ॥२॥ नानाऽपशकुनं तत्र बभूवातिभयानकम्। स्तुतिभिस्तेन सर्वे ते उत्पाताशंकया भृशम् ॥३॥ एतस्मिन्नन्तरे तत्र नारदो मुनिराययौ। तं प्रणम्य स्थितो योगी शिवं कल्याणदं परम् ॥४॥ कथावसरमासाद्य प्रोवाच कठिनं वचः। धन्या सती त्रिभुवने न समा कामिनी तया ॥५॥ सतीत्येव च यन्नाम कृतं तत्सार्थकं परम्। शिवनिन्दां समाकर्ण्य तृणवज्ज्वलितं वपुः ॥६॥ नारदस्य वचः श्रुत्वा वज्रसारसमोपमम्। उवाच तमृषिं शंभुः किं नु देवी मृता मुने ॥७॥ न किंचिदुक्तवांस्तत्र शंभुक्रोधभयाकुलः। शोकाग्निर्मा दहेत्किं वा ततो देवोऽन्वबुध्यत ॥८॥ शोकसागरमग्नोऽभूत्किं मां त्यक्त्वा गता शिवा। शक्तिहीनः कृतोऽहं वै ह्यशक्तः सर्वकर्मणि ॥९॥ निःश्वासपरमोप्यासीदर्धमङ्गं गतं स्थितिः। जीवितेन च किं कार्यं देहत्यागं करोम्यहम् ॥१०॥ योगिभिः सान्त्वितो देवो न किंचित्सुखवानभूत्। शिवश्चिन्तापरो भूत्वा विचारं कृतवान् हृदि ॥११॥ अहो विघ्नाकुलोऽहं वै कृतो विघ्नकरेण च। गर्वितः परमैश्वर्यात्कृतं गर्वस्य खण्डनम् ॥१२॥ अतुला शक्तिरर्धाङ्गे जगन्माताऽस्ति मे सदा। अर्धनारीश्वरोऽहं च न वियोगो मम क्वचित् ॥१३॥ शक्तियुक्ततया नित्यं शक्तोऽहं प्रभुरीश्वरः। अखण्डैश्वर्यमोहेन विघ्नराजं च

नामस्मरम् ॥१४॥ इति गत्वा स्वयं शंभुर्मनसा गणपं भजन्। भक्त्यैकचेतसा चैव ध्यात्वा रूपमनुत्तमम् ॥१५॥ चतुर्भुजं महाकायं गजवक्त्रं महोदरम्। मुकुटेन विराजन्तं कर्णकुण्डलधारिणम् ॥१६॥ रत्नमालाधरं पूर्णं नाभिशेषविभूषितम्। किंकिणीकायुक्तपादं क्वणच्चरणनूपुरम् ॥१७॥ सिद्धिबुद्धियुतं चिन्तामणिभूषितवक्षसम्। एकचित्तेन च ध्यात्वाऽसाधयत्तं समाधिना ॥१८॥ तुष्टाव विविधैर्वाक्यैर्गणेशं ब्रह्मरूपिणम्। निराकारं च साकारं विघ्नराजं हृदि स्थितम् ॥१९॥ शिव उवाच। नमस्ते विघ्नराजाय नमस्ते विघ्नहारिणे। विघ्नकर्त्रे गणेशाय विघ्नानां पतये नमः ॥२०॥ लंबोदराय सर्वाय वक्रतुण्डस्वरूपिणे। त्रैगुण्येन जगद्रूपनानाभेदप्रधारिणे ॥२१॥ नैर्गुण्येन च वै साक्षाद् ब्रह्मरूपधराय च। नमो नमो बंधहंत्रे भक्तानां पालकाय ते ॥२२॥ अभक्तेभ्यस्तमोदाय नानाभयकराय च। हेरंबाय नमस्तुभ्यं वेदवेद्याय शाश्वते ॥२३॥ अनंताननरूपायानंतबाहंघ्रिकाय ते। अनंतकरकर्णायानंतोदरधराय ते ॥२४॥ नमो नमस्ते गणनायकाय ते अनादिपूज्याय च सर्वरूपिणे। अखंडलीलाकरपूर्णमूर्तये महोत्कदायास्तु नमो महात्मने ॥२५॥ आदौ च निर्माय विधिं रजोमयं तेनैव सृष्टिं विदधासि देव। सत्त्वात्मकं विष्णुमथो हि मध्ये निर्माय पासि त्वमखंडविक्रम ॥२६॥ अन्ते तमोरूपिणमेव सृष्ट्वा शंभुं स्वशक्त्या हरसि त्वमाद्य। एवंविधं त्वां प्रवदन्ति वेदाः तं वै गणेशं शरणं प्रपद्ये ॥२७॥ मायामयं वै गुणपं तु सृष्ट्वा तस्मात्पुरस्त्वं गणराज चादौ। स्वानंदसंज्ञे नगरे विभासि सिद्ध्या च बुद्ध्या सहितः परेश ॥२८॥ तं त्वां गणेशं शरणं प्रपद्ये स्थितं सदा हृत्सु च योगिनां वै। वेदैर्न वेद्यं मनसा न लभ्यं तं वक्रतुण्डं हृदि चिन्तयामि ॥२९॥ अर्धनारीश्वरत्वं यत्तद्गतं मेऽधुना प्रभो। शक्तिहीनत्वमापन्नो नष्टवत्कर्मणा कृतः ॥३०॥ नानैश्वर्ययुता देवी सा गता गणप प्रभो। अनीश्वरपदं प्राप्तं मम वै देवदेव भोः ॥३१॥ निर्गुणोऽहं सदा शंभुः सगुणः सर्वभाववित्। शक्त्या युक्तो यदा स्वामिन्नधुना किं करोम्यहम् ॥३२॥ शक्तिहीनः पदा गन्तुं न शक्नोमि गणेश्वर। अतस्त्वं कृपया देव शक्तं मां कुरु कर्मणि ॥३३॥ ततः प्रादुरभूत्तस्य पुरतः स गणाधिपः। उवाच शंकरं तत्र हर्षयन् श्लक्ष्णया गिरा ॥३४॥ अहो पश्य च मां शंभो किं शोचसि महेश्वर। भवितासि सशक्तिस्त्वं मद्वाक्यान्नात्र संशयः ॥३५॥ अहमेवेश्वरो देवो ह्येको ब्रह्माण्डमंडले। तेन गर्वेण युक्तस्त्वं स विघ्नः सहसा कृतः ॥३६॥ अधुना ते गतो मोहो मदीया स्मृतिरागता। ध्यातस्तुतश्च तेनाऽहं प्रसन्नोऽस्मि न संशयः ॥३७॥ हिमाचलसुता देवी भविष्यति न संशयः। वृणोषि त्वं सतीं तां वै पार्वतीं च पुनः

शिव ॥३८॥ रमसे च तया सार्धं मद्भक्त्या भावितो हृदम्। ईश्वरः सहशक्तिस्त्वं मत्प्रसादात्सदा भव ॥३९॥ स्मृत-मात्रस्तवाग्रेऽहं प्रत्यक्षः स्यां सदाशिव। इति दत्त्वा वरं देवस्तत्रैवांतरधीयत ॥४०॥ ततश्च शंकरः क्षुब्धः शक्तो जातः स्वकर्मणि। जटामास्फालयामास गणेशं मनसा स्मरन् ॥४१॥ तस्माज्जातो महाबाहुर्वीरभद्रस्त्रिमस्तकः। त्रिपदः शूलवान् साक्षान्मृत्युरूपो महाद्युतिः ॥४२॥ शंकरं प्रणनामाथ प्रांजलिः सन्पुरः स्थितः। आज्ञां कुरु महादेव दासोऽहं ते वशे स्थितः ॥४३॥ वचनं तस्य संश्रुत्य प्रहृष्टः शंकरोऽब्रवीत्। मयज्ञस्य च दक्षस्य हरणं कुरु सांप्रतम् ॥४४॥ तदाज्ञां शिरसा धृत्वा अट्टहासमथाकरोत्। तेन त्रिभुवनं सर्वं कंपितं भयविह्वलम् ॥४५॥ ततो निर्गम्य वेगेन शरीरान्निर्ममे महान्। नानारुद्रानपारांश्च तैर्वृतः स गतो मखम् ॥४६॥ तमन्वयुर्गणाः शंभोर्नन्दिकेशादयोऽपरे। क्षुभिताः क्रोधसंयुक्ता ब्रह्मांडाशनसन्निभाः ॥४७॥ दुर्निमित्तानि सर्वाणि दक्षगेहेऽभवंस्तदा। शंकिता मुनयो देवाः किं भवेदिति विह्वलाः ॥४८॥ एतस्मिन्नंतरे तत्र दक्षयज्ञे महाबलः। आजगामावृतो रुद्रैर्वीरभद्रो भयानकः ॥४९॥ नंदी भृंगरिटिर्भृंगी पुष्पदंतमुखास्तथा। आगताः क्रोधदीप्तास्या भक्षयन्तो यथान्तकाः ॥५०॥ सहसा वेगतः सर्वे मारयन्त इतस्ततः। पलायंत च दिक्प्रान्ते दक्षस्यानुचरास्तदा ॥५१॥ यज्ञमंडपमासाद्य बभंजुस्तत्क्षणेन च। देवान् सर्वान् मुनींश्चैव पीडयन्तः सुदारुणाः ॥५२॥ ऋषिपत्नीर्दधुस्तत्र देवपत्नीः सहस्रशः। अताडयन्महावीर्या हाहाकाराः प्रवर्तिताः ॥५३॥ कथं त्वसाधुपतयो भवती-भिर्वृताः खलु। शिवद्वेषकरा दुष्टास्तस्य प्राप्तं महत्फलम् ॥५४॥ एवमूचुर्हविर्द्रव्यं बभक्षुस्ते प्रहर्षिताः। वेदिकायां प्रचक्रुस्ते विट्सर्गं मूत्रणं तथा ॥५५॥ जगाम भगवांस्तत्र शंकरः क्रोधसंयुतः। धनुर्बाणधरः साक्षात्प्रलयाग्निरिवोत्थितः ॥५६॥ तत्र युद्धमभूद् घोरं देवानां रुद्रचारिणाम्। स्वयं च युयुधे शंभुः शस्त्रास्त्रैर्मर्मभेदिभिः ॥५७॥ पूष्णो दंतांश्च नाराचैर्भेदयामास शंकरः। भगस्य नेत्रमुन्मूल्य पातयामास संयुगे ॥५८॥ धर्मं धृत्वा महावीरो नंदिकेशोऽब्रवीत्तदा। को धर्मो वद रे दुष्ट शिवहीने मखे खलु ॥५९॥ कश्यपं धृतवांस्तत्र भृंगी तेजस्विनां वरः। वरुणं ताडयामास पुष्पदन्तश्च वीर्यवान् ॥६०॥ भैरवेण धृतस्तत्र देवेन्द्रो मूर्च्छितः कृतः। वीरभद्रो बलाद्दक्षं पातयामास भूतले ॥६१॥ एवं प्रमथिते यज्ञे शंखचक्रगदाधरः। युयुधे विष्णुरव्यग्रो महाबलसमन्वितः ॥६२॥ शस्त्रास्त्रैर्बहुभिस्तेन मर्दिता बलवत्तराः। रुद्रा भूतपिशाचाद्या हाहाकारं प्रचक्रिरे ॥६३॥ तं दृष्ट्वा सहसा शंभुर्हृदि ध्यात्वा गणाधिपम्। बाणेस्तं हृदि संविध्य पातयामास भूतले ॥६४॥ पुनः

संज्ञां समासाद्य स्वास्त्रं नारायणात्मकम्। मोचयामास गोविंदो जगत्संहारकारकम् ॥६५॥ ततः शंभुर्मुमोचापि स्वास्त्रं पाशुपतं महत्। ते उभे व्योम्नि चात्यन्तं युयुधाने परस्परम् ॥६६॥ तस्माज्जातो महानग्निर्ददाह पृथिवीमिमाम्। भयक्रान्तं त्रिभुवनं जातं तत्र मृतोपमम् ॥६७॥ एतस्मिन्समये तत्र वीरभद्रेण कल्पितम्। पशुरूपं शिरश्छित्वा दक्षस्याग्नौ हुतं ततः ॥६८॥ रुद्रैर्नानाविधैः कोलाहलस्तत्र प्रवर्तितः। छिन्नभिन्नाः सुरा जातास्त्रातारं लेभिरे न ते ॥६९॥ मुनयोऽपि भयोद्विग्ना व्यद्रवंस्तु दिशो दश। पिशाचादिभिराकृष्टाश्चक्रुशुश्चातिदारुणम् ॥७०॥ विष्णुना तत्र चक्रं वै भ्रामितं क्रोध-धारिणा। कृतान्तसदृशं मुक्तं शंभोः सन्निधिमागतम् ॥७१॥ चक्रं तच्छंकरं दृष्ट्वा तं नत्वा तत्र संस्थितम्। तेन क्रोध-परीतांगः शिवः शूलं समाददे ॥७२॥ शूलमुद्यम्य तं विष्णुं हन्तुं यावत्प्रवर्तते। तत्राकाशोद्भवा वाणी वारयामास शंकरम् ॥७३॥ न हन्तव्यो हरिः शंभो त्वया पाल्योऽयमप्युत। जहि कोपं महादेव शिवाय सततं नमः ॥७४॥ तत्राजगाम सहसा स्वयंभूस्तं न्यषेधयत्। मा कुरुष्व वधं शंभो विष्णोः संहारकारक ॥७५॥ नमः शिवाय शांताय शूलिने शंभवे नमः। महादेवाय रुद्राय पशूनां पतये नमः ॥७६॥ संहाररूपी त्वं साक्षादकाले किं प्रवर्तसे। जहि कोपं महाबाहो नमस्ते परमेश्वर ॥७७॥ ब्रह्मणा संस्तुतो देवः प्रशांतोऽभून्महामुने। तस्मिन्काले स्वयं विष्णुर्ब्रह्मणा ज्ञापितः प्रभुः ॥७८॥ शिवाय नमनं कृत्वा स्थितः संलज्जितो भृशम्। प्रोवाच मधुरं ब्रह्मा शंकरं वृषभध्वजम् ॥७९॥ शांत उर्वरितं यज्ञे हविर्द्रव्यं च यत्प्रभो। रुद्रभागः स विज्ञेयो गृहाण त्वं सदाशिव ॥८०॥ विघ्नेशमायया भ्रान्ता दक्षाद्याः सततं शिव। मोहितानां विशेषेण द्रष्टव्यं न प्रचेष्टितम् ॥८१॥ अतस्त्वं कृपया देव प्रसन्नो भव शंकर। सर्वेभ्यः सुखदाता वै यज्ञं तं पुनरारभ ॥८२॥ देवानां च मुनीनां च स्त्रीणां दासादिजीविनाम्। यथापूर्वं स्थितं रूपं तादृशं कुरु शंकर ॥८३॥ भगः स नेत्रसंयुक्तः पूषा वै पिष्टभुक् कृतः। देवाश्च मुनयः सर्वे स्त्रियो दासादयस्तथा ॥८४॥ यथापूर्वं कृतास्तेन युक्ता रूपेण तेजसा। गतदुःखाश्च सर्वे ते ववंदुः शंकरं पुनः ॥८५॥ दक्षस्य मस्तकं तत्र दग्धं वै जातवेदसि। तज्ज्ञात्वा शंकरो देवो भृंगिणं प्रत्युवाच ह ॥८६॥ गच्छ चानय तं हत्वा य आदौ दृश्यते त्वया। तस्य मस्तकमेतत्तु भवेद् दक्षस्य मस्तकम् ॥८७॥ तदा तेन पुरो दृष्टो ह्यजः परमशोभितः। तं हत्वा तच्छिरस्तत्र समानीतं च भृंगिणा ॥८८॥ तदेव योजयित्वा तमजीवयत शंकरः। स सद्य उत्थितस्तत्र दक्षोऽजमुखतां गतः ॥८९॥ ब्रह्मणा प्रेरितो दक्षः पुनस्तुष्टाव शंकरम्। गतमानो महाबाहुः

भक्त्या सर्वेश्वरं ततः ॥९०॥ दक्ष उवाच। नमामि शंकरं साक्षाद्यदाधारमिदं जगत्। कालरूपं यथाकालं बोधयामास तं शिवम् ॥९१॥ कालेन फलमूलानि जायंतेऽन्नादिकानि च। शीतोष्णसमभावश्च सदा कालेन जायते ॥९२॥ सूर्यस्तपति कालेन ज्योतिषां गण एव च। कालेन जायते वृष्टिरनावृष्टिस्तथा विभो ॥९३॥ कालेन सृज्यते सृष्टिर्ब्रह्मणा वै पुनः पुनः। कालेन पालनं तत्र कुरुते विष्णुरव्ययः ॥९४॥ कालेन स्वेच्छया शंभुः संहारं प्रकरोति च। यत्किंचिदिह तत्सर्वं कालाधीनं न संशयः ॥९५॥ स एव कालो भगवानीश्वरो ब्रह्मसंज्ञितः। शिवः साक्षाच्च वेदेषु कथ्यते वेदवादिभिः ॥९६॥ क्षमस्व मेऽपराधं त्वं त्वन्मायागर्विनस्य च। यत्कृतं तद्दयासिंधो नमस्ते परमेश्वर ॥९७॥ सगुणाय नमस्तुभ्यं निर्गुणाय नमो नमः। सृष्टिकर्त्रे च संहर्त्रे पात्रे नानास्वरूपिणे ॥९८॥ अनंतगुणराशिस्त्वं वर्णनीयं किमप्यहो। नान्तं ब्रह्मादयो जग्मुर्महेशानां च का कथा ॥९९॥ नमो नमो ब्रह्ममयाय देवादये शिवायाथ च पूर्णमूर्ते। अनादिमध्यान्तविहीनभूम्ने नमो नमो भक्तभयापहन्त्रे ॥१००॥ इत्येवं स्तुवतस्तत्र प्रेमगद्गदया गिरा। अजवत्तस्य संजातं भाषणं लललल्ललम् ॥१०१॥ तेन हृष्टो महादेवस्तं पुनर्नरमस्तकम्। भगवान् कारयामास यथापूर्वं मुनीश्वराः ॥१०२॥ प्रोवाच मधुरं वाक्यं शिवस्तं सर्वसन्निधौ। प्रजापतिपतिर्दक्ष सर्वमान्यो भविष्यसि ॥१०३॥ त्वया यद्रचितं स्तोत्रं मदीयं मत्प्रियं भवेत्। यस्तोष्यति प्रदास्यामि तस्मै काममनेन माम् ॥१०४॥ इह भुक्त्वाऽखिलान्भोगानंते मल्लोकमाप्नुयात्। मम प्रीतिकरश्चासौ भविष्यति न संशयः ॥१०५॥ त्वया यदजवद्वाक्यं कृतं मे खलु सन्निधौ। तद्वचो मत्समीपे वै करिष्यति नरः सकृत् ॥१०६॥ तेन हृष्टो भविष्यामि वांछितं पूरयामि च। एवं दत्त्वा वरं शंभुस्तत्रैवांतरधीयत ॥१०७॥ सर्वे स्वस्वस्थलं जग्मुर्हर्षिता धर्षितास्तथा। दक्षश्च स्वगृहे विप्रा दुःखितः स्थितवान् स्वयम् ॥१०८॥ तदादि शिवभक्ता ये न कुर्वन्ति शिवालये। अजवन्निनदं तेन हृष्टो भवति शंकरः ॥१०९॥ इति सर्वं समाख्यातं दक्षशापादिकं च यत्। यज्ञभंगस्य हेतुं च पुनः किं श्रोतुमिच्छथ ॥११०॥

॥ ॐ इति श्रीमदान्त्ये पुराणोपनिषदि श्रीमन्मौद्गले महापुराणे प्रथमे खण्डे वक्रतुंडचरिते दक्षचरितं नाम चतुर्थोऽध्यायः ॥



॥ श्रीगणेशाय नमः । शौनक उवाच । श्रुतं दक्षस्य चरितं यज्ञध्वंसादिकं महत् । मुद्गलस्य च दक्षस्य संवादं कथयस्व भोः ॥१॥ सूत उवाच । शृणु शौनक संवादं दक्षमुद्गलसंभवम् । ब्रह्मभूयकरं पूर्णं भावेन च श्रुतं हृदि ॥२॥ दक्षप्रश्नं परं धृत्वा मुद्गलो गणपप्रियः । तं प्रत्युवाच भावेन महर्षिर्योगिनां वरः ॥३॥ मुद्गल उवाच । सर्वेषां गणपो माता पिता चैव न संशयः । तेन सर्वादिपूज्योऽयं सर्वपूज्यः स देवराट् ॥४॥ ज्येष्ठराजेति यद्वाक्यं वेदेन प्रतिपादितम् । ज्येष्ठं भावाच्च तस्यापि ज्ञातव्यं सर्वसंमतम् ॥५॥ तस्य सर्वे कलांशा वै कलांशांशाश्च केचन । न कला तस्य संपूर्णा जगत्यां कुत्र दृश्यते ॥६॥ विनायको नाम तेन जातोऽसौ भगवान् खलु । विशेषेण च सर्वेषां नायकोऽयं गणाधिपः ॥७॥ विगतो नायको यस्य स्वेच्छाचारी विनायकः । स्वानंदलोकवासी च स्वसुखेन प्रभावतः ॥८॥ ब्रह्मविष्णुशिवाद्यैश्च वेदैर्योगिभिरेव च । सर्वैः संपूजितो देवो धर्मकामार्थमुक्तये ॥९॥ अहं ब्रह्मेति माहात्म्याद् गर्वो भवति शाश्वतः । शिवादीनां यदाधारादिदं सर्वं प्रवर्तते ॥१०॥ तदा मदहरोऽयं वै तेषां ज्ञानार्थसिद्धये । विघ्नकर्ता महाराजः स्वयं भवति विघ्नपः ॥११॥ पदभ्रष्टाः कृतास्तेन सर्वे देवादयो द्विजाः । किमाधारमिदं सर्वं विचिन्वंति समाधिना ॥१२॥ तेन पश्यन्ति योगेन चेतसः पंचवृत्तिभिः । तासां प्रकाशकोऽयं वै चिंतामणिरिति स्मृतः ॥१३॥ वेदैः संपादितं ज्ञात्वा शरणं तं व्रजंति ते । ततो विघ्नहरो जातस्तेषां सर्वार्थदः स्मृतः ॥१४॥ सर्वसत्तात्मकोऽयं वै विघ्नराजः प्रकीर्तितः । अत एव गणेशाद्धि परं किंचिन्न विद्यते ॥१५॥ स-विघ्नस्त्वं प्रजातोऽसि तमेव शरणं व्रज । चिन्तामणिं विघ्नहरं गणेशं च विनायकम् ॥१६॥ सूत उवाच । प्रजापतिरिति श्रुत्वा दक्षो हृष्टमनाः पुनः । पप्रच्छ विनयेनैव कथां पापप्रणाशिनीम् ॥१७॥ दक्ष उवाच । कोऽयं स्वानंदवासी वै कथं ज्ञेयो भवेन्मया । वद तत्र विभो मार्गं तेन तं सततं भजे ॥१८॥ मुद्गल उवाच । अत्र ते कथयिष्यामि इतिहासं पुरातनम् । पार्वतीशिवसंवादं यथा जातं शृणुष्व भोः ॥१९॥ कैलासे गिरिवर्ये तु सुखासीनं महेश्वरम् । पार्वती प्रणता भूत्वा पृच्छति स्म मुदायुता ॥२०॥ पार्वत्युवाच । शिव त्वं सर्वदेवानां नागानां रक्षसां तथा । मानवानां च सर्वेषां पूज्यः स्वामी न संशयः ॥२१॥ तेभ्यः पदप्रदाता त्वं सर्वाधीशः पुरातनः । मायाविकारहीनश्च शिवस्तेन प्रकीर्तितः ॥२२॥ त्वं किं समाधिना देव ध्यायसे मां वद प्रभो । त्वत्तः परतरं किंचिन्न दृष्टं नैव संश्रुतम् ॥२३॥ इति पृष्टो महादेवस्तां प्रत्यूचे च सादरम् । सारं वेदादिमान्यं च ब्रह्मभूयकरं परम् ॥२४॥ श्रीमहादेव उवाच । शृणु प्रिये प्रवक्ष्यामि यं ध्यायामि दिवानिशम् ।

गणेशं हृदि संस्थं मे स्वानंदावासिनं परम् ॥२५॥ साकारं च निराकारं तस्मिन्देवि न विद्यते। मनोवाणीविहीनं न मनोवाणीमयं न वै ॥२६॥ शिवस्य वचनं श्रुत्वा पार्वती प्रेमसंयुता। उवाच मधुरं वाक्यं वाक्यज्ञा भावपूर्वकम् ॥२७॥ पार्वत्युवाच। कोऽसौ गणेशनामा वै कथं स हृदि तिष्ठति। स्वानंदवसतिः का च यत्र तिष्ठति स प्रभुः ॥२८॥ साकारो न निराकारो कथं स ज्ञायते जनैः। मनोवाणीमयो नैव हीनस्ताभ्यां न च क्वचित् ॥२९॥ तस्य ध्यानं महेशापि कर्तुं नैव प्रशक्यते। ध्यायसे केन मार्गेण भव मे कथय प्रभो ॥३०॥ अहं दासी त्वदीया वै शिष्यभावेन संस्थिता। कथयस्व महादेव ध्यानं गाणेशकं मम ॥३१॥ तमहं साधयिष्यामि साक्षात्कारेण वै यथा। कृतकृत्या भविष्यामि प्रसादात्ते न संशयः ॥३२॥ मुद्गल उवाच। इति पृष्टो महादेवो देव्या भक्त्यादरेण च। पात्रं गणेशमार्गस्य दृष्ट्वा प्रेमयुतोऽब्रवीत् ॥३३॥ तत्तेऽहं शृणु वक्ष्यामि गुह्याद् गुह्यतमं महत्। रहस्यं वेदशास्त्राणां यस्मात्परतरं न च ॥३४॥ दक्ष उवाच। तव वाक्यामृतेनाऽहं प्रीतो मुद्गल सांप्रतम्। उमामहेशसंवादं योगीन्द्र कथयस्व मे ॥३५॥ सूत उवाच। दक्षस्य भावयुक्तं तद्वचनं मुद्गलेन वै। श्रुतं तेन सुसंतुष्टो वक्तुं समुपचक्रमे ॥३६॥ मुद्गल उवाच। शम्भुः स्मृत्वा गणेशानं हृदि ध्यात्वा महायशाः। प्रत्युवाच महादेवीं गाणपत्यः प्रतापवान् ॥३७॥ श्रीशिव उवाच। सर्वं मायामयं विद्धि जायते यच्च चेतसा। चित्तप्रवेशहीनं च मायातीतं निगद्यते ॥३८॥ रचितं द्विविधं येन स एव गणनायकः। स्वसंवेदं महः प्रोक्तं वेदयेत्तद्विशेषतः ॥३९॥ तत्रैव दृश्यते देवो योगिभिर्योगपारगैः। तेन स्वानंदवासी स कथ्यते वेदवादिभिः ॥४०॥ चित्तस्य पंचभूमीनां प्रकाशनकरः स्मृतः। चिंतामणिरिति ख्यातो हृदि संतिष्ठति प्रभुः ॥४१॥ समूहे गणधातुश्च तेषां स्वामी गणेश्वरः। अभेदयोगमार्गेण सदा ध्यातुं स शक्यते ॥४२॥ मुद्गल उवाच। श्रुत्वा शिववचो रम्यं पार्वती विनयान्विता। चकिता प्रत्युवाचेदं वचनं हितकारकम् ॥४३॥ पार्वत्युवाच। भगवन्कथितं कूटवचनं योगभावितम्। न बुद्धं तन्मया स्वामिंस्तस्माच्च सुलभं वद ॥४४॥ त्वया मायामयं प्रोक्तं कीदृशं कथय प्रभो। मायाहीनं कथं ज्ञेयं विस्तरेण वदस्व मे ॥४५॥ मुद्गल उवाच। शक्तिप्रश्नं च संश्रुत्य हृष्टः शंभुः सुरोत्तमः। साश्रुनेत्रः सरोमांचो भक्त्या जातो महायशाः ॥४६॥ आदिमायां प्रशंसन स तं वक्तुं तामुपचक्रमे। योगमार्गस्य सिद्ध्यर्थं विस्तरेण महेश्वरः ॥४७॥

॥ इति श्रीमदान्त्ये पुराणोपनिषदि श्रीमन्मौद्गले महापुराणे प्रथमे खण्डे वक्रतुंडचरिते पार्वतीप्रश्नविचारो नाम पंचमोऽध्यायः ॥

॥ श्रीगणेशाय नमः ॥ शौनक उवाच । पार्वतीशिवसंवादं कथयस्व महामते । पाराशर्यस्य सर्वज्ञ शिष्य सर्वार्थतत्त्ववित् ॥१॥ सूत उवाच । मुद्गलेन यथा प्रोक्तं दक्षे वै शांतिकारकम् । शिवयोस्तं च संजातं संवादं कथयामि भोः ॥२॥ श्रीशिव उवाच । धन्या देवि महाभागे त्वत्समान्या न विद्यते । महापुण्येन ते बुद्धिर्गणेशज्ञानलालसा ॥३॥ कारितोऽहं त्वया शक्ते सत् स्त्रिया नात्र संशयः । ममैवेदं महद्भाग्यं गाणपत्यप्रिया गृहे ॥४॥ गणेशाय नमः कृत्वा कथयामि कथानकम् । आदौ मायामयं विद्धि मायातीतं ततः परम् ॥५॥ स्वस्वरूपमयं सर्वं ज्ञातव्यं योगिना सदा । द्विविधं योगमार्गेण साधनेन विशेषतः ॥६॥ आदौ ब्रह्म स्थितं देवि एकानेकादिवर्जितम् । स्वतः परत उत्थानात्तदेव द्विविधं बभौ ॥७॥ स्वत उत्थानके नैव विकल्पः सदृशः कृतः । अहमस्मीति भावेन बिम्बं भिन्नं विनिःसृतम् ॥८॥ सकलाभेदरूपं यन्निराकारं स्वभावतः । अहमस्मि सदा प्रोक्तं ब्रह्मरूपं च शाश्वतम् ॥९॥ तेनापि स्वस्वरूपं तद् दृष्टमात्मात्मकं परम् । कीदृशोऽहं विकल्पश्च कृतो मोहेन तत्क्षणात् ॥१०॥ चतुश्चतुः पदार्था ये योगरूपेण संस्थिताः । तेषामभेदरूपं च दृष्टं सर्वात्मकं परम् ॥११॥ मायया बिम्बरूपोऽयं जातः सद्यश्च नामतः । माया बिम्बं द्वितीयं तत्तत्र मोहप्रधारणात् ॥१२॥ मोहधारणमात्रेण विस्मृतं स्वस्वरूपकम् । मायासुखेप्सुना जाता तस्य देवस्य तत्क्षणात् ॥१३॥ सर्वाकारा निराकारा माया जाता द्विधापरा । बुद्धिरूपा महाभागा तया सर्वं प्रबुध्यते ॥१४॥ निराकारं च साकारं बुद्ध्या संबुध्यते जनैः । बुद्ध्या यद्बुध्यते क्षेत्रे बुद्धिरूपं तदेव च ॥१५॥ तत्र मोहो च साकारो निराकारः स्वयं प्रभुः । मोहहीन इति भ्रांतिर्द्विधा गुणसमुत्थिता ॥१६॥ सा सिद्धिर्मोहकर्त्री वै नानाभ्रांतिप्रकाशिका । एका बुद्धिश्च सर्वत्र तथा द्वैधे प्रवर्तिता ॥१७॥ सिध्या संमोहिता बुद्धिर्भ्रान्ता जाता च पार्वती । साकारमोहसंयुक्ता निराकारविमोहिता ॥१८॥ मोहधारकबुद्धिश्च सिद्धिर्मोहप्रदायिनी । तयोः प्रकाशदाता स गणेशानोऽभवत् स्वयम् ॥१९॥ स एव नामतस्तत्र न गतो निजरूपधृक् । बिम्बबिंबिप्रभावत्वाद्भासते तादृशो वृथा ॥२०॥ सर्वात्मकं च बिम्बं यत्परं तत्रैव बिम्बितम् । आत्मरूपं निराकारं तयोः संयोगितां गतः ॥२१॥ स एव गणराजोऽयं मायाखेलकरः प्रभुः । तस्येच्छया तद् द्विविधं चलति प्रतिसूत्रवत् ॥२२॥ त्रिविधं चैकभावं च जातं मोहेन पार्वती । विकल्पः प्रकृतस्तेन एकोऽहं स्यां बहुस्त्विति ॥२३॥ विकल्पेन द्विधा भूतं देहदेहिस्वरूपकम् । सोऽहं ब्रह्मेति यत्प्रोक्तं वेद वै वेदवादिभिः ॥२४॥ तदेव देहि रूपं च देहमोहप्रधारणात् । देहरूपं तथा तत्र बिन्दुमात्रं प्रकीर्तितम् ॥२५॥ चतुर्विधानां देहानां ब्रह्मरूपं

पुराननम्। बहुरूपं च तद्विद्धि देहकैवल्यसंज्ञितम् ॥२६॥ सोऽहं ब्रह्मैकरूपं यद्बहुरूपं च बिंदुमत्। स्वस्वकार्येषु नो शक्तं सत्ताहीनतया शिवे ॥२७॥ नाभ्यां तपः कृतं घोरं स्वस्वरूपस्य सुंदरि। दिव्यवर्षसहस्रान्ते प्रसन्नोऽभूद् गजाननः ॥२८॥ प्रत्यक्षतां ययौ तत्र शुंडादंडविराजितः। लंबोदरो महाकर्णश्चतुर्बाहुस्त्रिनेत्रभृत् ॥२९॥ तस्य दर्शनमात्रेण स्फूर्तिर्जाता तयोस्तदा। तया तं तौ समाबुध्य नतौ स्तोत्रं प्रचक्रतुः ॥३०॥ प्रकृतिपुरुषावूचतुः। नमस्ते गणनाथाय स्वसंवेद्यमयाय ते। निराकारस्वरूपा वै शुंडा यस्य विराजते ॥३१॥ यस्य देहश्च साकारः कंठाधः परिकथ्यते। अभेद एतयोर्ज्ञातस्तेन त्वं वै गजानन ॥३२॥ चतुर्विधं निजानंदाद्वेदेषु कथितं भवेत्। एकमव्यक्तरूपं च द्वितीयं समरूपकम् ॥३३॥ तृतीयं सत्स्वरूपं च चतुर्थं यत्सदा ह्यसत्। चतुर्देहस्वरूपं ते तेन त्वं वै चतुर्भुजः ॥३४॥ तवोदरे स्थितं सर्वं तेन लंबोदरः स्मृतः। मायामायिकरूपं च द्वौ पादौ द्विविधं च ते ॥३५॥ एते सर्वे गणा ढुंढे त्वदीया नात्र संशयः। गणनाथोऽसि तेन त्वं नाम्ना ख्यातश्च सर्वदा ॥३६॥ एतादृशो निजात्मासावावयोर्ध्यान आवभौ। स्वसंवेद्यतया ध्यातो भक्तानुग्रहकारकः ॥३७॥ भक्ताभिमानभावेन देहधारी स्वयं ह्यभूत्। एतैश्च लक्षणैर्युक्तो गणेशो नामधारकः ॥३८॥ धन्यं सर्वं कृतं स्वामिन् येन त्वं देहवानभूः। स्वानंदवासभृत् साक्षाद् हृदि नित्यं स्थिरो भव ॥३९॥ नमस्ते विघ्नराजाय नमस्ते विघ्नहारिणे। भक्तानां वै ह्यभक्तानां विघ्नकर्त्रे नमोऽस्तु ते ॥४०॥ कर्मणां फलदात्रे च ज्ञानानां सिद्धिदायिने। अमेयशक्तये तुभ्यं सर्वाधाराय ते नमः ॥४१॥ किं कर्तव्यं दयासिंधो तदेवाज्ञापय प्रभो। तव भक्तिं महातीव्रां देहि नौ गणनायक ॥४२॥ एवं स्तुतिं समाकर्ण्य परितुष्टो गणाधिपः। मेघगंभीरया वाचा हर्षयन्नब्रवीत्तदा ॥४३॥ श्रीगणेश उवाच। साधु साधु महाभागौ यदुक्तं स्तोत्रमुत्तमम्। मम प्रीतिकरं सर्वकामदं प्रभविष्यति ॥४४॥ धर्मार्थकाममोक्षाणां दायकं पुष्टिवर्धनम्। कारागृहस्थितानां च मोचकं लक्षपाठतः ॥४५॥ मारणोच्चाटनादीनां नाशकं तत्तथैव च। एकविंशतिवारं यः एकविंशद्दिनावधि ॥४६॥ पठेत्तु यदि वै भक्त्या स ईप्सितफलं लभेत्। ब्रह्मभूयकरं चैतन्निष्कामपठनाद्भवेत् ॥४७॥ भवतोस्तपसा तुष्टः स्तोत्रेणानेन भावतः। प्रीतो दास्यामि संपूर्णं भवद्भ्यामीप्सितं च यत् ॥४८॥ बिंदुमात्रस्वरूपेण यत्स्थितं ब्रह्म शाश्वतम्। तस्माच्चतुर्विधं विश्वं प्रकटं संभविष्यति ॥४९॥ प्रकर्षेण च सर्वेषां कृतिस्तस्माद्विनिःसृता। प्रकृतिस्तेन ते नाम भविष्यति जनेष्विदम् ॥५०॥ सृष्ट्वा चतुर्विधं विश्वं बंधहीना भविष्यसि। मदीयां भक्तिमचलां प्रकृते प्राप्स्यसि ध्रुवम् ॥५१॥ जनास्त्व-

दीयभक्तिं ये करिष्यंति सकामतः। निष्कामतश्च तेभ्यस्त्वं सर्वं दास्यसि शोभने ॥५२॥ चतुर्विधेप्ययं शेते पुरे तेनैव पूरुषः। सोऽहंमात्रात्मको भावी नाम्ना सर्वत्र तिष्ठतु ॥५३॥ सर्वाकारविहीनोऽयं तत्र भ्रान्तो भविष्यति। बिंबबिंबित-भावेन प्रकृतौ मोहितः सदा ॥५४॥ स्वयं मोहविहीनः स सोऽहंमात्रात्मकः सदा। मत्प्रसादाद्भवेन्नित्यं ब्रह्म सोऽहं सुखात्मकः ॥५५॥ मदीया भक्तिरचला भविष्यति तवापि च। तया बंधविहीनस्त्वं तथा मान्यो भविष्यसि ॥५६॥ तव भक्तिं करिष्यन्ति जना भावेन संयुताः। तेभ्यस्तदीप्सितं सर्वं दास्यसि त्वं न संशयः ॥५७॥ ब्रह्मभूयपदं चैव दास्यसे योगसेवया। साक्षात्पुरुषरूपस्त्वं सर्वसत्तात्मको भव ॥५८॥ प्रकृतौ वीर्यमाधत्स्व सर्वसत्तात्मकं विभो। तेनेयं सर्व-सूर्विश्वं सृजिष्यति न संशयः ॥५९॥ सृष्ट्वा चतुर्विधं सर्वं पालनं हरणं तथा। कर्तव्यं कालयोगेन करणीयमिदं स्मृतम् ॥६०॥ सर्वेषां प्रकृतिर्माता पिता पुरुष उच्यते। नानारूपाणि नामानि कल्पयिष्यन्ति वै जनाः ॥६१॥ इत्युक्त्वा गणराजस्तु तत्रैवांतरधीयत। प्रकृतिः पुरुषश्चैव यथाज्ञप्तौ प्रचक्रतुः ॥६२॥

॥ ओमिति श्रीमदान्त्ये पुराणोपनिषदि श्रीमन्मौद्गले महापुराणे प्रथमे खण्डे वक्रतुंडचरिते प्रकृतिपुरुषवरप्रदानं नाम षष्ठोऽध्यायः ॥

॥ श्रीगणेशाय नमः ॥ पार्वत्युवाच। श्रुत्वेदं त्वन्मुखांभोजाद्धर्षश्चेतस्यजायत। पुनर्वदस्व मे स्वामिन् गणराजकथामृतम् ॥१॥ कथानां च रहस्यं यत्तदेवैतन्न संशयः। पुनाति प्राश्निकं श्रोतॄन् वक्तारं भक्तितः श्रुतम् ॥२॥ प्रकृतिः पुरुषश्चोभौ कथं सृष्टिं प्रचक्रतुः। अंतर्हिते निजानंदे गणेशे स्वेच्छया विभौ ॥३॥ मुद्गल उवाच। पार्वतीवचनं श्रुत्वा प्रहृष्टः शंकरोऽब्रवीत्। कथां रसयुतां रम्यां पावनानां च पावनीम् ॥४॥ शंकर उवाच। शृणु देवि प्रवक्ष्यामि गणनाथकथां शुभाम्। धन्यासि सादरा जाता सप्रेमा विघ्ननाशिनी ॥५॥ अन्तर्हिते गणेशे च प्रकृतिः पुरुषस्तथा। सामर्थ्येन युतौ जातौ परस्परमनोनुगौ ॥६॥ तपसा वरदानेन मोहयामास तत्क्षणात्। पुरुषं प्रकृतिः सा वै नानाभावार्थदर्शिनी ॥७॥ नानाविभवयुक्तां तां दृष्ट्वा

पुरुषसत्तमः । मोहितः पूर्णभावेन तदधीनोऽभवत्सदा ॥८॥ संवीक्षिता महामाया पुरुषेण महात्मना । हावभावयुता तत्र संस्थिता भक्तिभावतः ॥९॥ तस्यां सत्तात्मकं वीर्यं पुरुषेण प्रकाशकम् । निक्षिप्तं सहसा देवि तेन सा गर्भवत्यभूत् ॥१०॥ स गर्भो ववृधे तत्र तेजसा स्वेन संवृतः । महता कालयोगेन पूर्णो जातः प्रतापवान् ॥११॥ समये सुषुवे सा तं पुत्रं तेजोमयं परम् । तस्य नामाऽभवल्लोके महानित्यभिविश्रुतम् ॥१२॥ अंतस्तु यत्स्थितं देवि सर्वांतर्यामि तत्परम् । लोकेषु च महत्तत्वं ज्ञातव्यं तत्समाधिना ॥१३॥ सर्वेषामादिभूतोऽयं महानात्माऽभवत्प्रभुः । ज्येष्ठोऽयं तत्त्वजातीनां हृदि तेषां समास्थितः ॥१४॥ महता च ततः सृष्टं यदहंकाररूपकम् । स एव त्रिविधो जातो भिन्नमूर्तिः प्रतापवान् ॥१५॥ अहं सर्वत्र तिष्ठामि मदाधारमिदं स्मृतम् । तेनाहंकारनामा स सदाहंकरणात् शिवे ॥१६॥ स एव बाह्यभावेन स्थितः सर्वत्र सर्वराट् । इच्छितं महता यद्वै तत् कर्तुं सुसमाहितः ॥१७॥ त्रिविधोऽसौ गुणैस्तत्र तन्निबोध जगन्मयि । सात्त्विको राजसश्चैव तामसः कथ्यते बुधैः ॥१८॥ तेनाहंकरणस्यापि त्रिशक्तित्वं समागतम् । सात्त्विकी ज्ञानशक्तिश्च तया भावः प्रबुध्यते ॥१९॥ राजसी या क्रियाशक्तिस्तया कार्यं प्रवर्तते । तामसी द्रव्यशक्तिर्या देहरूपा प्रकथ्यते ॥२०॥ तत्रादौ तामसी शक्तिः प्रेरिता विश्वयोनिना । निर्ममे शब्दरूपं सा तेनाकाशं विनिर्मितम् ॥२१॥ आकाशेन स्पर्श एवं निर्मितः सर्वसिद्धये । स्पर्शेन निर्मितो वायुर्महाबलयुतः प्रभुः ॥२२॥ वायुना निर्मितं रूपं तेजोरूपेण निर्मितम् । तेजसश्च रसोत्पत्ती रसादापो विनिःसृताः ॥२३॥ अद्भिश्च निर्मितो गंधो गंधाद्भूमिरजायत । तमोगुणमयी सृष्टिरेषा जाता महाद्भुता ॥२४॥ तन्मात्रा भूतसर्गश्च पंचपंचात्मकः स्वराट् । पंचभूतात्मको देहः सर्वत्रैव प्रदृश्यते ॥२५॥ ततो राजसशक्त्या च पंचभूतमयानि वै । इंद्रियाणि प्रसृष्टानि क्रियारूपाणि तानि वै ॥२६॥ पंच ज्ञानेंद्रियाण्याहुर्ज्ञानरूपधराणि च । जिह्वा चक्षुस्त्वचा नासा कर्णश्चैवाऽत्र पंचमः ॥२७॥ कर्मेंद्रियाणि पंचैव हस्तौ पादौ गुदं च वाक् । लिंगं पंचममत्रैव एभिः संजायते क्रिया ॥२८॥ पंच प्राणास्तथा ज्ञेयाः प्राणो व्यानस्त्वपानकः । उदानश्च समानो वै राजसाः पंच वायवः ॥२९॥ सप्तधातुविभागार्थं क्रियारूपा उदाहृताः । एषां क्रियात्मिका सृष्टी राजसी कथिता प्रिये ॥३०॥ सात्त्विकया मायया देवा इंद्रियाणां विनिर्मिताः । दिशो वायुश्च वरुणोऽश्विनौ सूर्यः प्रकीर्तितः ॥३१॥ एता ज्ञानेंद्रियाणां च देवताः परिकीर्तिताः । अग्निर्विष्णुः प्रजापाल इंद्रो मित्रश्च पंचमः ॥३२॥ एताः कर्मेंद्रियाणां वै देवताः परिकीर्तिताः । सात्त्विकी सृष्टिरित्युक्ता दशदेवस्वरूपिणी ॥३३॥

एते तत्त्वस्वरूपाख्या आदिदेवाः प्रकीर्तिताः। यथाविधि तथा जाता ज्ञानहीना बभूविरे ॥३४॥ ज्ञानहीनत्वदोषेण सृष्टिं कर्तुं न च क्षमाः। तेभ्यो ज्ञानप्रदानार्थमुपदेशं प्रचक्रतुः ॥३५॥ प्रकृतिः पुरुषश्चोभौ मंत्रमेकाक्षरं परम्। अनुष्ठानविधायुक्तं ददतुर्गणपस्य तौ ॥३६॥ ते तत्रैव स्थिताः सर्वे तपश्चक्रुर्महद् भृशम्। तेन संतुष्टतां यातो गणेशो गणवल्लभः ॥३७॥ प्रत्यक्षतां ययौ तेषां समीपे संस्थितो महान्। तं दृष्ट्वा हर्षिताः सर्वे देवाः स्तोत्रं प्रचक्रिरे ॥३८॥ तत्त्वान्यूचुः। नमस्ते वक्रतुण्डाय भक्तसंरक्षकाय च। सर्वाधीशाय सर्वाय गणानां पतये नमः ॥३९॥ अव्यक्ताव्यक्तरूपाय सत्यासत्याय ते नमः। समाय विषमायैव विघ्नेशाय नमो नमः ॥४०॥ आत्मनेऽनात्मने तुभ्यं निर्गुणाय गुणात्मने। नामरूपधरायैव द्वाभ्यां हीनाय ते नमः ॥४१॥ अनंतोदरसंस्थाय नानाभोगकराय च। भोगहीनाय सर्वत्र स्वानंदपतये नमः ॥४२॥ मायाधाराय वै तुभ्यं मायाहीनाय ते नमः। मायिनां मोहकाराय सर्वज्ञाय च ते नमः ॥४३॥ सर्वसिद्धिधरायैव सिद्धीनां पतये नमः। सिद्धिहीनाय सिद्धाय सिद्धानां पतये नमः ॥४४॥ जगन्मयाय वै तुभ्यं जगद्धीनाय ते नमः। कर्मणां फलदात्रे च कर्मरूपाय ते नमः ॥४५॥ कर्महीनाय तेऽज्ञानज्ञानदात्रे नमो नमः। ज्ञानिनां ज्ञानकर्त्रे च ज्ञानहीनाय ते नमः ॥४६॥ चतुर्विधधरायैव चतुर्विधमयाय च। चतुर्विधविहीनाय स्वसंवेद्याय ते नमः ॥४७॥ पाशाङ्कुशधरायैव दंताभयधराय च। चतुर्भुजाय वै शूर्पश्रुतये तुंदिलाय च ॥४८॥ महते चैकदंताय महतां च महीयसे। लघवे लघुरूपाय लघूनां लाघवे नमः ॥४९॥ गजवक्राय देवाय ब्रह्मणे ब्रह्मरूपिणे। ब्रह्मणस्पतये चैव ब्रह्मदात्रे नमो नमः ॥५०॥ किमस्माभिः स्तुतिः कार्या ह्यपारगुणराशये। नमो नमो गणेशाय त्वं तुष्टो भव सर्वदा ॥५१॥ कृतांजलिपुटाः सर्वे ऋषयश्च स्थिताः पुरः। तान् दृष्ट्वा गणराजस्तु हृष्टः सन् प्रत्युवाच ह ॥५२॥

॥ ओमिति श्रीमदान्त्ये पुराणोपनिषदि श्रीमन्मौद्गले महापुराणे प्रथमे खण्डे वक्रतुण्डचरिते तत्त्वकृतस्तुतिवर्णनं नाम सप्तमोऽध्यायः ॥



॥ श्रीगणेशाय नमः ॥ श्रीशिव उवाच। शृणु देवि गणेशस्य चरितं पापनाशनम्। भुक्तिमुक्तिप्रदं चैव स्मरणेन सुसिद्धिदम् ॥१॥ गजाननः प्रसन्नात्मा परमात्मा परात्परः। भक्तानंदकरः साक्षादूचिवान् भक्तिभावितः ॥२॥ श्रीगजानन उवाच। भो भोस्तत्त्वानि सर्वाणि वरं ब्रूत हृदीप्सितम्। तपसाऽहं प्रसंतुष्टो भक्त्या स्तोत्रेण भावतः ॥३॥ भवत्कृतमिदं स्तोत्रमतिप्रीतिकरं मम। सर्वसिद्धिप्रदं चैव पठते शृण्वते भवेत् ॥४॥ विद्याकामो लभेद्विद्यां धनकामो धनं लभेत्। स्त्रीकामः स्त्रियमाप्नोति पुत्रकामः सुपुत्रकान् ॥५॥ मुक्तिकामो लभेन्मुक्तिं जयकामो जयं लभेत्। अस्य स्तोत्रस्य पठनात् वांछितं लभते परम् ॥६॥ श्रीशिव उवाच। गणेशवचनं श्रुत्वा भक्तिनम्रात्मकन्धराः। ऋषयस्तं प्रणम्यादावूचुस्ते हृष्ट-मानसाः ॥७॥ आदिकाश्यप ऊचुः। प्रसन्नो भगवन्नद्य यदि देयो वरो महान्। त्वदीयामचलां भक्तिं देहि नो गणनायक ॥८॥ सृष्टिसामर्थ्यमत्यंतमस्माकं त्वत्प्रसादतः। अस्तु वै भजतां सर्वसिद्धिदाश्च वयं तथा ॥९॥ यद्यत् हृदीप्सितं देव तत्तत् सिध्यतु सर्वदा। बंधहीनत्वमनिशं देहि त्वं विघ्ननाशन ॥१०॥ तत्त्वानां वचनं सर्वे श्रुत्वा गणपतिः स्वयम्। ददौ तेषामभीष्टं स महादेवि महत्प्रदः ॥११॥ श्रीगजानन उवाच। दत्ता वरा मया देवा ये भवद्भिर्वृताः पराः। इत्युक्त्वान्तर्दधे ढुंढिः ऋषीणां पश्यतां खलु ॥१२॥ स्वानंदे च गते देवे गणेशे परमात्मनि। खिन्ना इवाऽभवन् देवाः परस्परमुखेक्षणाः ॥१३॥ गणेशवरदानेन ज्ञानं प्राप्य महाद्भुतम्। बुद्धियुक्ता महादेवाः सृष्टिं चक्रुः प्रभावतः ॥१४॥ परस्परप्रवेशं च चक्रुस्त ऋषयस्तदा। तेनैक-भावतां प्राप्तास्तस्मादण्डं बभूव वै ॥१५॥ तस्मिन्नंडे पुमानादिरेकः सर्वात्मशक्तिमान्। जातो वै भगवान् साक्षाद् गुणेशो गुणवल्लभः ॥१६॥ महता कालयोगेन देहात्तस्य विनिःसृताः। आपस्तत्र स्थितं ह्यण्डं तत्र वृद्धिं ययौ च सः ॥१७॥ कालेनावयवी जातस्ततः संपूर्णदेहवान्। तस्य तेजःप्रभावेण तदण्डं स्फुटितं महत् ॥१८॥ स एव निःसृतः साक्षादसंख्यातार्कसन्निभः। अपारमहिमा यस्य सर्वादिः सर्वभावनः ॥१९॥ सर्वतो हस्तपादो वै सर्वतो नासिकोदरः। सर्वतोऽक्षिमुखोऽनंतः सर्वतः श्रुतिमान् बभौ ॥२०॥ असंख्यावयवो देवो ह्यसंख्योदारविक्रमः। असंख्यलीलया युक्तः परमात्मस्वभाववान् ॥२१॥ आदिमध्यान्तहीनः स सर्वत्र व्याप्य संस्थितः। महतां च महीयान् यो यस्य पारो न दृश्यते ॥२२॥ अणुभ्योऽणुतरो देवो रोमरन्ध्रेषु यस्य वै। ब्रह्माण्डानि भ्रमन्ति स्म परागा इव चांबरे ॥२३॥ महाकारणनामा वै तुरीयो देहधारकः। आत्मप्रतीतिरूपं यत्कथ्यतेऽसौ महामुनिः ॥२४॥ गुणानामधिपोऽयं वै गुणेशस्तेन कथ्यते। सर्वात्मा सर्वरूपश्च नाददेहधरः

प्रभुः ॥२५॥ गुणेशेन कृतं कर्म नानाचेष्टात्मकं ततः । तेन नामानि जातानि पश्चात्तस्य महात्मनः ॥२६॥ आपः शरीरसंसृष्टास्तत्र सुप्तोऽयमीश्वरः । नारायण इति प्राप्तं नाम तस्य महात्मनः ॥२७॥ आपो नरप्रसूताश्च तेन नाराः प्रकीर्तिताः । ता एवायतनं तस्य कर्मणा तेन स प्रभुः ॥२८॥ भिन्नं भिन्नं सृजति च त्रिविधं त्रिविधं पृथक् । ब्रह्मेति तेन संप्राप्तं नाम तस्य प्रभावतः ॥२९॥ वेदोपनिषदि प्रोक्तो ब्रह्मलोकः सनातनः । सर्वेभ्यो यः परः श्रेष्ठमेनं विद्धि सुनिश्चितम् ॥३०॥ सर्वेषां यत्नदाता स कालरूपेण वर्तते । चालकस्तेन नामाभून् महादेव इति प्रभोः ॥३१॥ कर्मणामयमाधारो जातः सूर्य इति स्मृतः । मोहको वस्तुजातानामादिशक्तिश्च तेन सः ॥३२॥ इत्यादिनामतां प्राप्तो नानाभावेन कर्मणा । गुणेशस्तु तुरीयात्मा सर्वत्राऽसौ महान् प्रभुः ॥३३॥ कारणानां च सर्वेषां कारणं च न संशयः । महाकारणमेतच्च पुराणेषु प्रपठ्यते ॥३४॥ कर्तुः कर्ता स्वयं साक्षाद्धर्तुर्हर्ता न संशयः । पातुः पाता प्रकाशस्य प्रकाशोऽयं गुणेश्वरः ॥३५॥ त्रिदेहो गुणतश्चायं वामे राजसतां गतः । सात्त्विको मध्यभागे स दक्षिणे तामसो बभौ ॥३६॥ एतादृशो महात्मासावादिदेवो गुणेश्वरः । अज्ञानेनावृतो यस्मात्तेन वै तपसि स्थितः ॥३७॥ सोऽतपत्तप उग्रं तु हृदि ध्यात्वा गजाननम् । बहुकाले व्यतिक्रान्ते प्रसन्नोभूद्गजाननः ॥३८॥ आगतो देवदेवेशो धेनुर्वत्समिवादरात् । बोधयामास तं शीघ्रं गुणेशं भक्तवत्सलः ॥३९॥ श्रीगणेश उवाच । एकाक्षरस्य मंत्रस्य जपेन तपसाऽपि ते । प्रसन्नोऽहं महाबाहो गुणेश वृणु वांछितम् ॥४०॥ इत्येवं बोधितो देवि गणेशेन कृपावता । गुणेश्वरः प्रतुष्टाव भक्तिभावसमन्वितः ॥४१॥ गुणेश उवाच । नमामि देवं गणनाथमीशं सदा सुशान्तं हृदि योगिनां वै । अपारयोगं हठयोगनाथं सुशांतयोगेश्वरमानतोऽस्मि ॥४२॥ अयोगरूपं कथितुं त्वशक्यं निवृत्तिमात्रं ह्यसमाधिसंस्थम् । अभेदभेदात्मकमूलहीनं सुशांतयोगेश्वरमानतोऽस्मि ॥४३॥ सदा समाधिस्थमनंतपारं प्रभुं स्वसंवेद्यमयं विभान्तम् । निजात्मयोगेन च लभ्यमेवं सुशांतयोगेश्वरमानतोऽस्मि ॥४४॥ विदेहयोगेन च सांख्यरूपं जनेन लभ्यं गणराजमीड्यम् । सदा ह्युपाधौ न हितं गणेशं सुशांतयोगेश्वरमानतोऽस्मि ॥४५॥ सुसंस्थितं सर्वविलासयुक्तं हृद्बिम्बबोधात्मकमादिदेवम् । अभेदमात्रं परमार्थरूपं सुशांतयोगेश्वरमानतोऽस्मि ॥४६॥ अनादिमध्यान्तमनंतपारं सुसंवृतं संततमात्मरूपम् । गणेशमाद्यं पुरुषं पुराणं सुशांतयोगेश्वरमानतोऽस्मि ॥४७॥ अनादिरूपं प्रकृतिप्रभेदं सदा सुबिंद्वात्मकमप्रमेयम् । अमायिकं मोहकरं प्रसिद्धं सुशांतयोगेश्वरमानतोऽस्मि ॥४८॥ गुणेषु रूपेण विराजमानमपारम-

व्यक्तमयं गणेशम् । गुणैर्विहीनं गुणचालकं च सुशांतयोगेश्वरमानतोऽस्मि ॥४९॥ समस्वरूपं जगदीशमेकं सुषुप्तिरूपं सकलावभासम् । अनादिमायामयमोहधारं सुशांतयोगेश्वरमानतोऽस्मि ॥५०॥ जगन्मयं सूक्ष्मविभूतिधारं हिरण्मयं स्वप्नगतं गणेशम् । जनस्य विज्ञानकरं पुराणं सुशांतयोगेश्वरमानतोऽस्मि ॥५१॥ स्तुतं सदा देवमुनीन्द्रसिद्धैः स्थितं जगन्मोहमयं प्रसिद्धम् । सदा परं स्थूलविहारयुक्तं सुशांतयोगेश्वरमानतोऽस्मि ॥५२॥ असत्स्वरूपं विविधेष्वभेदं गणेशमायामयशक्तिरूपम् । मनोवचोहीनमहानुभावं सुशांतयोगेश्वरमानतोऽस्मि ॥५३॥ रविस्वरूपं ह्यमृतं पुराणमभेदमेकात्मकमात्मरूपम् । अखंडमानंदघनं गणेशं सुशांतयोगेश्वरमानतोऽस्मि ॥५४॥ समं सदा विष्णुमचिन्त्यभावमभेदभेदादिविवर्जितं च । सदा सुखानंदमयं गणेशं सुशांतयोगेश्वरमानतोऽस्मि ॥५५॥ अचिन्त्यरूपं सकलैर्विहीनं सदाशिवं मोहविहीनमाद्यम् । अपारवेशं स्वसुखावभासं सुशांतयोगेश्वरमानतोऽस्मि ॥५६॥ पदार्थरूपं विविधप्रभेदं विकारयुक्तं परमप्रमेयम् । बोधात्मकं त्वंपदरूपमेव सुशांतयोगेश्वरमानतोऽस्मि ॥५७॥ अखंडमेकात्मकविश्वरूपं विकारहीनं महदप्रमेयम् । गणेशमेकं हृदि तत्पदस्थं सुशांतयोगेश्वरमानतोऽस्मि ॥५८॥ गणेश चैवं विविधस्वरूपाः कलावतारा भवतो हि भव्याः । सुशांतमेकं भवदीयरूपं कथं विभाव्यं मनसा न लभ्यम् ॥५९॥ यदा च सर्वात्ममयं वदामि तदा तु सोऽहं प्रकृतिस्वरूपम् । गकाररूपं जगदीशभेदं गकारमेकं शरणं प्रपद्ये ॥६०॥ मनोवचोहीनमथो वदामि ह्ययोगसंयोगमयं णकारम् । निवृत्तिरूपं शरणं सदा वै नमामि तं सर्ववरिष्ठमाद्यम् ॥६१॥ न शक्यमेवं वक्तुमवक्तुमेवमतो भवन्तं प्रणमामि ढुंढे । गणेश विघ्नेश महानुभाव प्रसीद भो ब्रह्मपते महात्मन् ॥६२॥ जन्म धन्यं धन्यमक्षि विद्या ज्ञानं तपः फलम् । येन दृष्टो गणाधीशः कृतकृत्योऽस्मि सांप्रतम् ॥६३॥ मह्यं यदि वरो देयस्तदा भक्तिं दृढां त्वयि । देहि मे परमेशान यया मोहो विनश्यति ॥६४॥ सृष्टिसर्जनसामर्थ्यं भजतां कामपूरणम् । निर्विघ्नं सर्वकार्येषु देहि विघ्नविनाशन ॥६५॥ गणेशवचनं श्रुत्वा सुप्रसन्नो गजाननः । मेघगांभीर्यमाहत्य वचनं त्विदमब्रवीत् ॥६६॥ श्रीगणेश उवाच । भविता मे महाभक्तिः सृष्टीनां रचनास्तथा । नानाविधा भविष्यन्ति निर्विघ्नं सर्वदा भवेत् ॥६७॥ भवद्भ्यः सर्वदातृत्वं भविष्यति तथाऽनघ । महाकार्ये समुत्पन्ने दास्येऽहं दर्शनं च ते ॥६८॥ स्तोत्रं त्वया कृतं यच्च सर्वमान्यं भविष्यति । पठतां शृण्वतां चैव ब्रह्मभूतकरं

महत् ॥६९॥ स्तोत्रं ब्रह्मपतेः साक्षान्नाम्ना वै स्तुतिसारकम् । भविष्यति महाभाग सर्वसिद्धिकरं परम् ॥७०॥ सकामेभ्यो जनेभ्योऽपि कामदं चिंतितप्रदम् । निष्कामेभ्यः स्वभक्तेभ्यो मुक्तिदं प्रभविष्यति ॥७१॥ मम प्रीतिकरं पूर्णं सारं सर्वत्र भाषितम् । त्रिकालपठनादस्य साध्योऽहं नात्र संशयः ॥७२॥ श्रीशिव उवाच । इत्युक्त्वान्तर्हितः साक्षाद्गणेशो भक्तवत्सलः । देवस्यापि वियोगेन गुणेशो विमना ह्यभूत् ॥७३॥

॥ ओमिति श्रीमदान्त्ये पुराणोपनिषदि श्रीमन्मौद्गले महापुराणे प्रथम खण्डे वक्रतुण्डचरिते गुणेशवरप्रदानं नामाष्टमोऽध्यायः ॥८॥

॥ श्रीगणेशाय नमः । श्रीशिव उवाच । वरदानप्रभावेण गुणेशो ज्ञानवानभूत् । समर्थो भगवान् साक्षात् स्रष्टुं तत्र मनो दधे ॥१॥ तस्य निःश्वासतो वेदा निःसृता रूपधारिणः । सर्वज्ञानकराः साक्षाद्भास्वंतो गुरवः सताम् ॥२॥ पश्चात्तेन गुणेशेन सम-भूतात्मकं जगत् । सृष्टं सुषुप्तिसंज्ञं च महत्तत्त्वादिभिः समैः ॥३॥ आनंदव्यवहारत्वात् प्रधानमिति कथ्यते । कारण द्वंद्व-भावानां तेन कारणकं स्मृतम् ॥४॥ माया तमःकरी यस्मात्तेन तामसतां गतम् । समानव्यवहारं च प्रधानं मोहदं बभौ ॥५॥ स्वस्यापि जडभावश्च तेन न ज्ञायते सदा । किं कर्तव्यमकर्तव्यमिति तेन ततो महत् ॥६॥ तपः कृतं महोग्रं च दिव्यं वर्ष-सहस्रकम् । तेन प्रत्यक्षतां यातो गणेशो भक्तवत्सलः ॥७॥ स्तुतः प्रपूजितस्तेन कारणेन महायशाः । सामर्थ्यं योगरूपं च ददौ परमभावितः ॥८॥ वेदैश्चापि कृतं घोरं तपः परमदारुणम् । तेषां प्रत्यक्षतां यातो विघ्नेशो विघ्नवारणः ॥९॥ वेदैश्च संस्तुतो देवः स्तोत्रैः स्वस्वसमुद्भवैः । ब्राह्मणस्पत्यसूक्तेन बह्वृचः स्तुतवान् प्रभुम् ॥१०॥ गणेशशांतिकेनैव यजुस्तं स्तुत-वत्तथा । नामाष्टकार्थकृत्स्तोत्रं तेन साम्ना च संस्तुतः ॥११॥ अथर्वशीर्षकं नाम तेनैवाथर्वणास्तुतः । इत्यादि गाणपत्यैश्च स्तोत्रैर्नानाविधैः स्तुतः ॥१२॥ पूजितो मूलमंत्रेण संतुष्टस्तेन विघ्नहा । सर्वेषां गुरुरूपा वै भविष्यथ वरं ददौ ॥१३॥ सर्व-मान्या जगत्पूज्या वेदास्तेन कृतास्तदा । सांगोपांगसमाचारा गुरवस्ते मताः खलु ॥१४॥ पार्वत्युवाच । तमोगुणमयं स्वामिन्

प्रधानं समरूपकम्। वरं प्राप्य गणेशात्तु किं कृतं तेन तद्वद ॥१५॥ मुद्गल उवाच। प्रियोक्तं वचनं श्रुत्वा हृष्टरोमा महेश्वरः। तां प्रत्युवाच भगवान् स्मयन्निव सुशांतधीः ॥१६॥ श्रीशिव उवाच। श्रृणु प्रिये प्रवक्ष्यामि गणेशप्रीतिवर्धने। विभूतिं तस्य देवस्य त्वं वै भाग्यवती शिवे ॥१७॥ गणेशवरदानेन सृष्टं तेनापि सूक्ष्मकम्। हिरण्यगर्भमात्रं यं सात्त्विकं स्वप्नरूपकम् ॥१८॥ महदादिमहातत्त्वैः सूक्ष्मभूतैश्च संवृतम्। द्वंद्वविज्ञानमूलं तदंतरिक्षस्थितं बभौ ॥१९॥ बोधहीनेन तेनैव तपस्तप्तं सुदुष्करम्। तेन तुष्टो गणेशानो वांछितं प्रददौ वरम् ॥२०॥ वरदानप्रभावेण नानासामर्थ्यवानभूत्। हिरण्यगर्भो भगवान् स्वप्नमायाधरः प्रभुः ॥२१॥ तेन स्थूलस्वरूपं यत्सृष्टं राजससंज्ञकम्। जाग्रद्भोगकरं पूर्णं तत्त्वैश्च स्थूलरूपिभिः ॥२२॥ ज्ञानहीनेन तेनाथ तपस्तप्तं सुदारुणम्। तपसा चैव संतुष्टो गणेशः करुणानिधिः ॥२३॥ प्रत्यक्षतां ययौ तस्य जाग्रदन्नमयस्य च। तेनापि पूजितो देवः स्तुतस्तस्मै वरं ददौ ॥२४॥ वरदानप्रभावेण नानासामर्थ्यवानभूत्। ईश्वरोऽन्नमयश्चासावेकोऽनेकमकल्पयत् ॥२५॥ जाग्रत्स्वप्नसुषुप्त्याख्यत्र्यवस्थाप्रचुराणि च। भिन्नभिन्नानि जातानि कोटिशः कोटिशः खलु ॥२६॥ गणेशरोमकूपेभ्यो निःसृतानि महान्ति च। अंडानि भिन्नभिन्नानि सर्वतः संस्थितानि वै ॥२७॥ व्याप्यरूपाणि चांडानि व्यापकश्च गुणेश्वरः। तयोरभेदभाव सा प्रकृतिर्ब्रह्मबिंदुकम् ॥२८॥ जाग्रता सृष्टमाकाशं ब्रह्म सर्वप्रकाशम्। शब्दमात्रमयं भूतमादिरूपं सनातनम् ॥२९॥ आकाशेन च संसृष्टो वायुः स्पर्शगुणात्मवान्। वायुना रूपतन्मात्रं तेजः सृष्टं प्रकाशवत् ॥३०॥ तेजसा रससंयुक्ता आपः सृष्टाः प्रसारिणा। अद्भिर्गन्धगुणा पृथ्वी सृष्टा धारणधर्मिका ॥३१॥ तत्रैकैकप्रवेशेन पंचीकरणमागतः। पृथ्वी पंचगुणा जाता चतुर्भूतप्रवेशनात् ॥३२॥ आपश्चतुर्गुणा जातास्त्रयाणां संप्रवेशनात्। तेजस्त्रिगुणतां प्राप्तं भूतयोश्च प्रवेशनात् ॥३३॥ वायुर्द्विगुणवान् जात आकाशस्य प्रवेशनात्। आकाशमेकगुणभृद्भूतानां ब्रह्मसंज्ञितम् ॥३४॥ पंच भूतानि जातानि व्यवस्थासंयुतानि च। अष्टधा प्रकृतिः प्रोक्ता कोशरूपा सुशोभना ॥३५॥ तत्र कोशस्वरूपेण गुणेशो विविनो यतः। तत सामर्थ्यमाप्राप्ता प्रकृतिश्चाष्टरूपिणी ॥३६॥ अष्टावरणसंयुक्तमण्डं सृष्टं स्वभावतः। तत्रैव पुरुषो जज्ञे विराट् स भगवान् शिवे ॥३७॥ पंचाशत्कोटिविस्तारः पृथ्व्याः प्रोक्तो मया च ते। आपो दशाधिकास्तस्यास्तेजस्ताभ्यो दशाधिकम् ॥३८॥ तस्माद्दशाधिको वायुस्तस्मात्खं वै दशाधिकम्। तस्माद्दशाधिकं जाग्रदभिमानं प्रकथ्यते ॥३९॥ तस्माद्दशाधिकं स्वाप्नं महत्तत्त्वमिति स्मृतम्। द्वितीयं नाम तस्यापि

कथ्यते मुनिभिः सदा ॥४०॥ तस्माद्दशगुणा माया ज्ञेया सौषुप्तिकाऽधिका। गुणेशः पुरुषो ज्ञेयोऽनंतोऽपारश्चतुर्थकः ॥४१॥ विराडावरणं कृत्वा स्थिता पृथ्वी सनातना। अद्भिः समावृता पृथ्वी तेजसापः समावृताः ॥४२॥ वायुना चावृतं तेजः खेन वायुः समावृतः। अहंकारेण संवृत्तमाकाशं देवि सर्वतः ॥४३॥ अहंकारश्च महता संवृतो राजसः स्वयम्। मायया च महत्तत्त्वं संवृतं स्वप्नसंज्ञितम् ॥४४॥ मायावरणमान्त्यं च ज्ञातव्यं विबुधैः परम्। अष्टावरणसंयुक्तमण्डं ते कथितं मया ॥४५॥ अण्डान्येतादृशान्येवासंख्यातानि प्रिये बभुः। तिर्यगूर्ध्वमधस्तद्वद् गुणेशेन धृतानि च ॥४६॥

ओमिति श्रीमदान्त्ये पुराणोपनिषदि श्रीमन्मौद्गले महापुराणे प्रथमे खण्डे वक्रतुण्डचरिते अष्टधा प्रकृतिवर्णनं नाम नवमोऽध्यायः ॥

॥श्रीगणेशाय नमः॥ पार्वत्युवाच। श्रोतुमिच्छामि सर्वेश विराजश्च स्वरूपकम्। कीदृशोऽयं महाभाग तन्मे कथय शंकर ॥१॥ शिव उवाच। पंचकोटिप्रविस्तारे योजनानां समंततः। तस्य देहे च भूतानि स्थावराणि चराणि च ॥२॥ संस्थितानि च सर्वाणि भुवनानि चतुर्दश। तत्तेऽहं संप्रवक्ष्यामि समाहितमनाः शृणु ॥३॥ पादयोस्तस्य पातालं गुल्फे तस्य रसातलम्। पार्ष्णयोर्महातलं तस्य जंघयोश्च तलातलम् ॥४॥ सुतलं जानुभागेऽस्य वितलं तूरुमंडले। अतलं कटिसंधौ च कट्यां भूलोकसंस्थितिः ॥५॥ नाभौ तस्य भुवर्लोकः स्वर्लोकश्च हृदि स्थितः। महर्लोकश्च कंठे वै जनो लोको मुखे स्थितः ॥६॥ तपो लोको ललाटे च सत्यलोकः शिरःस्थितः। एतावद्देहरूपो वै विराट् स पुरुषो महान् ॥७॥ सहस्र-शीर्षशोभाढ्यः सहस्राननपादवान्। सहस्रहस्तकर्णः स सहस्रोदरवान् प्रभुः ॥८॥ सर्वत्र व्याप्यभावेन स्थितोऽसौ परमेश्वरः। मर्त्येष्वमृतभोक्ता च स्वप्रकाशेन वर्तते ॥९॥ तस्यांतरे स्थितं रूपं नाम्ना हैरण्यगर्भकम्। एतादृशं तथा स्वप्नं विश्वरूपं विराजति ॥१०॥ बहिर्वैश्वानरश्चायं जाग्रद्वैराटसंज्ञितः। हिरण्यगर्भकोशस्थः स्वप्नवैराटधारकः ॥११॥ उभयोः समभावेन बाह्यांतरसरूपतः। ईश्वरो नाम वैराटः सुषुप्तेर्धारको बभौ ॥१२॥ त्रिविधं यद्विराड् रूपं कथितं ते तु पार्वति।

तुरीयमात्मरूपं यत् त्रिविधेषु प्रवर्तते ॥१३॥ अथ शृणु विभिन्नानामुत्पत्तिं त्वल्पभावनाम् । नानाभावधरां तां वै चराचरमयीं पराम् ॥१४॥ विराडज्ञानभावनावृतस्तेन तपः कृतम् । एकाक्षरविधानेन गणेशं संदधौ हृदि ॥१५॥ सोऽतपत्तप उग्रं च दिव्यवर्षसहस्रकम् । तपसा ध्यानभावेन प्रत्यक्षो गणपोऽभवत् ॥१६॥ बोधयामास तं देवो वरं ब्रूहीति सोऽब्रवीत् । गणेशं सहसा दृष्ट्वा पादयोः प्रणनाम तम् ॥१७॥ धन्यं जन्म तपो मेऽद्य धन्यं ज्ञानं वपुश्च दृक् । धन्या मे संपदो देव त्वदंघ्रियुगदर्शनात् ॥१८॥ इत्युक्त्वा स्तोतुमारेभे गणेशं ब्रह्मनायकम् । वाचा संस्पष्टया हृष्टो भगवान् विश्वधारकः ॥१९॥ विराडुवाच । नमस्ते गणनाथाय गणानां पतये नमः । विघ्नेशाय परेशाय विघ्नहर्त्रे नमो नमः ॥२०॥ सिद्धिबुद्धिपते तुभ्यं नानासिद्धिप्रदायिने । नानाज्ञानप्रदात्रे च ब्रह्मणे ब्रह्मरूपिणे ॥२१॥ मनोवागतिभूताय योगिनां हृदि वासिने । नानावतारकर्त्रे च भक्तसंरक्षकाय ते ॥२२॥ नमो नमो महेशाय शिवाय शिवदायिने । सर्वत्र समभावाय विष्णवे प्रभविष्णवे ॥२३॥ तेजोराशिपते तुभ्यं भानवे ते नमो नमः । नानामायाप्रभेदात्मशक्तये शक्तिरूपिणे ॥२४॥ स्रष्ट्रे पात्रे च संहर्त्रे चराचरमयाय च । सर्वेभ्यो ज्ञानदात्रे च निर्मलाय नमो नमः ॥२५॥ सर्वेभ्यो भिन्नरूपाय मायाहीनाय ते नमः । मायिभ्यो मोहदात्रे च मायाधाराय ते नमः ॥२६॥ गुणान्तं न ययुर्यस्य नानाब्रह्माणि ते नमः । अतो मयि गणेशान कृपयाऽनुग्रहं कुरु ॥२७॥ इति स्तुत्वा गणेशानं मौनवानभवत्स्वयम् । वैराटः पुरुषस्तत्र कृतांजलिपुटः स्थितः ॥२८॥ भगवांस्तं गणेशान ऊचिवान् भक्तिभावितः । वरं वरय दास्यामि शंकां मा कुरु विश्वप ॥२९॥ इदं त्वया कृतं स्तोत्रं मम प्रीतिकरं भवेत । यः पठेद्भावपूर्वं तु सिद्धिस्तस्य भविष्यति ॥३०॥ यं यं चिन्तयते कामं तं तं दास्यामि वांछितम् । भुक्तिमुक्तिप्रदं भावि पठनाच्छ्रवणादपि ॥३१॥ इत्युक्तवन्तं गणनाथमाद्यं वैराटदेवः प्रणनाम तं वै । भावेन युक्तो वचनं जगाद हृष्टः स्वयं विघ्नहरं प्रभुं च ॥३२॥ वैराट उवाच । यदि तुष्टोऽसि देवेश यदि देयो वरो महान् । तव भक्तिं दृढां देहि यया मोहो विनश्यति ॥३३॥ अतुलं सर्जनं सृष्टेः पालनं हरणं तथा । करोमि त्वत्प्रसादेन भक्तेभ्यो भुक्तिमुक्तिद ॥३४॥ ऐश्वर्यमतुलं देहि गजानन महाप्रभो । यं यमिच्छामि तत्सर्वं सिध्यतु त्वत्प्रसादतः ॥३५॥ शिव उवाच । तथेति वचनं चोक्त्वा गणेशोऽन्तरधीयत । विराट् हर्षेण संयुक्तो गणेशं हृद्यभावयत् ॥३६॥ एवं देवि च सर्वत्र नानाण्डेषु स्थितैः परैः । वैराटैस्तैः कृतं पूर्णं गणेशतप उत्तमम् ॥३७॥ ते सर्वे महात्मानः स्वस्वकर्मणि संस्थिताः । निर्विघ्ना वरदानेन

भगवंतः सनातनाः ॥३८॥ अनंतानि प्रजानीहि ब्रह्माण्डानि न शक्यते । वक्तुं केनापि हेरंबं विना तानि यथायथम् ॥३९॥ सततं गणनाथोऽपि न संख्यातुं प्रवर्तते । गणना शब्दशास्त्रेषु यावती ह्यधिकं ततः ॥४०॥ अतः केनापि संख्यानं न कृतं वेदवादिना । अनंतानि महाण्डानि ज्ञातव्यानि जगन्मयि ॥४१॥ एवं प्रभावयुक्तोऽसौ हृदये मे प्रवर्तते । गणेशो ध्यानलोभी च भक्तेशो भक्तवत्सलः ॥४२॥

॥ ओमिति श्रीमदान्त्ये पुराणोपनिषदि श्रीमन्मौद्गले महापुराणे प्रथमे खण्डे वक्रतुण्डचरिते नानाब्रह्माण्डवर्णनं नाम दशमोऽध्यायः ॥



॥ श्रीगणेशाय नमः ॥ पार्वत्युवाच । भगवन् देवदेवेश कृपां कृत्वा वदस्व मे । वैराटेन कथं सृष्टं जगत्स्थावरजंगमम् ॥१॥ अन्यच्च ब्रूहि मे नाथ ध्यानमार्गं पुरातनम् । येन साक्षात्करिष्यामि गणेशं नाऽत्र संशयः ॥२॥ मुद्गल उवाच । इति पृष्टो महादेव्या महादेवः प्रहृष्टवान् । कथां परमपुण्यां च कथयामास तां शृणु ॥३॥ दक्ष उवाच । गणेशस्य कथां श्रुत्वा हर्षश्चेतसि जायते । कथयस्व महाभाग शिवेन कथितं तु यत् ॥४॥ मुद्गल उवाच । धन्योऽसि दक्ष लोकेषु येन सादरता च ते । गणेशेऽमृतधारायां कथायां नाऽत्र संशयः ॥५॥ प्रहृष्टां गिरिजां दृष्ट्वा शिवो वचनमब्रवीत् । धन्या धन्या महाभागे शृणु सादरमादितः ॥६॥ शिव उवाच । गणेशं मनसा ध्यात्वा वैराटः स्रष्टुमारभत् । तस्य नाभेः समुत्पन्नो ब्रह्मा लोकपितामहः ॥७॥ मुखाद्विष्णुर्जगत्पाता नेत्राच्चाऽहं हरोऽभवम् । सृष्टिस्थितिलयाधारास्त्रिरूपगुणधारकाः ॥८॥ वामांगाच्छक्तिरुत्पन्ना त्वं वै पार्वति मोहिनी । दक्षिणांगाद्रविः साक्षात्कर्माधारः समाभवत् ॥९॥ पंच देवाः समुत्पन्ना भिन्ना जाताः स्वभावतः । न विदुः किंचिदात्मानं वैराटं चापि शोभने ॥१०॥ अंधे तमसि सर्वत्र बभ्रमुर्बहुकालतः । न किंचित्प्रापुरायासात् स्थिताः परमदुःखिताः ॥११॥ किं कर्तव्यं क्व गन्तव्यमज्ञानेनावृता भृशम् । कस्माद्वयं समुत्पन्ना न जानीमो महाप्रभुम् ॥१२॥ अथ चिंतयतां तेषां बुद्धिर्जाता सुनिश्चिता । तपः कर्तुं समारब्धं यस्मै कस्मै नमोस्त्विति ॥१३॥ सर्वेषां मूलभूतं यद्याहशं

तादृशं खलु। स्वधीस्थं तत्समाचिंत्य तपस्तप्तं सुदारुणम् ॥१४॥ तपसा गणनाथस्तु प्रसन्नोऽन्तरमाश्रितः। तत्र दृष्टिः समुत्पन्ना तेषां वै भावितात्मनाम् ॥१५॥ हृदये बीजरूपं यत्स्फुरत्तद् दृष्टमद्भुतम्। एकाक्षरं महामंत्रं प्राप्य तं हर्षमाययुः ॥१६॥ तं मंत्रं जपमानैस्तैस्तदारभ्य जगन्मयि। तेन मंत्रप्रभावेण ज्ञानं प्राप्तं सुनिर्मलम् ॥१७॥ दिव्यवर्षसहस्रेण प्रत्यक्षः समजायत। गणेशो भक्तिभावेन पुरस्तेषां समुत्थितः ॥१८॥ अनंतकोटिसूर्यौजाः शुंडादंडविराजितः। चतुर्बाहुधरो लंबोदरः साक्षात् विभूषितः ॥१९॥ भूषणैरायुधैश्चैव सिद्धिबुद्धिसमन्वितः। भक्तानंदकरः श्रीमानाखुवाहो महाद्युतिः ॥२०॥ तं दृष्ट्वा भयभीतास्ते देवाः शंभुपुरोगमाः। किमिदं तेज आयाति प्रलयाग्निसमं महत् ॥२१॥ अस्मान् धक्ष्यति किं देवः विघ्नेश करुणानिधे। नव भक्ता वयं स्वामिन् कथं विघ्नेन भाविताः ॥२२॥ इति तेषां वचः श्रुत्वा त्वभवत्सौम्यरूपवान्। तं दृष्ट्वा हर्षिताः सर्वे प्रणेमुर्भावपूर्वकम् ॥२३॥ गणेशदर्शनेनैव स्फूर्तिः प्राप्ता महाद्भुता। तया सर्वे यथातथ्यं ज्ञातं तैः पंचभिः पुरः ॥२४॥ ततस्तं तुष्टुवुः सर्वे भक्तिनम्रात्मकंधराः। हृष्टरोमाण एवं ते स्रवदश्रुजलाविलाः ॥२५॥ पंचदेवा ऊचुः ॥ **नमस्ते विघ्नराजाय भक्तानां विघ्नहारिणे। विघ्नकर्त्रे ह्यभक्तानां गणेशाय नमो नमः ॥२६॥ हेरंबाय नमस्तुभ्यं ढुंढिराजाय ते नमः।** विनायकाय देवाय ब्रह्मणां नायकाय च ॥२७॥ लंबोदराय सिद्धेश गजाननधराय च। शूर्पकर्णाय गूढाय चतुर्हस्त नमोऽस्तु ते ॥२८॥ लंबोष्ठायैकदंताय सर्वेशाय गणाधिप। अनंतमहिमाधार धरणीधर ते नमः ॥२९॥ नमो मायामयायैव मायाहीनाय ते नमः। मोहदाय नमस्तुभ्यं मोहहंत्रे नमो नमः ॥३०॥ पंचभूतमयायैव पंचभूतधराय च। इंद्रियाणां चाधिपायेंद्रियज्ञानप्रकारिणे ॥३१॥ अध्यात्मनेऽधिभूतायाधिदैवाय च ते नमः। अन्नायान्नपते तुभ्यमन्नान्नाय नमो नमः ॥३२॥ प्राणाय प्राणनाथाय प्राणानां प्राणरूपिणे। चित्ताय चित्तहीनाय चित्तेभ्यश्चित्तदायिने ॥३३॥ विज्ञानाय च विज्ञानपतये द्वंद्वधारिणे। विज्ञानेभ्यः स्वविज्ञानदायिने ते नमो नमः ॥३४॥ आनंदाय नमस्तुभ्यमानंदपतये नमः। आनंदानंददात्रे च कारणाय नमो नमः ॥३५॥ चैतन्याय च यत्नाय चेतनाधारिणे नमः। चैतन्येभ्यः स्वचैतन्यदायिने नादरूपिणे ॥३६॥ बिंदुमात्राय बिंदूनां पतये प्राकृताय च। भेदाभेदमयायैव ज्योतीरूपाय ते नमः ॥३७॥ सोऽहंमात्राय शून्याय शून्याधाराय देहिने। शून्यानां शून्यरूपाय पुरुषाय नमो नमः ॥३८॥ ज्ञानाय बोधनाथाय बोधानां बोधकारिणे। मनोवाणीविहीनाय सर्वात्मक नमो नमः ॥३९॥ विदेहाय नमस्तुभ्यं विदेहाधारकाय च। विदेहानां विदेहाय सांख्यरूपाय

ते नमः ॥४०॥ नानाभेदधरायैव चैकानेकादिमूर्तये। असत्स्वानंदरूपाय शक्तिरूपाय ते नमः ॥४१॥ अमृताय सदाखंड-भेदाभेदविवर्जित। सदात्मरूपिणे सूर्यरूपाधाराय ते नमः ॥४२॥ सत्यासत्यविहीनाय समस्वानंदमूर्तये। आनंदानंद-कंदाय विष्णवे ते नमो नमः ॥४३॥ अव्यक्ताय परेशाय नेतिनेतिमयाय च। शिवाय शाश्वतायैव मोहहीनाय ते नमः ॥४४॥ संयोगेन च सर्वत्र समाधौ रूपधारिणे। स्वानंदाय नमस्तुभ्यं मौनभावप्रदायिने ॥४५॥ अयोगाय नमस्तुभ्यं निरालंबस्वरूपिणे। मायाहीनाय देवाय नमस्ते ह्यसमाधये ॥४६॥ शांतिदाय नमस्तुभ्यं पूर्णशांतिप्रदाय ते। योगानां पतये चैव योगरूपाय ते नमः ॥४७॥ गणेशाय परेशाय ह्यपारगुणकीर्तये। योगशांतिप्रदात्रे च महायोगाय ते नमः ॥४८॥ गुणांतं न ययुर्यस्य वेदाद्या वेदकारकाः। स कस्य स्तवनीयः स्याद्यथामति तथा स्तुतः ॥४९॥ तेन वै भगवान् साक्षाच्चिंता-मणिगजाननः। प्रसन्नो भवतु त्राताऽस्माकं त्वं परमा गतिः ॥५०॥ इत्येवमुक्त्वा देवेशास्तूष्णीं भूतास्तथा शिवे। गणेशोऽपि प्रसन्नात्मा हृष्टः सन् प्रत्युवाच तान् ॥५१॥ श्रीगणेश उवाच। पंचदेवा महाभागाः प्रसन्नो भवतां स्तवैः। तपसा च तथा भक्त्या वांछितं ब्रूत वै वरम् ॥५२॥ भवत्कृतमिदं स्तोत्रं परमाल्हादवर्धनम्। मम प्रीतिकरं भक्त्या सर्वदं प्रभविष्यति ॥५३॥ यः पठेद्भावपूर्वं स धर्मकामार्थमोक्षभाक्। पुत्रपौत्रयुतः श्रीमानंते स्वानंदमाप्नुयात् ॥५४॥ सप्तवारं पठेन्नित्यमेकविंशतिवासरम्। कारागृहगतो वाऽपि मुच्यते बंधनात् स्वयम् ॥५५॥ एककालं द्विकालं वा त्रिकाल-मपि यः पठेत्। स वै देवादिकैर्वन्द्यो भविष्यति न संशयः ॥५६॥ मारणोच्चाटनादिभ्य एकविंशतिवारतः। तावद्दिनानि पाठेन तस्य नैव भयं भवेत् ॥५७॥ धनधान्यादिकं सर्वमारोग्यं पशुवर्धनम्। यं यं चिंतयते कामं तं तं प्राप्नोति निश्चि-तम् ॥५८॥ शिव उवाच॥ गणेशवचनं श्रुत्वा हृष्टा विष्णवादयः सुराः। प्रणिपत्य गणाधीशं कृतांजलिपुटा जगुः ॥५९॥ पंचदेवा ऊचुः। सनाथा हि वयं जाताः सर्वे त्वय्यागते प्रभो। वरं देहि गणाधीश तव भक्तिं दृढां तथा ॥६०॥ तेन माया न बाधेत नरान् देवानपि प्रभो। किमस्माभिः प्रकर्तव्यं तदाज्ञापय सर्वदा ॥६१॥ सामर्थ्यं विविधं देहि भजतां कामपूरणम्। स्थानं सदानंदनाम देहि नाथ नमोऽस्तु ते ॥६२॥ गणेश उवाच॥ चतुर्मुख महाबाहो रजोगुणसमुद्भव। सृष्टिकर्ता भव त्वं वै ब्रह्मा नाम्ना महाद्युते ॥६३॥ सत्यलोकनिवासी तु हंसवाहनवान् भव। वेदादिज्ञानयुक्तश्च सर्वेषां त्वं पितामहः ॥६४॥ चतुर्भुजोऽसि देवेश त्वं वै सत्त्वसमुद्भवः। पालकः सर्वलोकानां विष्णुनामा भविष्यसि ॥६५॥ वैकुंठे वसतिस्ते स्यात्

वाहनं गरुडस्तव । नानावतारवांश्चापि भविष्यसि महाबलः ॥६६॥ पंचवक्त्र महातेजस्तमोगुणसमुद्भव । संहारकारको नित्यं हरनामा भविष्यसि ॥६७॥ कैलासे वसतिस्तेऽस्तु वाहनं वृषभस्तथा । तृतीयेन स्वनेत्रेण सर्वं भस्मीकरिष्यसि ॥६८॥ सहस्रकिरण त्वं वै सूर्यनामा भविष्यसि । कर्मणां चालकत्वात् षड्ऋतुधर्मप्रकाशकः ॥६९॥ त्रिगुणानामहंभावात्त्वं जातोऽसि प्रकाशकः । रथोऽश्वालंकृतश्चापि वाहनं ते भविष्यति ॥७०॥ सौरलोके निवासश्च ग्रहराजो भविष्यसि । वृष्टिमूलं त्वमेऽवासि तेजोराशिः प्रतापवान् ॥७१॥ चतुर्भुजे महाशक्ते त्वं जाताऽसि त्रिदेहतः । नानाविषयभोगार्थं सदेहा मोहकारिणी ॥७२॥ शक्तिनाम्नी महामाया भविष्यसि न संशयः । द्विधा मोहप्रदात्री त्वं भुक्तिमुक्तिभ्रमात्मिका ॥७३॥ सिंहवाहनगा नित्यं शक्तिलोकनिवासिनी । नानाभोगविमोहेन जगत्त्वं मोहयिष्यसि ॥७४॥ महाकार्ये समुत्पन्ने प्रत्यक्षोऽहं भवामि वै । मत्तुल्याः सर्वभावेन कृता देवा न संशयः ॥७५॥ आयुधं भूषणं श्रेष्ठं नानासामर्थ्यमद्भुतम् । संकल्पसिद्धतां चैव ददौ तेभ्यो गणाधिपः ॥७६॥ शिव उवाच । इति दत्त्वा वरान् देवो गणेशोऽन्तर्दधे स्वयम् । तेऽपि हृष्टा निजात्मानं कृतकृत्यं च मेनिरे ॥७७॥ भजतां भक्तिभावेन कामपूराः कृता वयम् । परमेश्वरतां प्राप्ताः प्रसादाद्गणपस्य च ॥७८॥

ओमिति श्रीमदांत्ये पुराणोपनिषदि श्रीमन्मौद्गले महापुराणे प्रथमे खंडे वक्रतुंडचरिते पंचदेववरप्रदानं नामैकादशोऽध्यायः ॥

॥ श्रीगणेशाय नमः ॥ शौनक उवाच । सूत सूत महाप्राज्ञ परमानंददायक । कथामसृतरूपां च कथयस्व महामुने ॥१॥ वयं प्रसन्नतां याताः कृतकृत्या यथा तथा । सुकथामृतपानेन स्वानंदेन परिप्लुताः ॥२॥ कथयस्व कथां दिव्यां पंचदेवैश्च किं कृतम् । विस्तारेण यथान्यायं येन मुक्ता भवाम च ॥३॥ श्रुत्वा तेषां मुनीनां च वचनं भक्तिभावितम् । हृष्टः सूतः पुनः प्राह कथां पापप्रणाशिनीम ॥४॥ सूत उवाच । एवमेव स दक्षेण पृष्टो योगीश्वरो महान् । मुद्गलस्तं यथोवाच तथा वच्मि महामुने ॥५॥ मुद्गल उवाच । शृणु दक्ष महाभाग पार्वत्या शिवसन्निधौ । यत्पृष्टं यदुक्तं सर्वं कथयामि सविस्तरम् ॥६॥

पार्वत्युवाच । भगवन् देवदेवेश तारिताऽहं त्वया प्रभो । सुकथामृतपानेन कृतकृत्याऽस्मि सांप्रतम् ॥७॥ पंच देवाः समर्थाश्च प्राभवन् वरदानतः । किं चक्रुस्ते महात्मानः कथयस्व विधानतः ॥८॥ गणेशभक्तियुक्तं चेच्चरितं कथयस्व मे । अथवा गाणपत्यानां चरितं ब्रह्मदायकम् ॥९॥ व्यर्थसंलपनेनायुर्नाशः कार्यो न शोभनैः । धन्यास्ते साधवो लोका गणराड्भक्ति-भाविताः ॥१०॥ मुद्गल उवाच । प्रियाया वचनं श्रुत्वाऽतिहृष्टः स महेश्वरः । उवाच स्मयमानश्चालिंग्य देवीं महायशाः ॥११॥ शिव उवाच । धन्याऽसि पार्वति त्वं च सार्थकं जन्म ते परम् । भक्त्या धृतो गणेशोऽयं हृदि तेन वरानने ॥१२॥ गणेशभक्ति-युक्ता ये नरास्ते ब्रह्मरूपिणः । दर्शनान्मुक्तिदातारः सर्वेभ्यो नात्र संशयः ॥१३॥ गणेशं यः परित्यज्य सिद्धिमिच्छति शाश्वतीम् । स मूढात्मा तु विज्ञेयो नारकी नात्र संशयः ॥१४॥ अन्यदेवस्य ये भक्ता गणेशं नार्चयंति चेत् । तेषां न भविता सिद्धिर्नरकेषु पतंति ते ॥१५॥ सुधां संत्यज्य रूक्षान्नं सेवते दुर्मतिर्यथा । गणेशानं तथा त्यक्त्वाऽन्यस्य देवस्य सेवकः ॥१६॥ अस्माकं जनको माता सर्वेषां नात्र संशयः । ज्येष्ठराज इति ख्यातस्तेनादौ पूज्यकोऽभवत् ॥१७॥ त्यक्त्वा गणेशं मूढात्मा देवादीनपि पूजयेत् । गणेशोल्लंघनात्तं वै क्षिपामो नरके वयम् ॥१८॥ गणेशनिंदको जंतुरस्माकं भक्तिकारकः । नारकी भविता सद्योस्मद्गुरुद्वेषकारकः ॥१९॥ अतस्त्वं धन्यरूपाऽसि सर्वेषां मूलबीजकम् । भजसि त्वं गणेशानं भक्तिभावसमन्विता ॥२०॥ सत्यं देवि त्वया प्रोक्तं गाणेशानां प्रकीर्तनम् । गणेशस्य च वा कार्ये तेन जन्म कृतार्थकम् ॥२१॥ गणेशं प्रार्थयामीति शृणु चिंतामणे प्रभो । चित्ते निवासकारिन् वै गजानन महोदर ॥२२॥ गाणपत्या महाभागास्तेषां संगः सदास्तु मे । तेषां मध्ये तथा वासं देहि त्वं द्विरदानन ॥२३॥ अग्रे मे गाणपत्यास्ते पृष्ठे वामे च दक्षिणे । सर्वत्र सह तैर्वासो गाणपत्यैर्भवत्विति ॥२४॥ येषां मुखारविंदेषु गणेशचरितं बभौ । भवबंधहरं पूर्णमिहा-ऽमुत्र सुखप्रदम् ॥२५॥ चरितं गाणपत्यानां गणराट्सेवनात्मकम् । अहर्निशं प्रभवति चेष्टदं ढुंढिभक्तिदम् ॥२६॥ तारितोऽहं त्वया देवि कथां पृच्छसि मां पुनः । गणेशभक्तिपूतां वा भक्तानां तस्य भावतः ॥२७॥ प्रष्टुः श्रोतुश्च वक्तुर्या ब्रह्म-भूयपदप्रदा । इह तां तु वदामि त्वां गाणेशीं सुखदायिनीम् ॥२८॥ पंचदेवास्तथा जाता यथा गणपतिः स्वयम् । वरदः कथयामास ईश्वराज्ञानभाविताः ॥२९॥ पंचलोकाः समुद्भूता वरदानप्रभावतः । निराधारा अखंडाश्चावसंस्तेषु विभागशः ॥३०॥ कैलासे शंकरश्चैव वैकुंठे विष्णुरेव च । सौरलोके रविः शक्तिलोके चैव जगन्मयि ॥३१॥ सत्यलोके

तथा ब्रह्मा वसति स्म मुदान्वितः। ऐश्वर्यभोगभोक्तारः परस्परहिते रताः ॥३२॥ सत्यसंकल्पवंतस्त ईश्वरा ब्रह्ममानिनः। बहुकालेन तेषां वै मत्सरः समजायत ॥३३॥ अहं श्रेष्ठतमश्चैव सर्वेषां प्रभुरीश्वरः। हृदये मन्यमानास्ते विवादं चक्रुरंजसा ॥३४॥ आपश्च तत्र संसृष्टा विष्णुना स्वशरीरतः। तासु संसुप्तवान् देवो बहुकालं यथासुखम् ॥३५॥ जले शैवालवल्ली च समुत्पन्ना क्रमेण वै। बहुकालेन तन्मध्ये पृथ्वी जाता स्वभावतः ॥३६॥ लीलार्थे विष्णुना सृष्टं नाभ्यां कमलमुज्ज्वलम्। शतयोजनविस्तारं कर्णिकापत्रशोभिनम् ॥३७॥ सुवासबहुलं वीक्ष्य तेन रेमे जनार्दनः। एककाले जगाम स्म तत्र ब्रह्मा पितामहः ॥३८॥ कमलं तेन संदृष्टं विस्मितो हृदये भृशम्। केन सृष्टमिदं दिव्यं पद्मं परमशोभनम् ॥३९॥ तत्र नारायणं दृष्ट्वा प्रसुप्तं स महार्णवे। प्रभुमुत्थापयामास ब्रह्मा तं स्नेहभावनः ॥४०॥ ब्रह्मणो वचनेनैव समुत्तस्थौ जनार्दनः। ब्रह्माणं मानयामास स्वागतं भो पितामह ॥४१॥ तत्र ब्रह्मा महाविष्णुं प्रत्युवाच समत्सरः। किं मोहार्थं त्वया सृष्टं पद्मं परमशोभनम् ॥४२॥ अहं ब्रह्मा जगत्स्रष्टा सर्वादिः सर्वभावनः। मया प्रक्रियते सृष्टिः पश्चात्त्वं पालयिष्यसि ॥४३॥ सृजामि यदि नो तां चेत्किं पासि त्वं जनार्दन। मदधीनश्च सर्वेषां भावस्तेनाहमीश्वरः ॥४४॥ ब्रह्मणो वचनं श्रुत्वा विस्मितः स जनार्दनः। उवाच मधुरं वाक्यं ब्रह्माणं सांत्वयन्निव ॥४५॥ विष्णुरुवाच। सृष्टवान् कमलं नाहं मोहितुं त्वां पितामह। लीलार्थं पद्ममेवेदं पश्य त्वं नात्र संशयः ॥४६॥ समत्सरमिदं वाक्यं त्वयोक्तं यत् पितामह। अहं त्वां पालयामीदं तेन स्रष्टा भवान् किल ॥४७॥ नान्यो पातास्ति मत्तस्ते सर्वेषां पातृभावनः। अहं स्थितो महाविष्णुर्मत्समो नैव विद्यते ॥४८॥

॥ ओमिति श्रीमदांत्ये पुराणोपनिषदि श्रीमन्मौद्गले महापुराणे प्रथमे खंडे वक्रतुण्डचरिते ब्रह्मविष्णुविवादो नाम द्वादशोऽध्यायः ॥

।। श्रीगणेशाय नमः ।। शिव उवाच ।। शृणु देवि कथां पुण्यां गणेशप्रीतिवर्धिनीम्। यज्ज्ञातमादिकाले वै तत्तेऽहं कथयामि च ।।१।। विष्णोर्वचनमाकर्ण्य गर्वयुक्तं प्रभावतः। भगवांस्तमुवाचेदं वेदकर्ता पितामहः ।।२।। ब्रह्मोवाच ।। विष्णो त्वं यदि मां पाता सर्वेशश्च महान् प्रभुः। पश्योदरगतो भूत्वा प्रभावं मे जगद्गुरो ।।३।। ब्रह्मणो गिरमाकर्ण्य प्रविष्टोऽसौ जनार्दनः। योगमायाबलेनैव योगीशो जठरे विधेः ।।४।। ब्रह्मांडरचनां तत्र दृष्ट्वा नानाविधां पराम्। नाभिपद्मयुतं विष्णुं ददर्श पुरुषोत्तमः ।।५।। विस्मितो हृदि मोहेन किमद्भुतमिदं महत्। पश्यन्नांतं जगामाऽसौ निःसृतो देहमध्यतः ।।६।। निःसृतः प्रणिपत्याऽऽदौ तं विधिं त्ववदत्प्रभुः। ब्रह्मन्नांतं प्रजानामि त्वदीयं वै न संशयः ।।७।। त्वदीयजठरेऽहं वै स्थितस्तेन भवान् गुरुः। सर्वेशो नात्र संदेहः स्रष्टा त्वं स्वप्रभावतः ।।८।। त्वमेव भगवन् पश्य मदीये जठरे परम्। प्रभावं पूर्णभावेन मदीयं कीदृशं प्रभो ।।९।। नारायणवचः श्रुत्वा ब्रह्मा विस्मितमानसः। योगस्यैव प्रभावेण गतस्तत्र यथारुचि ।।१०।। विष्णोश्च जठरे ब्रह्मा ब्रह्मांडं लोकसंकुलम्। ब्रह्माणमपरं तत्र स्थितं पश्यन् विमोहितः ।।११।। ब्रह्मा नान्तं जगामाऽसौ पश्यन् पश्यन् महात्मनः। बहिर्गंतुं मनश्चक्रे विष्णुना मार्ग आवृतः ।।१२।। द्वाराणि योगभावेन पिहितानि स्वमायया। भ्रमन् भ्रमन् स्वयं ब्रह्मा प्राप नो मार्गमुत्तमम् ।।१३।। तत्र योगबलेनाऽपि ब्रह्मा वै पद्मनालतः। निर्भिद्य सहसा द्वारं ययौ तेन बहिर्विधिः ।।१४।। बहिरागत्य विष्णुं तं क्रोधेन स जगाद ह। वशमानीय मां किं त्वं स्वच्छंदो भवसि प्रभो ।।१५।। अहं स्वेन प्रभावेण निःसृतो योगमायया। द्वाराणि पिहितान्येव किमर्थं वद माधव ।।१६।। वचनं प्राह देवस्य श्रुत्वा विष्णुर्महायशाः। प्रहस्य तमुवाचेत्थं स्नेहयुक्तं समाहितः ।।१७।। विष्णुरुवाच। वशीकर्तुं विधे त्वाहमिच्छामि न जगद्गुरो। द्वाराणि पिहितान्येव मया क्रीडार्थमादरात् ।।१८।। परस्परं तु लीलार्थं कृतं यत्प्रपितामह। प्रभावं ज्ञातुकामस्य त्वपराधं क्षमस्व मे ।।१९।। इति प्रसादितो ब्रह्मा प्रसन्नः प्राह तं पुनः। क्रीडार्थं यत्त्वया विष्णो कृतं ज्ञातं न वै मया ।।२०।। अहं क्रोधसमायुक्तः संजातोऽज्ञानतः प्रभो। अप्रियं भाषणं विष्णो यत् क्षमस्व कृतं मया ।।२१।। तवांतं नैव जानामि जठरेऽहं समास्थितः। त्वं श्रेष्ठो मे गुरुः साक्षान्नात्र संशयवान् हरे ।।२२।। भवानहमतः प्राज्ञौ श्रेष्ठौ सर्वेश्वरौ परौ। शंभुः शक्तिश्च सूर्यश्च गर्वयुक्ता बभूविरे ।।२३।। तेषां प्रमाणं तज्ज्ञेयमिति सस्मरतुः प्रभू। तयोः स्मरणमात्रेण संययुस्तत्र ते त्रयः ।।२४।। प्रथमं प्राप्तवांस्तत्र शंकरः शूलधृक् प्रभुः। उक्तवांस्तौ

किमर्थं मे स्मरणं वदनं कृतम् ॥२५॥ तत्रोचतुर्हरिर्ब्रह्मा शृणु शंकर मे वचः। तवैश्वर्यं कियन्मात्रं दर्शयस्व सदाशिव ॥२६॥ तयोर्वचनमाकर्ण्य गर्वयुक्तः सदाशिवः। उवाच क्रोधसंयुक्तो वचनं विस्मयन्निव ॥२७॥ शिव उवाच। अहं हर्ता च सर्वेषां युवयोर्नात्र संशयः। मत्तः परं न किंचिद्वै ज्ञातव्यं सर्वभावतः ॥२८॥ इत्युक्त्वा स स्वयं शंभुर्दर्शयामास तौ वपुः। ज्योतीरूपं महालिंगं परं सर्वत्र संस्थितम् ॥२९॥ तत्तौ दृष्ट्वा महाश्चर्यं विस्मितौ विधिमाधवौ। अध ऊर्ध्वं पुरः पश्चाद्वामदक्षिणसंततम् ॥३०॥ तत्र ब्रह्मा स्वयं विष्णुमुवाच मधुरं वचः। अधस्त्वं गच्छ देवेश ऊर्ध्वं गच्छामि भावतः ॥३१॥ शिवस्यांतं प्रपश्यावः कीदृशोऽयं महेश्वरः। अतस्त्वं त्वरितो भूत्वा कुरु शीघ्रमिदं वचः ॥३२॥ इत्युक्तो ब्रह्मणा विष्णुस्तं प्रत्यूचे प्रभावतः। ब्रह्मन्मह्यं वरं देहि पश्चाद्गंतुं समुत्सहे ॥३३॥ भ्रांतो ब्रह्माऽभवत्तत्र वरं ब्रूहीति सोऽब्रवीत्। दास्यामि नात्र संदेहः प्रीतस्त्वं वरयाशु च ॥३४॥ विष्णुरुवाच। त्वं मे पुत्रो भव ब्रह्मन्नेष एव वरो मतः। तस्य तद्वचनं श्रुत्वा विस्मितो विधिरब्रवीत् ॥३५॥ वंचितोऽहं त्वया नूनं संभ्रमेऽस्मिन् समुत्थिते। दत्तो वरो यतस्तेन तव पुत्रो भवाम्यहम् ॥३६॥ सृष्टिकाले च संप्राप्ते त्वन्नाभिकमलात् स्वयम्। देहं सृजामि योगेन पद्मजोऽहं तवात्मजः ॥३७॥ इत्युक्तः स हरिस्तत्र तं प्रणम्य तथेति च। प्रविष्टोधः शिवस्यापि द्रष्टुं पारं महात्मनः ॥३८॥ ब्रह्माऽपि त्वरितो भूत्वोर्ध्वं ययौ पारलिप्सया। न तत्र पारमीशस्य प्राप्तवान् स पितामहः ॥३९॥ विष्णुश्च शंकरस्याधो न पारं दृष्टवान् ततः। बहुकालेन तौ तत्राऽऽगतौ तौ खिन्नमानसौ ॥४०॥ परस्परविचारेण शंकरं स्तोतुमुद्यतौ। बद्धांजलिपुटावेतौ स्तोत्रं चक्रतुरुत्तमम् ॥४१॥ ब्रह्मविष्णू ऊचतुः। नमस्ते शंकरायैव नमस्ते शूलपाणये। रुद्राय कालरूपाय त्र्यंबकाय नमो नमः ॥४२॥ उमापते नमस्तुभ्यं वृषभेश्वरवाहन। आदिदेवाय देवाय महादेवाय ते नमः ॥४३॥ प्रसीद भगवन् शंभो नांतं पश्यावहे विभो। किंरूपं किंस्वभावं त्वां न जानीवः कथंचन ॥४४॥ दर्शय स्वात्मरूपं भो महेश्वर नमोऽस्तु ते। येन ते भजनं देव जनाः कुर्वंति निर्भयाः ॥४५॥ तयोर्वचनमाकर्ण्य शंभुः प्राकट्यमास्थितः। ततस्तं तौ ददृशतुर्हरिश्च भगवान् विधिः ॥४६॥ वामभागे स्थितं विष्णुं दक्षिणांगे पितामहम्। विश्वं चराचरं सर्वं लिंगे तत्रास्य संस्थितम् ॥४७॥ अपारमहिमानं तं दृष्ट्वा तेमतुर्गद्गदात्। उपसंहर रूपं तत्त्वमेव परमेश्वरः ॥४८॥ तयोर्वचनमाकर्ण्य हृष्टः सन् शंकरः प्रभुः। भगवान् पूर्वरूपेण संतस्थौ वृषभध्वजः ॥४९॥ उवाच तौ महादेवो वृणुतं वरमीप्सितम्। दास्यामि भवतोर्भावात् स्तोत्र-

संतुष्टमानसः ॥५०॥ य एतत्पठति स्तोत्रं स कामान् लभतेऽखिलान्। मत्प्रियः सोऽपि भवति मल्लोकेंऽते प्रगच्छति ॥५१॥

॥ ओमिति श्रीमदान्त्ये पुराणोपनिषदि श्रीमन्मौद्गले महापुराणे प्रथमे खण्डे वक्रतुंडचरिते पंचदेवविवादो नाम त्रयोदशोऽध्यायः ॥

॥ श्रीगणेशाय नमः ॥ शिव उवाच। शृणु देवि प्रवक्ष्यामि यज्जातं चाद्भुतं ततः। गणेशमायामोहेन मोहितानां चरित्रकम् ॥१॥ शिवस्य वचनं श्रुत्वा विष्णुर्ब्रह्माणमब्रवीत्। वरं वृणु विरिंच त्वां शिवात्पुत्रो भवेति मे ॥२॥ तव पुत्रः शिवो जातस्तेन मे पौत्रतां गतः। उभयोः सफलं पूर्णं वांछितं जातमद्भुतम् ॥३॥ विष्णोर्वचनमाकर्ण्य विधिः शंकरमब्रवीत्। मम पुत्रो भव त्वं वै वर एष वृतो मया ॥४॥ विष्णुनाऽपि तदेवोक्तं तथा वै शंकरोऽब्रवीत्। तव भालाद्भविष्यामि रुद्रोऽहं त्वंशतो विधे ॥५॥ शिवस्य वचनं श्रुत्वा संतुष्टौ विधिमाधवौ। ऊचतुः शंकरं तत्र स्नेहात्तं भावपूर्वकम् ॥६॥ विधिवच्छिव पश्य त्वमैश्वर्यं चावयोः पृथक्। तेन तुष्टौ महादेव भविष्यावो न संशयः ॥७॥ तयोर्यदैश्वरं भावं शिवोपि ज्ञान-चक्षुषा। दृष्ट्वा नांतं जगामाऽसौ तौ पुनः प्रत्युवाच ह ॥८॥ भवतोर्महिमानं चापारं पश्यामि शाश्वतम्। वयं त्रयः समा-ख्याता ईश्वराः सर्वतः पराः ॥९॥ एतस्मिन्नंतरे तत्राऽजगाम स दिवाकरः। तेजोराशिः सदात्मा च पृच्छति स्म समाहितः ॥१०॥ किमर्थं स्मरणं देवा मदीयं कृतमादरात्। तन्मे कथयताद्य त्वागतोऽहं स्नेहतः परम् ॥११॥ भानोर्वचनमाकर्ण्य प्रहृष्टास्ते त्रयो भृशम्। ऊचुः प्रसन्नभावेनैश्वर्यं ते दर्शय प्रभो ॥१२॥ तेषां श्रुत्वा गिरं सौम्यां दर्शयामास रूपकम्। तेजोमयमपारं यच्चराचरमयं महत् ॥१३॥ सूर्यस्य तेजसा सर्वे निष्प्रभास्ते त्रयः कृताः। प्रणष्टदृष्टयो जाता न शेकुर्द्रष्टुमंजसा ॥१४॥ ज्ञानदृष्ट्या च तं दृष्ट्वा चराचरतनुं प्रभुम्। अपाररूपं भास्वंतं नतास्तं स्नेहभावतः ॥१५॥ दर्शयित्वा तथात्मानं सौम्यरूपोर्यमाऽभवत्। तमूचुस्ते त्रयो देवा नांतं ददृशिम प्रभो ॥१६॥ अस्माकमपि पश्य त्वमैश्वर्यं स्नेहभावतः। तेषां तद्वचनं श्रुत्वा रविर्हृष्टो बभूव ह ॥१७॥ ज्ञानदृष्ट्या रविस्तेषामैश्वर्यं दृष्टवान् परम्। उवाच प्रणतो भूत्वा विस्मितश्चेतसा भृशम् ॥१८॥ भवंतोऽपि महात्मानो नांतं पश्यामि सर्वतः। युष्माकमैश्वरं भावमद्भुतं

दृष्टवानहम् ॥१९॥ वयं सर्वेश्वराः सर्वे भगवंतः सनातनाः। न्यूनाधिकं कलामात्रं विद्यते नैव निश्चितम् ॥२०॥ तस्मिन् क्षणे स्वयं शक्तिरागता मोहिनी परा। उवाच तान् प्रसन्ना मे किमर्थं स्मरणं कृतम् ॥२१॥ तामूचुस्ते च चत्वारो देवाः स्नेहेन भाविताः। दर्शयस्व महादेवि ऐश्वर्यं कीदृशं तव ॥२२॥ इत्युक्ता सा स्वरूपं तद्दर्शयामास सुंदरम्। चराचरमयं पूर्णं स्थूलसूक्ष्मादिभिर्युतम् ॥२३॥ दृष्ट्वा रूपं तदीयं वै भ्रांतास्ते शरणं ययुः। नांतं ददृशिमायं ते रूपस्य महतः किल ॥२४॥ सौम्यरूपा तदा जाता तामूचुः पश्य भावतः। अस्माकं देवि चैश्वर्यं कीदृशा वयमेव च ॥२५॥ तेषां वचनमाकर्ण्य ज्ञानदृष्ट्या स्म पश्यति। नांतं जगाम तेषां वै तता सा तान्विशेषतः ॥२६॥ उवाच स्नेहभावेन नांतं पश्यामि कुत्रचित्। भवंतोऽपि महात्मान ईश्वराः पूर्णभावतः ॥२७॥ वयं पंच समा नाथा नांतरं दृश्यते क्वचित्। कः समर्थो भवेद्देवो निश्चयो नैव दृश्यते ॥२८॥ गणेशमायया भ्रांता अवदंस्ते परस्परम्। प्रभुरेकश्च सर्वत्र वेदे वै पठ्यते बुधैः ॥२९॥ प्रभवः पंच कुत्रापि नोक्ताः शास्त्रेषु संमताः। अतः कोऽपि प्रभुर्भाव्यः स च वै कुत्र वर्तते ॥३०॥ एवं विवादे संप्राप्ते विस्मृतं ज्ञानमाद्यकम्। गाणेशं चित्तचांचल्यादूर्ध्वं जग्मुः प्रभावतः ॥३१॥ न किंचिद्ददृशुस्तत्राधो भागे प्रययुस्ततः। एवं दश दिशो भ्रांताः पश्यंतस्ते परस्परम् ॥३२॥ न किंचिद्ददृशुस्तत्र स्थिता एकत्र ते पुनः। योगमार्गेण चित्ते स्व ध्यानं चक्रुः क्रमेण च ॥३३॥ ब्रह्माऽभेदस्वरूपं ते रेमिरे योगभावतः। एकीभूता इवात्मानः शांतिं प्राप्ताः स्वभावतः ॥३४॥ ततस्तान् दर्शयामास योगिध्येयमनुत्तमम्। स्वरूपं गणराजस्तु हृदये संस्थितं परम् ॥३५॥ चतुर्भुजं त्रिनेत्रं तच्छुंडादंडविराजितम्। एकदंतं शूर्पकर्णं वक्रतुंडं महोदरम् ॥३६॥ रक्तवर्णं महाकायं सिंदूरालिप्तमेव च। नाभिशेषं किरीटादिनानाभूषणशोभितम् ॥३७॥ सिद्धिबुद्धियुतं पूर्णं विभूतिभिरुपासितम्। चिंतामणिं मणिं चैव दधत्तु हृदये शुभम् ॥३८॥ प्रसन्नवदनं भक्तानुग्रहाणां प्रकारकम्। हृदि दृष्टाऽभवंस्तत्र विस्मितास्ते सुराः प्रिये ॥३९॥ तमादौ शंकरस्यैव हृदि प्रकटतां गतः। तं पप्रच्छ स्वयं शंभुः को भवान् वद मे प्रभो ॥४०॥ शांतियोगेन संप्राप्तः किं तु ब्रह्मपतिः परः। कथयस्व महाभाग त्वां न जानामि तत्त्वतः ॥४१॥

॥ ॐमिति श्रीमदान्त्ये पुराणोपनिषदि श्रीमन्मौद्गले महापुराणे प्रथमे खण्डे वक्रतुंडचरिते गणेशप्रादुर्भावो नाम चतुर्दशोऽध्यायः ॥

॥ श्रीगणेशाय नमः ॥ सूत उवाच । शिवस्य वचनं श्रुत्वा भक्तिभावेन तोषितः । उवाच मधुरं वाक्यं विघ्नेशास्तं प्रहर्षयन् ॥१॥ वक्रतुंड उवाच ॥ शृणु शंभो महाभाग मम मायाविमोहित । गणेशोऽहं पुनर्दृष्टस्तपसा भावितात्मना ॥२॥ यः पुरा भवतो देव वरदाताऽभवं परः । उग्रेण तपसा तुष्टोऽकरवं ज्ञानसंयुतम् ॥३॥ ममैषा सततं माया प्रमोहयति मानवान् । तेन विस्मरणं प्राप्तं तवाऽपि न च संशयः ॥४॥ एवमुक्त्वा शिवं मायामोहजालं निराकरोत् । सर्वं च स्मरणं तेन पुनः प्राप्तं शिवस्य च ॥५॥ सर्वं स्मृत्वा शिवस्तत्र स्तोतुं समुपचक्रमे । तावदंतर्हितं जातं रूपं गणपतेः शुभम् ॥६॥ पुनर्ध्यानेन शंभुः स तमेवाचिंतयन् स्थितः । नापश्यद् हृदि तद्रूपं तेनाकुल इवाऽभवत् ॥७॥ आययौ विष्णुरभ्याशे सर्वं त्वकथयच्छिवम् । अदृष्टं तादृशं रूपं कथयामास सोऽपि तम् ॥८॥ एवं पंचाप्यदृष्ट्वा तत् विस्मिता अभवन् परम् । एकत्र मिलिता जातास्तुष्टुवुस्तं गतस्मयाः ॥९॥ पंच देवा ऊचुः । नमस्ते वक्रतुंडाय त्रिनेत्रं दधते नमः । चतुर्भुजाय देवाय पाशांकुशधराय च ॥१०॥ लंबोदर नमस्तुभ्यं नाभिशेषाय ते नमः । महते चैकदंताय शूर्पकर्णाय ते नमः ॥११॥ सिंदूरारुणदेहाय रक्तवर्णधराय च । महाकायाय सूक्ष्माय गणेशाय नमो नमः ॥१२॥ सिद्धिबुद्धियुतायैव विभूतिसहिताय च । चिंतामणिधरायैव तथा चिंतामणे नमः ॥१३॥ अव्यक्ताय परेशाय परेषां च पराय ते । मनोवाणीविहीनाय विघ्नेशाय नमो नमः ॥१४॥ नानामायाधरायैव मायिनां मोहकारिणे । हेरंबाय नमस्तुभ्यं ब्रह्मणां पतये नमः ॥१५॥ दर्शयस्व निजं रूपं भक्तेभ्यः प्रीतिदायकम् । सनाथा हि वयं तेन सर्वनाथाय ते नमः ॥१६॥ स्तुवतां तु पुरः प्रादुरासीद्देवो गजाननः । तं दृष्ट्वा दंडवत् सर्वे प्रणता भक्तिभावतः ॥१७॥ तानुत्थाप्य स्वयं ढुंढिर्वचनं चेदमब्रवीत् । स्तोत्रेण भावितो देवाः प्रीतो वो नात्र संशयः ॥१८॥ यः पठेत् स्तोत्रमेतद्वै स मे मान्यो भवेत् सुराः । वांछितं पूरयिष्याम्यंते मे सायुज्यमाप्नुयात् ॥१९॥ शृणुध्वं मे वचो रम्यं मा गर्वं कुरुत प्रियाः । भवंतो मदधीनाश्च कलांशा नात्र संशयः ॥२०॥ क्रीडार्थं निर्मिताः सर्वे स्पर्धमानाः परस्परम् । किमर्थं मनसि भ्रांता जाताः पूर्णात्मका अपि ॥२१॥ श्राव्यं ज्ञानं रहस्यं यन् मदीयं तेन भाविताः । सदा मोहविनिर्मुक्ता भवितारश्च मत्समाः ॥२२॥

॥ ओमिति श्रीमदान्त्ये पुराणोपनिषदि श्रीमन्मौद्गले महापुराणे प्रथमे खण्डे वक्रतुंडचरिते गणेशप्रसन्नभावो नाम पंचदशोऽध्यायः ॥



॥ श्रीगणेशाय नमः ॥ शिव उवाच। गणेशवचनं श्रुत्वा प्रणता भक्तिभावतः। पप्रच्छुस्तं पुनः शांता ज्ञानं ब्रूहि गजानन ॥१॥ गणेश उवाच। देहश्चतुर्विधः प्रोक्तस्त्वं पदं ब्रह्मभेदनः। सोऽहं देही चतुर्धा तत्पदं ब्रह्म सदैक्यतः ॥२॥ संयोग उभयोर्यश्चाऽसि पदं ब्रह्म कथ्यते। स्वत उत्थानकं देवा विकल्पकरणाद् द्विधा ॥३॥ सदा स्वसुखनिष्ठं यद्ब्रह्म सांख्यं प्रकीर्तितम्। परतश्चोत्थानकं तत् क्रीडाहीनतया परम् ॥४॥ स्वतः परत उत्थानहीनं यद्ब्रह्म कथ्यते। स्वानंदः सकलाभेदरूपः संयोगकारकः ॥५॥ तदेव पंचधा जातमीश्वरास्तन्निबोधत। स्वतश्च परतो ब्रह्मोत्थानं यद् द्विविधं स्मृतम् ॥६॥ ब्रह्मणो नाम तद्वेदे कथ्यते भिन्नभावतः। तयोरनुभवो यश्च योगिनां हृदि जायते ॥७॥ रूपं तदेव ज्ञातव्यमसद्वेदेषु कथ्यते। सा शक्तिरियमाख्याता ब्रह्मरूपा ह्यसन्मयी ॥८॥ तत्रामृतमयाधारः सूर्य आत्मा प्रकथ्यते। शक्तिसूर्यमयो विष्णुरानंदो नंदनात्तयोः ॥९॥ त्रिविधेषु तदाकारस्तत् क्रियाहीनरूपकः। शिवो नेति चतुर्थोऽयं त्रिनेति करणात्परः ॥१०॥ त्रिविधं मोहमात्रं यन्निर्मोहस्तु सदाशिवः। तेषामभेदे यद्ब्रह्म स्वानंदः सर्वयोगतः ॥११॥ पंचानां ब्रह्मणां यच्च बिंबं मायामयं स्मृतम्। ब्रह्मा स एव विज्ञेयः सर्वादिः सर्वभावतः ॥१२॥ बिंबेन सकलं सृष्टं तेनायं प्रपितामहः। असत् सत् समनेति स्वानंदरूपा वयं स्मृताः ॥१३॥ स्वानंदात्परं ब्रह्मायोगाख्यं ब्रह्मणां भवेत्। केषामपि प्रवेशो न तत्र तस्याऽपि कुत्रचित् ॥१४॥ मदीयं दर्शनं तत्रायोगे नो योगिनां भवेत्। स्वानंदे दर्शनं प्राप्तं स्वसंवेद्यात्मकं च मे ॥१५॥ स्वानंदवासिनं तेन वेदेषु प्रवदंति माम्। चतुर्णां ब्रह्मणां भोगास्तं योगाभेदयोगतः ॥१६॥ संयोगश्च ह्ययोगश्च तयोः परतरो मतः। पूर्णशांतिप्रदो योगश्चित्तवृत्तिनिरोधनः ॥१७॥ क्षिप्तं मूढं च विक्षिप्तमेकाग्रं च निरोधकम्। पंचभूमिमयं चित्तं तत्र चिंतामणिः स्थितः ॥१८॥ पंचभूमिनिरोधेन प्राप्यते योगिभिर्हृदि। शांतिरूपात्मयोगेन ततः शांतिर्मदात्मिका ॥१९॥ एतद्योगात्मकं ज्ञानं गाणेशं कथितं मया। नित्यं युक्तं च योगेन नैव मोहं प्रगच्छथ ॥२०॥ चित्तरूपा स्वयं बुद्धिः सिद्धिर्मोहमयी स्मृता। नानाब्रह्मविभेदेन ताभ्यां क्रीडति तत्पतिः ॥२१॥ त्यक्त्वा चिन्ताभिमानं च गणेशोऽहं समाधिना। भविष्यंति भवंतोऽपि मद्रूपा मोहवर्जिताः ॥२२॥ शिव उवाच। इत्युक्त्वा विरराम ऽथ गणेशो भक्तवत्सलः। तेऽपि भेदं परित्यज्य शांतिं प्राप्ताश्च तत्क्षणात् ॥२३॥ एकविंशतिसुश्लोकैर्गणेशेन प्रकीर्तितम्। गीतासारं सुशांतेभ्यः शांतिदं योगसाधनैः ॥२४॥ गणेशगीतासारं च यः पठिष्यति भावतः। श्रोष्यति श्रद्धधानश्च ब्रह्मभूतसमो भवेत् ॥२५॥ इह भुक्त्वाऽखिलान्

भोगानंते योगमयो भवेत्। दर्शनात्तस्य लोकानां सर्वपापं लयं व्रजेत् ॥२६॥

॥ ओमिति श्रीमदान्त्ये पुराणोपनिषदि श्रीमन्मौद्गले महापुराणे प्रथमे खंडे वक्रतुंडचरिते गणेशगीतासारकथनं नाम षोडशोऽध्यायः ॥

॥ श्रीगणेशाय नमः ॥ शिव उवाच । गणेशगीतासारं ते श्रुत्वा पंच सुरेश्वराः । ऊचुस्तं विस्मिताः सर्वे प्रणम्य गणनायकम् ॥१॥ पंच देवा ऊचुः । भगवन् भवता सर्वं कथितं तथ्यमेव च । तेन तृप्ता वयं स्वामिन् मोहशून्याः कृतास्त्वया ॥२॥ तव दर्शनमात्रेण स्मरणं पूर्वकं कृतम् । गुणरूपा वयं ढुंढे कथं ब्रह्ममया वद ॥३॥ तेषां वचनमाकर्ण्य तानुवाच गजाननः । भक्तवत्सलभावेन तोषितोऽसौ महाप्रभुः ॥४॥ गणेश उवाच । स्वपदे जगति ब्रह्मरूपा वै जगदीश्वराः । भिन्नभावे गुणात्मानो भवंतोऽपि मया कृताः ॥५॥ चतुर्विधेन भावेन क्रीडामि ननु तत्र च । क्रीडया पतितं बिंबं तेन पंचविधोऽभवम् ॥६॥ बहलेषु विलासेषु तेषु भावेषु देवपाः । भवंतो मदधीनाश्च संस्थिता नात्र संशयः ॥७॥ एषु भिन्नविहारेषु रजःसत्त्वतमोमयाः । मया ब्रह्मा हरिः शंभुर्भिन्ना जाता हि मायया ॥८॥ अहंकारस्त्रिदेवानां सूर्यो मोहमयी तथा । शक्तिस्त्रिगुणसिध्यर्थमेते पंच मया कृताः ॥९॥ अहमत्र स्थितोंऽशेन वक्रतुंड इति स्मृतः । बिंदुब्रह्ममयः साक्षाद्भिन्नभावप्रकाशकः ॥१०॥ तुरीयं मे मया रूपं कृतं यद् गुणपं सुराः । ज्ञातव्यं बुद्धिरूपं तद्दक्षिणांगं प्रकथ्यते ॥११॥ पंचदेवविहाराख्यं वामांगं सिद्धिरूपकम् । सिद्धिबुद्धियुतोऽहं वै बिंदुमात्रात्मकोऽभवम् ॥१२॥ भक्तानां विघ्नरूपा ये वक्रास्ते कथिताः सुरैः । तांस्तुंडेन हनिष्यामि वक्रतुंडस्ततः स्मृतः ॥१३॥ मम माया मयाज्जीवाद्वक्रं ब्रह्ममुखं यतः । तेनाऽहं वक्रतुंडस्तु लभ्य उन्मनसा भवेः ॥१४॥ भवतां कार्यसिद्ध्यर्थं विहारार्थं तु मायया । बिंदुरूपधरो भूत्वा स्थितोऽहं भावपूर्वकम् ॥१५॥ यदि मे स्मरणं यूयं विस्मरिष्यथ वै तदा । मायामोहेन संभ्रांता भविष्यथ महेश्वराः ॥१६॥ भवद्भिः सततं तस्मात् कर्तव्यं स्मरणं हृदि । आदौ पूज्यो भविष्यामि दैवे पित्र्ये च कर्मणि ॥१७॥ तेन सिद्धियुताः सर्वे भविष्यंति न संशयः । इत्युक्त्वांतर्दधे देवो


गणेशो गणपालकः ॥१८॥ शिव उवाच । इति ते कथितो देवि ध्यानमार्गः पुरातनः । तं ध्यायामि हृदिस्थं मे गणेशं ब्रह्म-नायकम् ॥१९॥ अखिलं ब्रह्मणा सृष्टं चराचरमयं शिवे । नानावतारवान् विष्णुः स पाति गणपाज्ञया ॥२०॥ अहं संहारकारी च त्वं प्रमोदप्रदा शिवे । कर्मणां चालकः कालैर्भानुर्जातो न संशयः ॥२१॥ हिमाचलसुता त्वं वै जाता तेन सुविस्मृतम् । त्वयाऽखिलं हृदिस्थं च ज्ञानं गणपबोधकम् ॥२२॥ मया सुस्मारितं तुभ्यं स्मर सर्वं शुचिस्मिते । भवती च महामाया पश्य त्वं गणपं हृदि ॥२३॥ अष्टौ तस्याऽवतारांश्च कथयामि समासतः । भजता तेन मार्गेण भवेद्योगो न दुर्लभः ॥२४॥ प्रथमो वक्रतुंडश्च त्वंपदब्रह्म कथ्यते । द्वितीयं एकदंतश्च तत्पदब्रह्मबोधकः ॥२५॥ महोदरस्तृतीयस्तु ब्रह्मासि पदधारकम् । गजाननश्चतुर्थश्च सांख्यरूपो महेश्वरि ॥२६॥ लंबोदर इति ख्यातो ह्यनब्रह्म त्वयि स्थितम् । षष्ठो विकटनामा च सद्ब्रह्मात्मरविः परः ॥२७॥ विघ्नराजः स्वयं विष्णुः सप्तमः समतांगतः । धूम्रवर्णोऽष्टमः शंभुरव्यक्तो नेति कथ्यते ॥२८॥ अष्टब्रह्मसु तत्पालाः कलारूपधराः स्मृताः । गणपा गणराजस्य ह्यवताराः प्रकीर्तिताः ॥२९॥ स्वसंवेद्यमयं ब्रह्म तेन वै प्रभुताः प्रिये । सर्वेषां ब्रह्मणां देवि खेलकस्तेन स स्मृतः ॥३०॥ अयोगस्यावतारश्च खेलनादि न विद्यते । स्वानंदवासिनं विद्धि खेलकं सततं प्रिये ॥३१॥ पूर्णयोगो गणाधीशः स्वानंदायोगवर्जितः । योगिनां तत्र शांतिश्च ह्यभवद्योगसेवया ॥३२॥ इति सर्वं समाख्यातं यत्पृष्टं देवि शोभनम् । अनेन विधिना नित्यं गणेशं भज सर्वदा ॥३३॥ अस्माकं कुलदेवश्च गणेशो नात्र संशयः । पूज्यते स मया नित्यं चिंतामणिविनायकः ॥३४॥ पंचानां चित्तवृत्तीनां प्रकाशकतया स्थितः । तेन चिंतामणिर्नाम कथ्यते स गजाननः ॥३५॥ गजवक्त्रात्मिकां मूर्तिं पश्य देवि गृहे स्थिताम् । मणि-रत्नमयीं साक्षात् पूजयामि सुभक्तितः ॥३६॥ मुद्गल उवाच । इत्युक्त्वा दर्शयामास ध्यानस्थानं सदाशिवः । एकांते वीक्ष्य वै देवी विस्मिता साऽभवत्परम् ॥३७॥ इत्युक्त्वा विरराम शंकरः करुणानिधिः । तं पुनः प्रत्युवाचेदं महादेवी जगन्मयी ॥३८॥ शक्तिरुवाच । सर्वेषां मोहसंदात्री नामसस्य सदाशिव । तव पत्नी कथं जाता ह्यर्धभागस्थितस्य वै ॥३९॥ अमुं मे संशयं देव छेत्तुमर्हसि सांप्रतम् । त्वदन्यः संशयच्छेत्ता सर्वज्ञो नास्ति कुत्रचित् ॥४०॥ पार्वतीवचनं श्रुत्वा शिवो हर्षसमन्वितः । उवाच मधुरं वाक्यं बोधयंस्तां महेतुकम् ॥४१॥ शिव उवाच । शृणु देवि पुरा वृत्तं येन त्वं मत्प्रियाऽभवः । तत्तेऽहं कथयिष्यामि कथासारं सुखप्रदम् ॥४२॥ विवादः पंचदेवानां स्पर्धया समभूच्च यः । तत्रैश्वर्यं मया दृष्टं त्वदीयं

महदद्भुतम् ॥४३॥ पंचानां बोधको देवो गणेशोंऽतर्दधे यदा। बोधयित्वा यथान्यायमस्मान् ब्रह्ममयः प्रभुः ॥४४॥ ततो मया तपस्तप्तं तव प्राप्तौ प्रिये महत्। भक्तिभावेन संतुष्टा त्वं जाता शतवर्षतः ॥४५॥ मत्समीपे समागम्य वृणुष्व वरमीप्सितम्। प्रसन्नाऽहं महादेव दास्येऽहमिति चाब्रवीः ॥४६॥ त्वां नत्वा स्तुतवान्नानाचेष्टितैस्त्वत्स्वरूपकैः। तेन तुष्टिः परा जाता तवापि जगदीश्वरि ॥४७॥ मया प्रयाचितं देवि त्वं मे पत्नी भव प्रिये। एष एव वरो मह्यं दातव्यो जगदीश्वरि॥४८॥ मदीयं वचनं श्रुत्वा सस्मिता भावपूर्वकम्। जाता त्वं मे वरं दत्त्वांऽतर्धानं च कृतं त्वया ॥४९॥ अतस्त्वं मे प्रिया जाता वरदानप्रभावतः। तव वामांगसंभूता लक्ष्मीर्नारायणप्रिया ॥५०॥ दक्षिणांगात् समुद्भूता सावित्री ब्रह्मणः प्रिया। हृदयात्ते च संभूता संज्ञा पत्नी रवेरपि ॥५१॥ इति सर्वं समाख्यातं स्मर सर्वं शुचिस्मिते। साधय त्वं पुनर्योगं गाणेशं शांतिदं परम् ॥५२॥ मुद्गल उवाच। शिवेन कथितं सर्वं श्रुत्वा देवी नगात्मजा। एकांते साधयामास योगं गणपतेः परम् ॥५३॥ पूर्वसंस्कारभावेन स्वल्पकालेन सा शिवा। शांतिं प्राप्ता महाभागा प्रययौ शिवसन्निधौ ॥५४॥ मुद्गल उवाच। इति ते कथितं दक्ष चेष्टितं गणपस्य च। भज त्वं सर्वभावेन गणेशं ब्रह्मनायकम् ॥५५॥ तेन त्वं विघ्नहीनोऽपि भवितासि न संशयः। सर्वमान्यो महायोगी शोकहीनो जगद्गुरुः ॥५६॥

॥ ओमिति श्रीमदान्त्ये पुराणोपनिषदि श्रीमन्मौद्गले महापुराणे प्रथमे खण्डे वक्रतुंडचरिते शिवपार्वतीसंवादसमाप्तिर्नाम सप्तदशोऽध्यायः ॥

॥ श्रीगणेशाय नमः ॥ शौनक उवाच। श्रुतं सूत महाभाग कथितं परमाद्भुतम्। चरितं गणनाथस्य तेन तृप्ता वयं प्रभो ॥१॥ शिवशक्तिमहावादं श्रुत्वा तृष्णा विवर्धते। पुनश्च वद सूत त्वं गणेशस्य विचेष्टितम् ॥२॥ सूत उवाच। शृणु शौनक यत्नेन दक्षेणैवं महामुनिः। सत्कथामृतपानं च कृत्वा पृष्टः पुनश्च यत् ॥३॥ शक्तिशंकरसंवादं ब्रह्मभूयपदप्रदम्। श्रुत्वा

दक्षो महाभागः पप्रच्छ मुनिसत्तमः ॥४॥ दक्ष उवाच । किंचित्पुरातनं पुण्यं फलितं मे महाद्भुतम् । पीतं मुद्गल ते वक्त्रात् कथामृतमिदं मया ॥५॥ धन्योऽसि कृतकृत्योऽसि गणेशे भक्तिमानसि । गणेशाच्च परं नास्ति ज्ञातं त्वद्वाक्यतो मया ॥६॥ वद मुद्गल माहात्म्यं पुनर्गणपतेः शुभम् । न तृप्तोऽहं महायोगिन् पीत्वा ब्रह्मामृतं महत् ॥७॥ शिवशैलसुतावादो महानंद-प्रदायकः । तत्राष्टौ गणराजस्य ह्यवताराः श्रुता मया ॥८॥ तेषां तच्चरितं चाऽपि माहात्म्यं तेऽपि यत् महत् । श्रोतुमिच्छामि योगीश दयां कृत्वा वदस्व मे ॥९॥ किमर्थं गणराजोऽयमवतारं करोति वै । ब्रह्मभूयमयो देवस्तद्वदस्व महामुने ॥१०॥ परोपकरणार्थाय त्वादृशा मुनिसत्तमाः । भ्रमंति धरणीं ब्रह्मन् पतितेभ्यः सुखप्रदाः ॥११॥ दर्शनस्पर्शनेनैव भाषणेन विशेषतः । पावयंति जनान् सर्वान् साधवः समदर्शिनः ॥१२॥ सूत उवाच । श्रुत्वा दक्षवचो रम्यं प्रत्युवाच स मुद्गलः । प्रहृष्टो भावयुक्तस्य दक्षस्य च महात्मनः ॥१३॥ मुद्गल उवाच । शृणु दक्ष महाभाग धन्योऽसि न च संशयः । येन त्वं गणनाथस्य कथां पृच्छसि मां प्रभो ॥१४॥ पापिनां नास्तिकानां वै दांभिकानां कदाचन । सत्कथाऽमृतपानस्य चेच्छा नोत्पद्यते क्वचित् ॥१५॥ द्वंद्वभावविचारज्ञास्तथा सहनकारकाः । भूतेषु समभावाश्च संसारतरणे रताः ॥१६॥ परोपकारकार्येषु मतिस्तेषां प्रवर्तते । एतादृशा महाभागा गणेशे सादराः प्रभो ॥१७॥ कथां गणपतेर्नित्यं शृण्वंति च पठंति ते । श्रावयंति जनानन्यान् भक्तिभावसमन्विताः ॥ १८ ॥ अतस्त्वं सादरो भूत्वा शृणुष्व पापनाशिनीम् । कृत्वा वर्धयसि प्रश्नं कथां गणपतेः शुभाम् ॥ १९ ॥ शृणु यच्च पुरावृत्तं मदीयं भावपूर्वकम् । ततोऽग्रे कथयिष्यामि संशयो येन नश्यति ॥ २० ॥ अवतारकथामग्रे ज्ञास्यसि त्वं यथार्थतः । गणराजपदं सर्वं प्राप्स्यसि त्वं च भक्तिमान् ॥ २१ ॥ अहं तपसि संविष्टः शिलोञ्छाजीवमाश्रितः । दश पंच दिनेष्वेव द्वादश्यां मम पारणम् ॥ २२ ॥ द्रोणमात्रं चिनोम्यन्न-मुपोषणसमन्वितः । तेनान्नेन यथान्यायं पंचयागानकुर्व्यहम् ॥ २३ ॥ एवं बहुगते काले तपसि मयि संस्थिते । देवाः सर्वे भयोद्विग्नाः किमयं साधयिष्यति ॥ २४ ॥ ऐंद्रं पदं विधातुर्वा वैष्णवं शैवमेव च । किं वांछति महाभागो मुनिस्तपसि संस्थितः ॥ २५ ॥ इति देवैः प्रेषितस्तु मुनिः सर्वार्थकोविदः । मदाश्रमे परीक्षार्थं दुर्वासाः कोपवान् ययौ ॥ २६ ॥ नग्न उन्मत्ततुल्यः सन्नागतः पारणे मम । मह्यं भिक्षां मुने देहि यया तृप्तो भवाम्यहम् ॥ २७ ॥ इत्युक्ते तु मया दत्तमन्नं तस्मै महात्मने । न ज्ञातो मुनिमुख्योऽयं दुर्वासा आगतो गृहम् ॥ २८ ॥ तदन्नं सकलं भुक्त्वा द्रोणमात्रं



[illegible] गुरुगृहाश्रमस्थं श्रीमुद्गलदाम्पत्यम् ।

(दृष्टिपात:) श्रीवक्रतुण्डावतारचरिते महर्षिर्दुर्वासाः श्रीमुद्गलं परीक्षते ।

महामुनिः। उच्छिष्टं लिप्तवान् देहे गतो विकलमानसः ॥२९॥ मानसे मे महानंदः प्राप्तो दक्ष प्रजापते। धन्यं तपो मदीयं वै तृप्तः सर्वान्नभुक् जनः ॥३०॥ उपोषणे समायुक्तोऽहं तत्र तपसि स्थितः। पुनः स द्वादशीघस्रे पारणार्थं समाययौ ॥३१॥ दुर्वाससं पुनर्यातं तादृशं वेषमास्थितम्। महता हर्षयुक्तेनाऽपूजयं च महामुनिम् ॥३२॥ सर्वान्नं भुक्तवान् सद्य एवं षड्वारमाययौ। मम भावपरीक्षार्थं तपःखंडनकारकः ॥३३॥ पूर्वपुण्यप्रभावेण च्यावितो न मनागपि। त्रिमासोपोषितो भावयुक्तेन तपसाऽभवम् ॥३४॥ तपसा भावशुद्धेन परितुष्टो महामुनिः। स्वरूपं दर्शयामास योगरूपं महाद्भुतम् ॥३५॥ उवाच शुद्धिमापन्नो मुद्गल त्वं न संशयः। गच्छ स्वर्गं महाभाग अक्षयं भोक्तुमर्हसि ॥३६॥ स्वर्गलोका जिताः सर्वे त्वयाऽक्षय्यप्रकाशकाः। तपसा शुद्धभावेनाधुना तान् गच्छ मुद्गल ॥३७॥ इत्युक्त्वा मां स दुर्वासा गतः स्वाश्रममंडले। तस्मिन्नेव क्षणे स्वर्गाद्विमानं तत्र चागतम् ॥३८॥ विमानात् पुरुषो दिव्यभूषणैर्भूषितः परः। उत्तीर्य मे सुसान्निध्यमागतः पूजितो मया ॥३९॥ उवाच मधुरं वाक्यं चलेति त्वं मयासह। स्वर्गादागतवंतं वै विद्धि मुद्गल मां तथा ॥४०॥ बृहस्पतिपुरोगः स देव इंद्रः प्रतापवान्। त्वदर्थं संस्थितः स्वामिन् तेनाहं प्रेषितो मुने ॥४१॥ इदं विमानमारुह्य नानाभोगसमन्वितम्। मया सार्धं महाभाग चल स्वर्गं सुभोगदम् ॥४२॥ सूत उवाच। देवदूतवचो रम्यं श्रुत्वैवं मुद्गलो मुनिः। विनयावनतो भूत्वा तं पप्रच्छ मुदान्वितः ॥४३॥ मुद्गल उवाच। स्वर्गेषु सर्वलोकेषु के गुणाः संति तान् वद। दोषाः के तत्र तिष्ठंति श्रुत्वा यामि त्वरान्वितः ॥४४॥ सूत उवाच। मुद्गलस्य वचः श्रुत्वा देवदूतस्तमब्रवीत्। विनयेन च संतुष्टो यथातथ्यं विभागशः ॥४५॥ देवदूत उवाच। कर्मभूमिरियं ब्रह्मन् भोगभूमिस्तु सा मता। स्वर्गरूपा नरादीनां कर्मभोगप्रदायिनी ॥४६॥ नानासुखप्रदं तत्र गुणं वक्तुं न शक्यते। ईप्सितं लभते सर्वं सदा यौवनसंस्थितिः ॥४७॥ क्लमः स्वेदादिकं तत्र नैव शीतोष्णता तथा। अप्सरोभिर्विहाराश्च कामरूपा गतिर्भवेत् ॥४८॥ स्वकर्मतुल्यभोगाश्च भोक्तव्याः सर्वभावतः। ये ये भोगा देहिनां च ते ते तत्र समास्थिताः ॥४९॥ भोगभूमिः समाख्याता स्वर्गरूपा महामुने। वद तत्र च किं न्यूनं यतः पृच्छसि मां प्रभो ॥५०॥ त्वया नानाविधं कर्म तपसा साधितं मुने। स्वर्गलोकाः कृताः सर्वेऽक्षयास्तान् भोक्तुमर्हसि ॥५१॥ तत्र स्वर्गे त्रयो दोषास्तान् शृणुष्व महामुने। इह कर्म कृतं लोकैर्भोक्तव्यं शुभरूपकम् ॥५२॥ तत्र कर्म कृतं लोकैः तदेव फलहीनकम्। तेन लोको हि दुःख्यस्ति तदंते

किं भवेदिति ॥७३॥ एतादृशं मया कर्म पुण्यरूपं कृतं महत्। एतावंतं च कालं मे स्वर्गवासो भविष्यति ॥७४॥ एकं दोषं महांतं च जानीहि मुनिसत्तम। द्वितीयं शृणु दोषं त्वं कथयामि सविस्तरम् ॥७५॥ नाना स्वर्गेषु मित्राणि नाना प्रीतिविवर्धनाः। देवास्तत्र महाभाग सह तैर्मोदते स्वयम् ॥७६॥ सत्कर्म तस्य तैनैव भुक्तं स्वर्गे यथायथम्। पश्चात् पतनकाले तु तमधः पातयंति ते ॥७७॥ क्षणमेकं न तं कोऽपि स्नेहं पश्यति लोकपः। पतनस्य भयं चित्ते दोषोऽयं पातरूपकः ॥७८॥ तृतीयं दोषरूपं यच्छृणु त्वं भावपूर्वकम्। तद्वदिष्यामि ते प्रीत्या येन ज्ञानं भवेत्परम् ॥७९॥ सत्कर्मकारिणस्त्वन्ये महाभागकरा मुने। संति स्वर्गेषु चानेके तान् दृष्ट्वा तपति स्वयम् ॥८०॥ धिङ् मां न्यूनविहारेण तिष्ठामि स्वल्पपुण्यतः। महापुण्यकरा अन्ये अधिकं विहरंत्युत ॥८१॥ सदा हृदि तपन्त्येवं स्वर्गभूमिस्वभावतः। हृदि तापात्मको दोषस्तृतीयः कथितो मया ॥८२॥ अनंतगुणसंयुक्तं स्वर्गं जानीहि तापद। दोषैस्त्रिभिः समायुक्तं महापुण्यप्रभावतः ॥८३॥ धन्यस्त्वं मुनिशार्दूल तत् स्वर्गं विजितं त्वया। भुंक्ष्व भोगान मनोज्ञान वै चल शीघ्रं मया सह ॥८४॥

॥ ओमिति श्रीमदान्त्ये पुराणोपनिषदि श्रीमन्मौद्गले महापुराणे प्रथमे खंडे वक्रतुण्डचरिते मुद्गलदेवदूतसंवादो नामाष्टादशोऽध्यायः ॥

॥ श्रीगणेशाय नमः ॥ सूत उवाच। देवदूतवचः श्रुत्वा मुद्गलस्तमथाब्रवीत। शृणु शौनक माहात्म्यं मुनेस्तस्य सुयोगिनः ॥१॥ मुद्गल उवाच देवदूत मया सर्वं त्वयोक्तं बुद्धिपूर्वकम। श्रुतं पुनः प्रपृच्छामि तत् मे वद महामते ॥२॥ दोषैस्त्रिभिर्विहीनं तं कं लोकं वद मे प्रभो। सतत्तापविहीनाश्च मोदंते यत्र मानवाः ॥३॥ सूत उवाच। मुद्गलस्य वचः श्रुत्वा देवदूत उवाच ह। लोकं च तमहं तुभ्यं कथयामि सविस्तरम ॥४॥ देवदूत उवाच। निष्कामकर्मणा विप्र ब्रह्मलोकः प्रलभ्यते। वैकुंठः शिवलोकश्च सौरः शाक्तो जनेन च ॥५॥ तत्राऽपि दोषयुक्तत्वं वर्तते मुनिसत्तम। ब्रह्मभूयपदं यच्च दोषहीनं प्रचक्षते ॥६॥ देवदूतमुखादित्थं श्रुत्वा वै मुद्गलो मुनिः। तं पप्रच्छ पुनः साधुर्भक्तिनम्रात्मकंधरः ॥७॥

मुद्गल उवाच । कुत्र तल्लभ्यते स्वामिन् वद सर्वमशेषतः । उपकारपरोऽसि त्वं तेन पृच्छामि तत्त्वतः ॥८॥ देवदूत उवाच । कर्मभूमिरियं ब्रह्मन्नत्र वै लभ्यते जनैः । धर्मार्थकाममोक्षादि ब्रह्मभूयं न संशयः ॥९॥ श्रुत्वा तस्य वचो रम्यं मुद्गलस्त-मुवाच ह गच्छ दूत नमस्तुभ्यं स्वर्गं प्रति नयाम्यहम् ॥१०॥ हृदि संतापसंयुक्तं पुनः पातभयात्मकम् । स्वर्गं नेच्छामि भो विद्वन् ब्रह्म तत्साधयाम्यहम् ॥११॥ देवदूत उवाचेदं मुद्गलं मुनिसत्तमम् । भाग्यहीनोऽसि नूनं त्वं स्वर्गं नैवाभिनंदसि ॥१२॥ स्वर्गेच्छा कस्य नैवास्ति नरस्य वद मां मुने । उग्रैस्तपोभिर्दानैश्च यज्ञैः स्वर्गश्च लभ्यते ॥१३॥ नानापुण्यादिकं कृत्वा सत्कर्मादिसुसाधनैः । इच्छंति मनुजाः स्वर्गं महासौख्यप्रदं परम् ॥१४॥ स स्वर्गश्च त्वया प्राप्तस्तपसोग्रैः सुसाधनैः । नेच्छसि त्वं महामूढ ज्ञानहीनोऽसि मे मतम् ॥१५॥ देवदूतं वदंतं तं तदा पुनरिदं वचः । मुद्गलः स्नेहसंयुक्तः प्रत्युवाच हसन्निव ॥१६॥ मुद्गल उवाच । किं मां मोहयसि प्राज्ञ देहोऽयं बंधनात्मकः । देहसौख्यकरः स्वर्गो मुक्तिदो न बुधैः स्मृतः ॥१७॥ तत्राऽपि हृदि संतापो वर्तते दूतसत्तम । तापत्रयसमायुक्तं विद्वान्नेच्छति कर्हिचित् ॥१८॥ गच्छ त्वं च महाभाग बृहस्पतिपुरोगमम् । इंद्रं प्रणामं कथय नाऽऽगतो मुनिरित्यपि ॥१९॥ एवमुक्त्वा नमस्कृत्य देवदूतमहं प्रभो । अग्रेश्च गतवान् शालां गतो दूतो यथागतम् ॥२०॥ मयाऽपि स्वाश्रमे तत्र स्थितं मनसि धारितम् । विधिना ब्रह्मवेदेषु नानारूपं प्रकथ्यते ॥२१॥ किं प्रमाणं भवेत्तेषां साधनीयं मया कथम् । पूर्णभावमविज्ञाय भ्रांतोऽहं नात्र संशयः ॥२२॥ अतः संशयनाशार्थं गमिष्यामि महामुनिम् । योगिश्रेष्ठैरंगिरसं वंद्यं वेदज्ञमुत्तमम् ॥२३॥ शब्दब्रह्मणि निष्णातं परे ब्रह्मणि तन्मयम् । अस्माकं मूलपुरुषं साक्षाद् ब्रह्मशरीरकम् ॥२४॥ इति निश्चितवांस्तत्र गतोऽहं मुनिसंन्निधौ । आश्रमोऽस्य मया दृष्टः सर्वभूताभयप्रदः ॥२५॥ नातपो न च शीतत्वं न क्रोधः कामसंभवः । न मात्सर्यादिकं तत्र समकालयुतो बभौ ॥२६॥ नावृष्टिर्नातिवृष्टिश्च ह्यकाले मरणं न च । न ग्रहादिकृता पीडा तत्र रक्षो-भयं न च ॥२७॥ सर्वशांतिप्रदः पूर्णस्तापसानां हितावहः । विस्मितेन सुपुण्येन प्रविष्टो भाग्ययोगतः ॥२८॥ तत्र नानामुनीनां च वत्साः परमशोभनाः । मया दृष्टा महाभाग वेदघोषनिनादिताः ॥२९॥ अग्निहोत्रादिभिर्युक्ता नानापक्षि-निनादिताः । वृक्षवल्लीसमायुक्ता नानापुष्पफलाश्रिताः ॥३०॥ नानासरोवराण्येव हंसकारंडवैर्बभुः । नानापक्षिवृतान्येव सुधारूपजलानि वै ॥३१॥ सुनिर्मलपयांस्येव मकरादियुतानि च । कमलैः कुमुदैर्नानाशोभमानानि षट्पदैः ॥३२॥ सिंह-

व्याघ्रमृगा नागा गजा गावश्च मूषिकाः। निर्वैराः प्राणिनस्तत्र निवसंति प्रजापते ॥३३॥ एवं दृष्ट्वा महाभाग आश्रमं हर्षसंयुतः। पश्यन् पुनश्च ह्यभवं विस्मितो निजचेतसि ॥३४॥ तं वै कुशासनस्थं च साक्षात् सूर्यमिवापरम्। तेजसा दीप्यमानं त्वपश्यमंगिरसं मुनिम् ॥३५॥ सिद्धैर्नानाविधैश्चैव योगिभिर्मुनिभिर्वृतम्। शिष्येभ्यो ब्रह्मविद्यां तां कथयंतं यथार्थतः ॥३६॥ दंडवत्तं प्रणम्यादौ भक्तिभावयुतोऽभवम्। प्रांजलिः प्रयतो भूत्वा संस्थितो मुनिसन्निधौ ॥३७॥ नव गोत्रभवं स्वामिन् मुद्गलं मुनिसत्तम। दर्शनार्थं समायातं विद्धि मां ब्रह्मदायक ॥३८॥ मदीयं वचनं श्रुत्वा प्रसन्नः प्राह मां मुनिः। वत्स त्वमागतस्तात तिष्ठाऽत्र मम संन्निधौ ॥३९॥ अविघ्नभावयुक्तेन तपस्तप्तं त्वया सुत। तेन मे दर्शनं प्राप्तं सत्पुत्रोऽसि न संशयः ॥४०॥ मुनेर्वचनमाकर्ण्य प्राप्तोऽहं परमां मुदम्। तत्र स्थितोऽभवं दक्ष सन्निधौ तस्य धीमतः ॥४१॥ कस्मिंश्चिद् दिवसे तत्र लब्ध्वाऽवसरमुत्तमम्। पृष्टो मया महायोगी शृण्वत्सु च मुनिष्वपि ॥४२॥ ज्ञातुमिच्छामि भो स्वामिन् वद मां करुणानिधे। अस्माकं त्वं गतिः साक्षात् सर्वेषां चैव भक्तितः ॥४३॥ सूत उवाच वचनं मुद्गलस्याऽपि श्रुत्वा तं पुनरब्रवीत्। अंगिरा भगवान् योगी प्रहसंस्तं प्रहर्षयन् ॥४४॥ अंगिरा उवाच। मत्तः पृच्छसि किं तात तद् ब्रूहि त्वं महामुने। भावतो मंत्रकर्ता त्वं पुराणाचार्य एव च ॥४५॥ मुद्गल उवाच। कथितं ब्रह्मवेदेषु नानाभाव-समन्वितम्। किं प्रमाणं वेदितव्यं ब्रह्मभूयेप्सुभिः प्रभो ॥४६॥ अंगिरा उवाच। शृणु पुत्र प्रवक्ष्यामि वेदांतेयत्प्रभाषितम्। क्रमेण ब्रह्मलाभार्थं नानाब्रह्मनिरूपणम् ॥४७॥ अन्नं ब्रह्मेति यत्प्रोक्तं तत्रोपाधिः समागतः। अन्नरूपो महातेजा अन्नकोश-मयं ततः ॥४८॥ प्राणो ब्रह्मेति यत्प्रोक्तं प्राणकोशप्रकाशकम्। मनो ब्रह्मेति जानीहि मनःकोशमयं तथा ॥४९॥ विज्ञानं ब्रह्म चोक्तं विज्ञानकोशप्रधारकम्। आनंदो ब्रह्म समतानंदकोशप्रभासकम् ॥५०॥ चैतन्यं ब्रह्म यत्प्रोक्तं महाकारणधारकम्। बिंदुब्रह्म यदुक्तं तज्ज्ञानदेहमयं मुने ॥५१॥ चिद्ब्रह्मेति समाख्यातं सोऽहं मात्रात्मकं ततम्। बोधो ब्रह्मेति वेदेषु स्वत उत्थानवेदकम् ॥५२॥ सांख्यं ब्रह्मेति यत्प्रोक्तं विदेहाधारकं मुने। कर्मज्ञाने तु वेदे च कथिते न तदात्मके ॥५३॥ समं ब्रह्मेति जानीहि कथितं तदनात्मकम्। अव्यक्तं सहजं ब्रह्म ज्ञातव्यं तन्निरूपकम् ॥५४॥ शक्तिब्रह्मेति वेदेषु ह्यसद्रूप-प्रकाशकम्। सूर्यो ब्रह्मेति यत्प्रोक्तमात्मरूपं प्रकीर्तितम् ॥५५॥ विष्णुर्ब्रह्मेति यत्प्रोक्तमुभयात्मकधारकम्। शिवो ब्रह्मेति शास्त्रेषु निर्मोहस्य प्रकाशकम् ॥५६॥ स्वानंदो ब्रह्मवेदे च संयोगमयमुत्तमम्। निर्वृत्तिर्ब्रह्मशास्त्रेषु ह्ययोगाधारकं

परम् ॥५७॥ एवं नानाप्रकारैश्च वेदादौ च प्रकथ्यते। मुनिभिर्ब्रह्मवादज्ञैः सर्वं तथ्यं प्रमाणतः ॥५८॥ बृंहत्यथो बृंहयति यद्ब्रह्म श्रुतिवाक्यतः। तदेव ब्रह्मभूतत्वं ज्ञातव्यं मुनिभिः सदा ॥५९॥ अनाद्यात्मचिदाद्यैर्यद्युक्तं ब्रह्म प्रकथ्यते। तदेवोपाधियुक्तं वै योगिभिः सुविचारितम् ॥६०॥ ब्रह्मेति ब्रह्म विज्ञेयं तच्च योगेन लभ्यते। तदर्थं मथनं सर्वं कर्मज्ञानादिकस्य च ॥६१॥ तदेव ब्रह्म प्रत्यक्षं ब्रह्मणस्पतिवाचकम्। ब्रह्मणां ब्रह्म विख्यातं वेदस्मृतिसुभाषितम् ॥६२॥ बृंहत्यथो बृंहयति गणशब्दः प्रकीर्तितः। समूहे गणधातुश्च कविभिः कथितो भवेत् ॥६३॥ बाह्यांतरादिकानां च समूहो गण उच्यते। तत्राऽभेदेन योगेन प्राप्यते योगिभिः परः ॥६४॥ अन्नानां बहवो भेदा बाह्यांतरविभावतः। तदेव गणवाच्यं च ज्ञातव्यं विबुधैः सदा ॥६५॥ इत्यादयो गणास्तस्यानंता ब्रह्मप्रवाचकाः। तेषां स्वामी गणेशानः स एव ब्रह्मणस्पतिः ॥६६॥ तं भजस्व महाभाग ब्रह्मभूयं यदीच्छसि। तस्यावतारदेहा यं ज्ञानादिब्रह्मसंज्ञिताः ॥६७॥

॥ ओमिति श्रीमदान्त्ये पुराणोपनिषदि श्रीमन्मौद्गले महापुराणे प्रथमे खण्डे वक्रतुंडचरिते अगिरामुद्गलसंवादो नामैकोनविंशतितमोऽध्यायः ॥

॥ श्रीगणेशाय नमः ॥ सूत उवाच। वचः श्रुत्वा चांगिरसो हृष्टरोमा स मुद्गलः। विनयावनतो भूत्वोवाच तं विस्मयन्निव ॥१॥ मुद्गल उवाच। तस्यावतारमाहात्म्यं कथयस्व महामुने। तत्क्रमेण भजिष्यामि ब्रह्मभूयस्य सिद्धये ॥२॥ अंगिरा उवाच। अनंता ह्यवताराश्च गणेशस्य महात्मनः। न शक्यंते च ते वक्तुं मया वर्षशतैरपि ॥३॥ संक्षेपेण प्रवक्ष्यामि मुख्यानां मुख्यतां गतान्। अवतारांश्च तस्याष्टौ विख्यातान् ब्रह्मधारकान् ॥४॥ वक्रतुंडावतारश्च देहानां ब्रह्मधारकः। मत्सरासुरहंता स सिंहवाहनगः स्मृतः ॥५॥ एकदंतावतारो वै देहिनां ब्रह्मधारकः। मदासुरस्य हंता स आखुवाहनगः स्मृतः ॥६॥ महोदर इति ख्यातो ज्ञानब्रह्मप्रकाशकः। मोहासुरस्य शत्रुर्वै आखुवाहनगः स्मृतः ॥७॥ गजाननः स विज्ञेयः सांख्येभ्यः सिद्धि-

दायकः। लोभासुरप्रहर्ता वै आखुगश्च प्रकीर्तितः ॥८॥ लंबोदरावतारो वै क्रोधासुरनिबर्हणः। शक्तिब्रह्माखुगः सद्यस्तस्य धारक उच्यते ॥९॥ विकटो नाम विख्यातः कामासुरविदाहकः। मयूरवाहनश्चाऽयं सौरब्रह्मधरः स्मृतः ॥१०॥ विघ्नराजावतारश्च शेषवाहन उच्यते। ममतासुरहंता स विष्णुब्रह्मेति वाचकः ॥११॥ धूम्रवर्णावतारश्चाभिमानासुरनाशकः। आखुवाहन एवाऽसौ शिवात्मा तु स उच्यते ॥१२॥ एतेऽष्टौ ते मया प्रोक्ता गणेशांशा विनायकाः। एतद् भजनमात्रेण स्वस्वब्रह्मप्रदायकाः ॥१३॥ स्वानंदवासकारी यो गणेशानः प्रकथ्यते। स्वानंदे योगिभिर्दृष्टो ब्रह्मण्येव न संशयः ॥१४॥ तद्यावतारभूताश्चाऽष्टौ विघ्नहरणाः स्मृताः। स्वानंदभजनेनैव लीनास्तत्र भवंति ते ॥१५॥ माया तत्र स्वयं लीना भविष्यति सुपुत्रक। संयोगे मौनभावश्च समाधिः प्राप्यते जनैः ॥१६॥ अयोगिगणराजस्य भजनेन विनश्यति। मायाभेदमयं ब्रह्म निवृत्तिः प्राप्यते परा ॥१७॥ योगात्मकगणेशानो ब्रह्मणस्पतिवाचकः। तत्र शांतिः समाख्याता योगरूपा जनैः कृता ॥१८॥ नानाशांतिप्रभेदश्च स्थाने स्थाने प्रकथ्यते। शांतीनां शांतिरूपा सा योगशांतिः प्रकीर्तिता ॥१९॥ योगस्य योगिना दृष्टा सर्वब्रह्मसुपुत्रक। न योगात् परमं ब्रह्म ब्रह्मभूतेन लभ्यते ॥२०॥ एतदेव परं गुह्यं कथितं वत्स तेऽखिलम्। भज त्वं सर्वभावेन गणेशं ब्रह्मनायकम् ॥२१॥ मया पूर्णं तपश्चीर्णं गणेशस्य महात्मनः। मह्यं दत्तो वरस्तेन वांछितो भक्तितोषितः ॥२२॥ तव वंशे च गाणेशा भविष्यंति विशेषतः। तत्राऽपि मुद्गलोऽत्यंतं गाणपत्यो भविष्यति ॥२३॥ न मुद्गलसमो भक्तो गणेशस्य प्रदृश्यते। न भूतो न भविष्यत् वा भक्तराजः स एकराट् ॥२४॥ मुद्गलस्य प्रणामेन स्पर्शभाषणदर्शनैः। वायुस्पर्शादिभिर्भावैरुद्धरिष्यंति जंतवः ॥२५॥ सद्यमेवं वरं दत्त्वा गणेशोऽन्तर्दधे सुत। स त्वं मुद्गलनामासि मम वंशस्य भूषणम् ॥२६॥ धन्यो वंशो मदीयोऽद्य गाणपत्यश्च यत्र वै। समुत्पन्ना महाभागा जंतूनां तारकाः स्मृताः ॥२७॥ त्वं साक्षात् मूर्तिमांस्तेषु गाणपत्यः प्रतापवान्। समुत्पन्नो महायोगी भविष्यसि न संशयः ॥२८॥ मुद्गलं चैवमुक्त्वा तमंगिरा उपदिष्टवान्। एकाक्षरमहामंत्रं गणेशस्य यथाविधि ॥२९॥ गच्छ पुत्र त्वमद्यैव तपसे वनमुत्तमम्। आराध्य गणेशं स दर्शनं ते प्रदास्यति ॥३०॥ प्रणम्याऽसौ चांगिरसं मुद्गलः प्रययौ वनम्। एकनिष्ठतया तेपे तपः पूर्णं महाद्भुतम् ॥३१॥ एकाक्षरविधानेन सांगेन परितुष्टवान्। गणेशोऽब्दसहस्रेण दिव्येन च समागतः ॥३२॥ आखुवाहश्चतुर्बाहुः सिद्धिबुद्धिसमन्वितः। प्रमोदामोदकाद्यैश्च संवृतो भक्तवत्सलः ॥३३॥ नानाभूषणशोभाढ्यो गजवक्त्रो महोदरः।

एकदंतस्त्रिनेत्रश्च चतुरायुधभूषितः ॥३४॥ चिंतामणिमणिं बिभ्रद् हृदये द्युतिजालकम् । महाभक्तमुवाचेत्थं हर्षयन् सर्वभावतः ॥३५॥ श्रीगणेश उवाच । वरं वृणु महाभाग मुद्गल स्वेप्सितं हृदि। दास्यामि परमप्रीत एकाक्षरविधानतः ॥३६॥ सूत उवाच। गणेशवचनं श्रुत्वा मुद्गलः प्रणनाम तम् । बद्धांजलिपुटो भूत्वा पूजयामास भक्तितः ॥३७॥ पूजयित्वा यथान्यायं प्रहृष्टहृदयो मुनिः । पुलकांकितसर्वांगः साश्रुनेत्रो बभूव ह ॥३८॥ सगद्गदमुवाचाऽथ तं प्रणम्य पुनः पुनः । महता भक्तिभावेन तथा चांगिरसो मुनिः ॥३९॥ मुद्गल उवाच। धन्यो वंशो मदीयोऽद्य धन्यं जन्म वयोऽपि च । विद्या ज्ञानं तपस्तीर्थं धन्यं त्वद्दर्शनात् प्रभो ॥४०॥ इयं धन्याऽद्य पृथ्वी च वृक्षाः पुष्पफलान्विताः । पशुपक्षिलताद्या ये आगतोऽत्र महाप्रभुः ॥४१॥ इत्युक्त्वा तं प्रतुष्टाव गणेशं सर्वसिद्धिदम् । स्तोत्रेण स्वात्मनिष्ठः सन् भक्त्या परमया युतः ॥४२॥

॥ ओमिति श्रीमदान्त्ये पुराणोपनिषदि श्रीमन्मौद्गले महापुराणे प्रथमे खण्डे वक्रतुण्डचरिते गणेशमुद्गलसमागमो नाम विंशोऽध्यायः ॥

॥श्रीगणेशाय नमः॥ शौनक उवाच । कथं स्तुतिः कृता तेन गणेशस्य महात्मनः । तां मे वद महाभाग सर्वज्ञोऽसि मतो बुधैः ॥१॥ सूत उवाच। भवते कथयिष्यामि भावयुक्तेन चेतसा । स्तुतिं कृतां गणेशस्य मुद्गलेन च तां मुने ॥२॥ मुद्गल उवाच। किं स्तौमि त्वां गणाध्यक्ष वेदैः स्तोतुं न शक्यते । ब्रह्मादिभिश्च योगींद्रैर्यथामति च वच्मि भोः ॥३॥ त्वद्दर्शनप्रभावेण शक्तोऽस्मि न च संशयः । त्वदनुग्रहतः सर्वे स्तोतुं शक्ता भवंति वै ॥४॥ नमस्ते गणेशाय सर्वादिभूम्ने परेषां परेशाय वेदातिगाय । परं मायिने मायिनां मोहदात्रे ह्यगण्याय गण्याय ते वै नमस्ते ॥५॥ पुराणादिशास्त्रैः सदा संस्तुताय शिवाद्यैः सुरेंद्रैर्नमस्ते स्तुताय । अनाद्यंतमध्यादिभेदैर्विहीनाय नानामयायास्तु सर्वेश्वराय ॥६॥ नमो लक्षवेदाष्टयोनिप्रचारतदाकाररूपाय योगेन योगिन् । नमो ह्यन्नभूताय सर्वाकराय कलानंतरूपाय पुष्टिप्रदाय ॥७॥ नमो भूमिरूपाय नानाप्रभेदधरायाथ धाराय नित्याय तेऽस्तु । जलाधिस्वरूपाय तृप्तिप्रदाय तदाकारहीनाय साराय धाम्ने ॥८॥ नमस्तेजसां द्योतरूपाय ढुंढे प्रकाशाय भोक्त्रे च सर्वस्थिताय। नमो वायुरूपाय ते चालकाय प्रचारस्वरूपाय भिन्नाय तस्मात् ॥९॥ नमः

स्वस्वरूपाय दीप्ताय पूर्णप्रकाशाय भूतादिकब्रह्मदात्रे। नमः स्थूलभोगस्वरूपाय जाग्रन्मयाय प्रभो राजसायाथ तेऽस्तु ॥१०॥ नमः स्वप्नमायामयायापि सूक्ष्मस्वरूपाय सर्वांतरे संस्थिताय। नमः कारणायोभयब्रह्मदाय समायापि सौषुप्त-भोगिन्नमस्ते ॥११॥ नमश्चेतनाधाररूपाय तेऽस्तु प्रयत्नप्रदाय त्रिभोगप्रदाय। गुणेशाय चैतन्यधाराय तेऽस्तु नमो नादरूपाय कालाय चात्मन् ॥१२॥ नमो बिंदुरूपाय वक्राननाय नमो देहमायाविहाराय तुभ्यम्। नमश्चित्स्वरूपाय सोऽहं-प्रदाय निराकारदेहिस्वरूपाय तेऽस्तु ॥१३॥ सदा ह्येकदंताय जन्मादिगाय परायाथ शून्याय दैत्यांतकाय। सदादेश शत्रो महाखुध्वजाय नमोऽनादिसिद्धाय मायाधराय ॥१४॥ नमो ज्ञानरूपाय नानाविहारप्रदायाथ पूर्णाय सर्वत्रगाय। नमो मायिमायादिभेदाकराय सदा बोधरूपाय ते वै महात्मन् ॥१५॥ नमः सांख्यरूपाय वै देहिनां वै पराय स्वसंभोगहीनाय देव। सदा केवलब्रह्मभूताय तेऽस्तु नमो ज्ञानहीनाय मेधामयाय ॥१६॥ नमः स्वस्वरूपाय चानंददाय समाधिस्वरूपाय मौनात्मकाय। स्वसंवेद्ययोगेन लभ्याय तेऽस्तु विनात्मप्रबोधाय सर्वाधिपाय ॥१७॥ नमः पंचपंचादिमायाकराय चतुर्धा चतुर्धा विभिन्नाय धर्मिन्। असद्रूपकायाऽथ शक्त्यात्मकाय नमोऽभेदभेदादिनानात्मकाय ॥१८॥ नमः सत्स्वरूपाय सूर्यात्मकाय सदात्मप्रबोधाय मायाधराय। अखंडामृतायाद्विनीराय तेऽस्तु सदा कालकालाय मोक्षप्रदाय ॥१९॥ नमो विष्णुरूपाय चानंददाय समाय स्वमायाभयत्वाष्ट्र एव। अनंताय भेदादिहीनाय भूम्ने सदा भेदरूपाय सर्वात्मकाय ॥२०॥ नमः शंभुरूपाय नेतिप्रदाय सदा मोहहीनाय च त्र्यंबकाय। त्रिधा मायया भासितुर्यस्वरूपपरब्रह्मरूपाय ते धूम्रवर्ण ॥२१॥ चतुर्णामभेदाय संयोगकारिन् स्वसंवेद्यभावेन विघ्नाधिपाय। स्वभक्तस्य पक्षे सदा संस्थिताय गणाधीश हंत्रे महादैत्यकानाम् ॥२२॥ नमः कर्मरूपाय कर्मादिकर्त्रे जनानां स्वकर्मादिना भोगदात्रे। नमो ज्ञानरूपाय निःसंगदाय सदा कर्महीनाय ते केवलाय ॥२३॥ नमस्ते समानप्रदायो-भयाय समायाऽथ योगेन चानंददाय। नमः सहजब्रह्मभूयप्रदाय त्रिधाम्ने त्रिहीनाय संतोषदाय ॥२४॥ चतुर्धा स्थितीनां सदा पालकाय निजात्मस्वरूपाय संयोगकारिन्। अपाराय नाना चतुर्णां समूहस्वधीशाय हेरंब तुभ्यं नमस्ते ॥२५॥ अयोगाय मायाविहीनाय तुभ्यं नमस्ते निरानंदरूपाय नित्यम्। निवृत्तिस्वरूपाय भिन्नाय तेऽस्तु नमो योगरूपात्समाधि-स्थिताय ॥२६॥ नमो योगशांतिस्वरूपाय शांतिप्रदात्रे गणेशाय योगाय तुभ्यम्। सदा ब्रह्मणां ब्रह्मदात्रेऽखिलेश गणानां

पते ज्येष्ठराजाय तेऽस्तु ॥२७॥ नमो ब्रह्मणे सृष्टिकर्त्रे सदा वै रजोधारिणे वेदशास्त्रादिकर्त्रे । सदा सृष्टिहीनाय साम्याय धाम्ने नमो मायिने मध्यवृत्तिस्थिताय ॥२८॥ नमः सत्वरूपाय विष्णुप्रभेदाज्जगत्पालकायाथ मायाधराय । नमः सत्त्वहीनाय सर्वातिगाय कवीनां पते विघ्नहंत्रे नमस्ते ॥२९॥ नमस्तामसायाऽथ संहारकर्त्रे त्रिनेत्रप्रदीपाय शक्तेर्धराय । सदा कालरूपाय कैलासदाय तमोहीनरूपाय लंबोदराय ॥३०॥ नमः कर्मणां मूलबीजाय तेऽस्तु नमो भानुरूपाय तेजोमयाय । त्रिकालादिबोधाय सूर्याय भूम्ने प्रकाशैर्विहीनाय हेरंब तेऽस्तु ॥३१॥ नमः शक्तिरूपाय मोहप्रदाय क्रियाधारभूताय नानाभ्रमाय । अनंतस्वरूपाधिलीलाधराय नमः शक्तिहीनाय सिद्धीश तुभ्यम् ॥३२॥ नमश्चंद्ररूपाय पुष्टिप्रदाय कलाभिस्त्रिलोकस्थभूतादिकेभ्यः । सुधाधारकायाऽथ नक्षत्रकादिप्रकाशाय ते ह्यन्नहीनाय ढुंढे ॥३३॥ नमः कामरूपाय कामारये ते नमस्ते गजाकारतुंडाय तुभ्यम् । हरींद्रादिदेवैः सदा संस्तुताय शुकाद्यैर्महद्भिश्च वंद्याय तेऽस्तु ॥३४॥ अनित्याय नित्याय देवेश देव सकामाय निष्कामभावप्रदाय । सदा सर्वपूज्याय सर्वाधिपाय जलेशेंद्रशेषादिभिः संस्तुताय ॥३५॥ नमः काश्यपायाऽथ वै कापिलाय वरेण्यस्य पुत्राय पाराशराय । नमः शंभुपुत्राय पार्वात्मजाय नमो भक्तिभोक्त्रे गणाधीश तेऽस्तु ॥३६॥ नमो माधवस्त्रीसुतायाऽथ तुभ्यं नमः सर्वमात्रे नमः सर्वपित्रे । नमः सर्वपुत्राय सर्वात्मकाय नमः सर्वसर्वाय नानामयाय ॥३७॥ नमः पाशधारिन् नमो दंतधारिन् सृणिं बिभृते वै सदानंददायिन् । नमः पुत्रपौत्रादि राज्यप्रदात्रे नमो भुक्तिमुक्तिप्रदायाऽथ तुभ्यम् ॥३८॥ नमोऽनंतशक्ते गुणानामधीश मयूरेश योगेश मायेश तुभ्यम् । नमोऽव्यक्तसुव्यक्तरूपाय दंतिन् गजाकारसाकारमोहाय तेऽस्तु ॥३९॥ नमो ह्येकरूपाय नानाप्रभेदादये विघ्नपालाय शुंडाधराय । अनाथाय नाथाय देवादिकानां निवासाय सर्वात्मनां ते नमो वै ॥४०॥ नमस्त्वंपदाकारदेहाय तुभ्यं नमस्तत्पदाकारतुंडाय तेऽस्तु । तयोरेकभावाऽसिरूपप्रयुक्तशरीराय साक्षात् सुधाम्ने नमस्ते ॥४१॥ नमो वामभागेन सिद्धिस्वरूपाधृनामोहमायाजनानां जनित्री । सदा बुद्धिरूपा धृता दक्षिणांगे न पुंस्त्रीस्वरूपाऽसिरूपाय तेऽस्तु ॥४२॥ नमो भ्रामरी त्वंपदाधारशक्तिः सदा तत्पदा कामदात्री ह्यभेदा । तयोरेकभावे स्वसंवेद्यनाम्नि पुरे मस्तके वासकारिंश्च तासाम् ॥४३॥ अखंडामृतं यत्र तोयं सुताम्रं समुद्रे स्थितं चेक्षुसंज्ञे नमस्ते । निराधाररूपे च पानेन तस्य न पुंस्त्रीप्रदायाऽत्र खेलंश्च तेऽस्तु ॥४४॥ जनानां सदा त्र्यक्षरं शृण्वतां च गणेशेति चानंददायिन्नमस्ते । सकृज्जल्पतां जन्ममृत्यू न

तेषामपारप्रधाम्ने च ढुंढीश्वराय ॥४५॥ नवोपासका ब्रह्मभूता न चित्रं जनेभ्यश्च संस्पर्शनैर्ब्रह्मदा वै। सुरेंद्रादिपूज्या गणेशस्वरूपा भवयुर्नमस्ते नमस्ते गणेश ॥४६॥ सूत उवाच। इति स्तुत्वा गणेशानं मुद्गलो मौनधारकः। पादौ धृत्वा गणेशस्य पतितो दंडवत् क्षितौ ॥४७॥ समुत्थाप्य स्वभक्तं तं सस्वजे परमादरात्। गजाननः प्रसन्नात्मा तमुवाच महामुनिम् ॥४८॥ गणेश उवाच। त्वया स्तोत्रं कृतं यच्च मदीयं मम संनिधौ। स्तोत्रोत्तमं प्रविख्यातं भविष्यति न संशयः ॥४९॥ स्तोत्रोत्तमेन मां स्तौति तस्मै मुक्तिं सभुक्तिकाम्। ददामि दृढभक्तिं च मदीयां नात्र संशयः ॥५०॥ न संकटं न रोगं च प्राप्नोति स नरोत्तमः। पुत्रपौत्रादिकं सर्वं धनं धान्यं ददामि वै ॥५१॥ मारणोच्चाटनादीनि नश्यंति पठनेन च। एकविंशतिवारं च तथा तावद्दिनावधि ॥५२॥ कारागृहादिजाः पीडा नश्यंति पठनेन च। मनसेप्सितमाप्नोति नरो मे परमप्रियः ॥५३॥ त्वं तु मत्तो वरान् ब्रूहि दास्येऽहं भक्तियंत्रितः। त्वत्समो नास्ति भावज्ञो वशे तेऽहं सदा स्थितः ॥५४॥

॥ ओमिति श्रीमदान्त्ये पुराणोपनिषदि श्रीमन्मौद्गले महापुराणे प्रथमे खण्डे वक्रतुण्डचरिते गणेशस्तोत्रोत्तमवर्णने एकविंशतितमोऽध्यायः ॥

॥ श्रीगणेशाय नमः ॥ सूत उवाच ॥ गणेशवचनं श्रुत्वा भक्तिभावसमन्वितः। मुद्गलः प्रणिपत्यैनमुचिवान् हर्षपूरितः ॥१॥ मुद्गल उवाच ॥ किं मां लोभयसे ढुंढे वृणोमि च न किंचन। तव वाक्यानुरोधेन वृणोमि त्वं ददासि चेत् ॥२॥ तव भक्तिं दृढां देहि सदाऽखंडात्मिकां प्रभो। संपूर्णां भक्तिमिच्छामि गाणेशीं यत्रकुत्र च ॥३॥ मुद्गलस्य वचः श्रुत्वा विस्मितो गणराट् स्वयम्। अहो संपूर्णभावेन भक्तिमेकां वृणोषि यत् ॥४॥ गणेश उवाच ॥ मदीया त्वचला भक्तिः संपूर्णा प्रभविष्यति। त्रैलोक्ये तव भाग्येन समं भाग्यं न विद्यते ॥५॥ भक्तिः सा नवधा विप्र चित्ते ते रसदायिका। दशमं नास्ति संस्थानं चित्तस्य रसधारणे ॥६॥ श्रवणं कीर्तनं चैव स्मरणं पादसेवनम्। अर्चनं वंदनं दास्यं सख्यं देहनिवेदनम् ॥७॥ नवचिह्नं प्रवक्ष्यामि भक्तिमाहात्म्यमुत्तमम्। तेनैव प्राप्यते भक्तिर्जनैर्मे नाऽत्र संशयः ॥८॥ श्रवणं मद्गुणानां च मननं तादृशं

पुनः। तस्यानुकूलं कर्तव्यं जायतेऽनुभवस्ततः ॥९॥ रसोत्पत्तिस्त्वनुभवे तत्र सर्वा प्रजायते। श्रवणं मे तया कार्यं गुणानां जंतुना सदा ॥१०॥ प्रियं भवति नान्यच्च मदेकरसभावतः। तेनान्यश्रवणे प्रीतिर्यदा नोत्पद्यते क्वचित् ॥११॥ तदा संपूर्णतां प्राप्ता भक्तिर्मे श्रवणात्मिका। अहं वसामि तत्कर्णे सदा तद्भक्तिलालसः ॥१२॥ मद्गुणानां सदा यस्य कीर्तनं रसदायकम्। नान्यकीर्तनभावेषु तस्य वै मनसो रसः ॥१३॥ तदा भक्तिः सुसंपूर्णा मदीया कीर्तनात्मिका। प्राप्ता तेन सदा तस्य जिह्वाग्रे प्रवसाम्यहम् ॥१४॥ मदीयकार्यभावस्य विस्मृतिर्नैव जायते। समये सावधानो यो व्रतपूजादि-मार्गतः ॥१५॥ तेन स्मरणरूपा सा भक्तिः प्राप्ता महामुने। स्मृत्यां वसामि तस्याऽहं भक्तिभोगार्थमेव हि ॥१६॥ मदीय-पादपद्मं यत्सत्यमन्यदसत्यकम्। ज्ञात्वा देहश्रमे वै यो नालस्येन प्रवर्तते ॥१७॥ मम पादाश्रयः पूर्णः सदा येन कृतो मुने। अन्यत्राऽलस्यभावेन मिथ्याभूते स्थितेन च ॥१८॥ तस्य भक्तिः समुत्पन्ना पादसेवनरूपिका। तस्याऽलस-विहीनेऽहं देहे स्थास्यामि निश्चलः ॥१९॥ सांगोपांगं प्रकर्तव्यं मदीयं कर्म भावतः। अन्यच्च यादृशं जातं तादृशं किल तद्भवेत् ॥२०॥ अर्चनात्मकभक्तिः सा सदा प्राप्ता नरेण वै। सांगोपांगतया तत्र वसेयं भक्तिभावितः ॥२१॥ न मत्समं भवेज्जातु वेदादिषु विचारतः। मयि श्रेष्ठत्वमापन्नं श्रेष्ठं मन्नमनं भवेत् ॥२२॥ यदा वै मत्समं नास्ति चित्ते यस्य प्रतिष्ठितम्। तदा वंदनजा भक्तिः प्राप्ता तेन न संशयः ॥२३॥ तस्य श्रेष्ठत्वभावेऽहं सदा तिष्ठामि सर्वतः। भक्तिभोक्ता स्वयं भूत्वाऽन्यत्र श्रेष्ठत्वनाशकः ॥२४॥ गणेशोपासनामार्गो यथा शास्त्रेषु दृश्यते। तं दृष्ट्वा तादृशं भूत्वा गाणपत्योऽभिमानतः ॥२५॥ मां भजेत् यः स्वभावेन गाणेशाऽहंकृतेर्धरः। तेन दास्यं समापन्नं भक्तिभावेन भावितम् ॥२६॥ गाणपत्यस्वभावेऽहं तं स्थास्यामि स्वभावतः। दास्यभक्तिविभोगार्थमेकनिष्ठाप्रकाशकः ॥२७॥ मित्रस्य सन्निधाने तु यथा गोप्यं न विद्यते। बाह्यांतरं च मित्रस्य मित्रं जानाति सर्वतः ॥२८॥ तथा बाह्यांतरैर्हीनो दंभहीनः स्वभावतः। भजते मां नरो यस्तु सख्यं प्राप्तं मदीयकम् ॥२९॥ यत्र कुत्र स्थितेनैव यद्यन् मनसि संधृतम्। गणेश्वरेण तज्ज्ञातं सर्वांतर्यामिनाऽखिलम् ॥३०॥ एतादृशविचारेण भययुक्तेन चेतसा। सर्वभावेन मां यस्तु भजतेऽनन्यचेतसा ॥३१॥ तस्य सख्ये सदाऽहं वै तिष्ठेयं भक्तिलोलुपः। बाह्यांतरैकभावेषु मोहितस्तस्य चेष्टया ॥३२॥ पंचधा चित्तभूमिर्या तां त्यक्त्वाऽहं तया विना। गणेशोऽहं न संदेहो येनात्मेति निवेदितः ॥३३॥ अहंभावविहीनेऽहं भक्तिभावेन संस्थितः। नैव

भिन्नो भविष्यामि तस्माज्जानीहि भो मुने ॥३४॥ इत्येवं नवधा भक्तिं रसयुक्तां करोति यः। सहते क्षणमात्रं न चित्तं मद्रसहीनकम् ॥३५॥ तदा संपूर्णभक्तो मे जातो वै नात्र संशयः। अहं मोहेन संयुक्तस्तत्र तिष्ठामि सर्वदा ॥३६॥ न क्षणं तं परित्यक्तुं शक्नोऽहं भक्तियंत्रितः। नवधा चित्तभावेन तं रक्षिष्यामि सर्वदा ॥३७॥ न च भक्तिसमो भावो मम प्रीतिकरः कदा। तेन बद्धो भविष्यामि हृदये तस्य धीमतः ॥३८॥ नवधा मां भजंते ये नरा नानाविधाः सदा। तेषां यत्राधिकत्वं च भक्तावेकस्वभावतः ॥३९॥ अधिका च रसोत्पत्तिर्यत्र भक्तौ समागता। तस्यां मुख्यत्वमापन्नं नवधा भवने सति ॥४०॥ तत्र मुख्यस्वभावेन भक्तराजाश्च ये स्थिताः। तान् वदामि महाभाग शृणु तत्त्वमिदं महत् ॥४१॥ श्रवणे मद्गुणानां यदाधिक्यं खलु विद्यते। तत्र वै कार्तिकेयश्च भक्तराजः प्रकीर्तितः ॥४२॥ कीर्तने भक्तराजस्तु सूर्य आत्मा शरीरिणाम्। स्मरणे रामचंद्रो वै भक्तराजः स्मृतो बुधैः ॥४३॥ पार्वती पादसेवायां भक्ताधीशा च संस्मृता। महाविष्णुः स्वयं राजा भजनामर्चने मम ॥४४॥ वंदने भक्तराजेन्द्रः शंकरः सर्वभावतः। दास्ये भक्ताधिपः प्रोक्तो रामो वै जमदग्निजः ॥४५॥ सख्ये चतुर्मुखः साक्षाद्भक्तानामधिपः स्मृतः। वैयासकिः शुको भूपो मयि त्वात्मनिवेदिनाम् ॥४६॥ एते भक्ताधिपाः प्रोक्ता अंतरायविहीनकाः। मां भजंते महाभागा ब्रह्मभूतास्ततोऽप्यहो ॥४७॥ त्वं तेषां च सदा राजा कृतो मे नाऽत्र संशयः। पूर्णभक्तिस्वभावेन मां भजिष्यसि यत्नतः ॥४८॥ नवधा भक्तिभावेषु नवाधिक्यं भविष्यति। पूर्णभक्तो मदीयस्त्वं भक्तेशेशः कृतो मया ॥४९॥ मद्भक्तो त्वत्समो नैवाभवन्न प्रभविष्यति। वर्तते न कदा विप्र त्वदर्शनोऽहमंजसा ॥५०॥ नवांगवायुना स्पृष्टाः पूता वै दर्शनादिभिः। भविष्यंति न संदेहो ब्रह्मबुद्धियुतास्तथा ॥५१॥ सूत उवाच । एवमुक्त्वांतर्दधेऽसौ गणेशो ब्रह्मनायकः। तदादि स मुनिः प्रोक्तः सर्वेषां वेदतां गतः ॥५२॥ मुद्गलस्य चरित्रं यः शृणुयाद्वा पठेन्नरः। श्रावयेद्भावयुक्तेभ्यः स वै सर्वार्थसिद्धिभाक् ॥५३॥ इह भुक्त्वाऽखिलान् भोगानंते ब्रह्ममयो भवेत्। भक्तराजेंद्रता तस्य विघ्नेशस्य भविष्यति ॥५४॥

॥ ओंमिति श्रीमदान्त्ये पुराणोपनिषदि श्रीमन्मौद्गले महापुराणे प्रथमे खण्डे वक्रतुंडचरिते मुद्गलवरप्रदानं नाम द्वाविंशोऽध्यायः ॥

॥ श्रीगणेशाय नमः ॥ दक्ष उवाच ॥ धन्योऽसि योगिराजोऽसि भक्तराजेन्द्रता च ते। मदीयं भाग्ययोगेन संप्राप्तं दर्शनं प्रभो ॥१॥ अष्टौ ये गणराजस्य ह्यवताराः प्रकीर्तिताः। तान् मे कथय योगीश विस्तरेण महामुने ॥२॥ दैत्याः संनिहिता-स्तैस्तु तेषां जन्मादिकं परम्। सकलं युद्धभागं मां कथयस्व विशेषतः ॥३॥ एतादृशा महादैत्या न श्रुताः कुत्रचित्प्रभो। विस्मापयति चेयं मां कथा पापापनोदिनी ॥४॥ मुद्गल उवाच। प्रजापते कथां दिव्यां तव भावनियंत्रितः। कथयामि समासेन गणनाथप्रमोदिनीम् ॥५॥ प्रथमं वक्रतुंडस्य चरित्रं शृणु पुण्यदम्। मत्सरासुरयुद्धं च गणेशेन महाद्भुतम् ॥६॥ इंद्रस्येंद्रपदप्राप्तिर्जाता यस्मिन् दिने परा। तस्मिन् दिने महोत्साहो वार्षिकः क्रियते मुने ॥७॥ कदाचिदमरावत्यां महोत्सवपरायणः। सुभद्रासनगोतिष्ठद्देवेंद्रः सर्वपूजितः ॥८॥ तावद्देवाः सगंधर्वा अप्सराभिः समागताः। नागा यक्षा मुनींद्राश्च राक्षसा देवयोषितः ॥९॥ आगतो भगवांस्तत्र सर्वभूतगणैर्वृतः। स्कंदनंदीश्वराद्यैश्च पार्वत्या सह शंकरः ॥१०॥ लक्ष्म्या सह स्वयं विष्णुर्विष्वक्सेनादिभिर्गणैः। वेदादिभिर्वृतो ब्रह्मा प्रजापतिभिरराययौ ॥११॥ सर्वग्रहैः समायुक्तो भानुस्तत्रागमत् स्वयम्। अग्निश्च धर्मराजश्च कुबेरो वरुणस्तथा ॥१२॥ आदित्या मनवश्चैव वसवो रुद्रकास्तथा। साध्या विद्याधरा विश्वेदेवास्तत्राययुः प्रभो ॥१३॥ अश्विनौ शेषनागश्च बहवस्तत्र चागताः। उपविष्टा मुदा युक्ता उत्सवे वै शतक्रतोः ॥१४॥ तत्र नाना कथाश्चक्रुरानंदपरिवर्धिनीः। मुनयो भावसंयुक्ताः पुरातनभवा मुने ॥१५॥ नृत्यमप्सरसश्च-क्रुर्गंधर्वा ललितं जगुः। हाहाहूहूमुखा अन्ये तुंबरुर्नारदस्तथा ॥१६॥ वादयन्ति स्म वादित्रं तान् स्तुवंति स्म चारणाः। हृष्टा पुष्टा जनास्तत्र स्त्रियः परमहर्षिताः ॥१७॥ तत्र रंभा विचित्राणि नृत्यादीनि चकार ह। हावभावप्रयुक्तानि चेष्टितानि प्रजापते ॥१८॥ कंदुकक्रीडनोद्युक्ता सभायां यत्र तत्र सा। बभ्राम तां प्रपश्यन् सन्निंद्रोऽभूत् कामपीडितः ॥१९॥ मोहितो मंजुलरवैर्नृत्यादिकलया तथा। कर्तव्यं नैव संजज्ञौ तन्मनाः स सुरेश्वरः ॥२०॥ शीघ्रमेव समाप्तं तमुत्सवं कृतवान् स्वयम्। सर्वे स्वस्वस्थलं जग्मुर्मानिता हर्षिता विभो ॥२१॥ रंभां निमंत्र्य चेंद्रश्च जगाम वनमेकलः। नानापरिमलैर्युक्ता यत्र वृक्षाः सुपुष्पिताः ॥२२॥ नानाप्रस्रवयुक्तानि निर्मलानि जलानि च। सुवर्णपद्मशोभानि षट्पदैः शोभितानि च ॥२३॥ इत्यादिकामपुष्टानि नानावस्तुयुतानि च। वनानि तत्र रेमे सावेंद्रः कामविमोहितः ॥२४॥ रंभयासक्तचित्तस्य वज्रिणः क्रीडतो भृशम्। न तृप्तिरभवत्तत्र घृतेन दहनस्य वा ॥२५॥ तत्राजगाम दुर्वासाः स्वेच्छया विचरन् मुनिः। तं दृष्ट्वा लज्जितो

राजा देवानां विनयं श्रितः ॥२६॥ त्यक्त्वा रंभां नमस्कृत्य तं मुनिं प्रांजलिः स्थितः। तादृशं तं परित्यज्य जगाम मुनिसत्तमः ॥२७॥ अतिविह्वलगात्रत्वाचस्कंद सुरशत्रुहा। रेतोऽभूत् पतितं भूमौ तस्माद्दैत्यसमुद्भवः ॥२८॥ इंद्रोऽपि स्वगृहं गत्वा रंभां त्यक्त्वा चकार ह। सुराणामखिलं राज्यमात्मानं निंदयन्मुहुः ॥२९॥ अहो धिक् बत राज्यं मे सुरगणां स्त्रीजितस्य च। असुरगणामिवात्यंतं मनो मे चंचलं भृशम् ॥३०॥ पुंश्चल्या मोहितं नित्यं धिङ् मां साध्वभिनिंदितम्। कुकर्मकृत्यदोषाच्च भयमग्रे भविष्यति ॥३१॥ इत्येवमात्मनात्मानं निंदयामास देवपः। स्वधर्मे संस्थितो दक्ष वृत्रहा पुनरेव च ॥३२॥ इंद्रवीर्याच्च कालेन भूम्यां जातो महासुरः। तं पृथ्वी पालयामास स्तनपानादिना भृशम् ॥३३॥ स तु संववृधे तत्र हिमाचल इवापरः। आजानुबाहुर्दीर्घाक्षो महावक्षा महाबलः ॥३४॥ रक्तवर्णः क्रूरकर्मा यथाग्निर्ज्वलितो बभौ। नाम तस्याऽकरोद्भूमिर्भस्मरोति स्वभावतः ॥३५॥ पंचवर्षवयोगस्य चोपवीतप्रदानकम्। ब्राह्मणैः कारयामास धरित्री स्नेहभावतः ॥३६॥ स तु वेदादिकं सर्वं शिक्षितुं गुरुसन्निधौ। स्थित आर्जवसंयुक्तो ग्राहकः श्रवणेन वै ॥३७॥ महाबुद्धिः स कालेनाल्पेन वेदादिपारगः। दुर्बुद्धिः कन्यकां रम्यां तामुवाह विलासिनीम् ॥३८॥ नाम्ना मदकराख्याता सर्वावयवशोभिनी। चतुरा सर्वकार्येषु विषयस्य विवर्धिनी ॥३९॥ एकस्मिन् दिवसे तस्य मतिर्जाता दुरात्मनः। विपुलं सुतपस्तप्त्वा जेयं ब्रह्मांडमोजसा ॥४०॥ स शुक्रमुपसंगम्य विद्यां पंचाक्षरीमगात्। तपसा च तया शंभुं तोषयामास भक्तितः ॥४१॥ निर्जने वन एकांते पुष्पपल्लवशोभिते। कंदमूलफलोपेते सुजले संस्थितोऽतपत ॥४२॥ दिव्यवर्षसहस्रं स निराहारतया स्थितः। जपन् पंचाक्षरं मंत्रं ध्यात्वा हृदि सदाशिवम् ॥४३॥ दीक्षां पाशुपतीं धृत्वा तोषयामास शंकरम्। तस्य प्रतपसा देवाः क्षुभिताश्च समंततः ॥४४॥ न प्रकाशो रविरासीत्नाग्निर्जज्वाल भास्वरः। भूतान्याकुलतां तत्र प्रापानि तपसो बलात् ॥४५॥ देवाः सर्षिगणाः सर्वे शंकरं शरणं ययुः। मत्सरस्य तपस्तप्तात् रक्ष नो जगदीश्वर ॥४६॥ शंकरस्तैः समायुक्तः पार्वत्या स्वगणैः सह। तं देशमगमद् द्रष्टुं भक्तं ज्ञातुं महाद्भुतम ॥४७॥ अस्थित्वचासमायुक्तं श्वासमात्रावशेषितम। हीनांगमावृतं तत्र वल्मीकेन समंततः ॥४८॥ महाग्रतपसा युक्तं देवाः सर्वे विसिस्मिरे। ऋषयोऽपि महाभागा दृष्ट्वा तं तापसं परम ॥४९॥

॥ ओमिति श्रीमदान्दे पुराणोत्तरनयदि श्रीमत्सेंद्रले महापुराणे प्रथमे खण्डे वक्रतुंडचरिते मत्सरासुरतपोवर्णनं नाम त्रयोविंशतितमोऽध्यायः ॥

॥ श्रीगणेशाय नमः ॥ मुद्गल उवाच । मत्सरासुरमुग्रं तं तापसं शांभवं प्रभो । बोधयामास तं शंभुर्दानवेंद्रं महाबलम् ॥१॥ शंकर उवाच । भो भो मत्सर चोत्तिष्ठ वरान् वरय सुव्रत । तवोग्रतपसा भक्त्या संतुष्टोऽहं ददामि तान् ॥२॥ अहो धैर्यमहो धैर्यं धन्यं ते तापसोत्तम । देहभावमतिक्रम्य स्थितोऽसि दृढभक्तितः ॥३॥ क्लेशं त्यज तपो जातं सिद्धिं प्राप्तां तपोभुवम् । पश्येच्छसि तथा यं यं तं तं दास्यामि दुर्लभम् ॥४॥ शिवस्य वचनं श्रुत्वा प्रबुद्धो मत्सरासुरः । उन्मील्य लोचनेऽपश्यच्छंकरं पुरतः स्थितम् ॥५॥ शिवदर्शनमात्रेण सत्तावानभवत्किल । उत्थाय तं नमस्कृत्य विनम्रः प्रेम-विह्वलः ॥६॥ उवाच तं महाबुद्धिः शिवं कल्याणकारकम् । भक्तानां कल्पवृक्षं च पार्वतीसहितं प्रभुम् ॥७॥ मत्सरासुर उवाच । धन्यो वंशो मदीयोऽद्य जन्म संपत्तिशास्त्रजम् । ज्ञानं मे जनको माता तपो धन्यं महत्प्रभो ॥८॥ मुनयो यं न जानंति योगिनो ध्यानशालिनः । वेदाः स्मृतिसमायुक्तास्तं पश्यामि सदाशिवम् ॥९॥ एवमुक्त्वा नमस्कृत्य पूजयामास हर्षतः । ऋषिदेवयुतं शंभुं भक्तिभावसमन्वितः ॥१०॥ यथाविधि स संपूज्य शंकरं दंडवत् क्षितौ । प्रणिपत्य समुत्थाय प्रांजलिः स्तोत्रमाकरोत् ॥११॥ मत्सरासुर उवाच । नमस्ते त्रिदशेशाय शंकराय शिवाय च । निर्गुणाय गुणानां चेशाय सर्व-गुणाय ते ॥१२॥ अपाराय महादेव पिनाकधर ते नमः । नमो नमो महेशाय सर्वाधिपतये नमः ॥१३॥ उमाकांत नमस्तुभ्यं भक्तसंरक्षकाय च । भक्तिप्रियाय देवाय सर्पहाराय ते नमः ॥१४॥ वृषध्वजाय नंदीशवाहनाय त्रिशूलिने । भस्मांग-रागधाराय व्याघ्रांबरधराय ते ॥१५॥ भालचंद्र नमस्तुभ्यं पंचवक्त्राय शंभवे । दशबाहुधरायैव त्रिनेत्राय कपालिने ॥१६॥ जटाजूटधरायैव नमो गंगाधराय ते । गिरिशाय नमस्तुभ्यं गजचर्मधराय ते ॥१७॥ सदा ब्रह्ममयायैव नमो ब्रह्मप्रदायिने । निराधाराय नित्याय सुयोगिपतये नमः ॥१८॥ अपारगुणधाराय रुद्राय तु नमो नमः । किं स्तौमि त्वां महादेव यत्र वेदा विकुंठिताः ॥१९॥ इति स्तुत्वा महेशानं मत्सरः प्रणनाम तम् । उत्थितं तं शिवः प्राह वरं वरय सुव्रत ॥२०॥ इदं त्वया कृतं स्तोत्रं मम प्रीतिविवर्धनम् । पठते शृण्वते सर्वकामदं प्रभविष्यति ॥२१॥ विद्यामायुः सुखं राज्यं पुत्रपौत्रादिकं च यत् । भुक्तिं मुक्तिं प्रदास्यामि स्तोत्रेण स्तुवतेऽसुर ॥२२॥ श्रुत्वा शिववचो रम्यं प्रहृष्टो मत्सरोऽब्रवीत् । विनयावनतो भूत्वा शिवं भक्तवरप्रदम् ॥२३॥ मत्सर उवाच । यदि देवेश तुष्टोऽसि यदि दास्यसि मे वरान् । तदाऽभयं ते सर्वत्र भक्तिं देहि सदाशिव ॥२४॥ पंचभूतात्मकं सर्वं त्रिगुणैः सुविराजितम् । तस्मान्मे मरणं शंभो न कदाचिद्भवेदिह ॥२५॥

आरोग्यादिसमायुक्तमैश्वर्यं देहि शाश्वतम् । ब्रह्मांडस्य च राज्यं मे देहि देहि सदाशिव ॥२६॥ मुद्गल उवाच । तस्यैतद्वचनं श्रुत्वा शिवो विस्मितमानसः । देवाः सर्षिगणाः सर्वे विस्मिताः प्राभवन् तदा ॥२७॥ किमुक्तं मत्सरेणैवं का गतिर्वा भविष्यति । तपसोग्रेण संतुष्टः शिवस्तं प्रत्युवाच ह ॥२८॥ शिव उवाच । यत्त्वया प्रार्थितं दैत्य तत्सर्वं ते भविष्यति । उग्रेण तपसा तुभ्यं मया दत्तं सुदुर्लभम् ॥२९॥ मुद्गल उवाच । वरान् सुदुर्लभान् प्राप्य मत्सरो गृहमागमत् । हर्षितो हर्षयन् सर्वान् सुहृदो मातरं स्त्रियम् ॥३०॥ आह्लादेन सदा तत्र स्थितो मान्यैः स मानितः । नानाभोगान् प्रभुंजानः सुहृद्भ्यः सुखदायकः ॥३१॥ पुत्रौ मदकरायां द्वौ जनयामास मत्सरः । अतिकांतियुतौ तुल्यौ पित्रा वीर्येण तेजसा ॥३२॥ सुंदरप्रिय इत्येवं नाम ज्येष्ठस्य सोऽकरोत् । विषयप्रियनामाभूत्कनिष्ठः प्रीतिदः परः ॥३३॥ एकस्मिन् दिवसे दैत्यः श्वशुरस्य गृहं गतः । तत्र नानाविधा दैत्या मिलितास्तमबोधयन् ॥३४॥ दैत्या ऊचुः । किं स्थितोऽसि महातेजस्त्वद्दास्यवशगा वयम् । जेष्यामः सर्वदेवादींस्त्वन्माहात्म्येन मत्सर ॥३५॥ त्वत्समो नैव वीरोऽस्ति ब्रह्मांडे कुत्रचित्प्रभो । वरदान-बलाढ्यस्त्वं निर्भयोऽसि महासुर ॥३६॥ आज्ञां देहि गमिष्यामो जेतुं देवान्न संशयः । शस्त्रास्त्रैस्तान्विनिर्भिद्य भवाम स्वर्गभोगिनः ॥३७॥ मुद्गल उवाच । दैत्यानां वचनं श्रुत्वा मत्सरस्तानुवाच ह । भवद्भिः कथितं सर्वं हितकारकमुत्तमम् ॥३८॥ ममापि हृदये नित्यमेवं वसति दानवाः । किं करोमि च मे माता निवारयति मां सदा ॥३९॥ इंद्रस्ते स पिता पुत्र देवाः पूज्याः सदा सदा । अतो धर्मेण वर्तस्व येनेहपरलोकभाक् ॥४०॥ मत्सरस्य वचः श्रुत्वा दैत्यास्ते त्वब्रुवन् वचः । अखिलं धर्मकरणं याथार्थं भावपूर्वकम् ॥४१॥ दैत्या ऊचुः । शृणु मत्सर वृत्तांतं पुराभूतं स्वधर्मजम् । अस्माकमेव मान्यं यत्तव संशय-नाशकम् ॥४२॥ जलंधरः समुत्पन्नः शिववीर्यान्महाबलः । तेन शंभुर्जितः संख्ये देवाः सर्वे च निर्जिताः ॥४३॥ पार्वतीं दारभावार्थं ग्रहीतुं तत्परोऽभवत् । दैत्या एतादृशा जाता बहवो मत्सरासुर ॥४४॥ यत्र मान्याः संति देवास्तत्र दैत्याः प्रदूषिताः । दैत्या मान्यास्तदा देवा दूषिताः प्रभवंति वै ॥४५॥ देवेंद्राः शत्रवः संति दैत्यानां सततं प्रभो । अतस्त्यक्त्वा स्वसंदेहं जय देवान् महाबल ॥४६॥ त्यज तां मातरं पृथ्वीं मुनिदेवसहायिनीम् । वसात्र त्वं महाभाग अस्माभिः सहितः सदा ॥४७॥ तेषां वचनमाकर्ण्य मत्सरोऽहितकारकम् । तथैव कृतवांस्तत्र त्यक्त्वा पृथ्वीमुवास ह ॥४८॥

॥ इतिश्री श्रीमदांत्ये पुराणोपनिषदि श्रीमन्मौद्गले महापुराणे प्रथमे खंडे वक्रतुण्डचरिते मत्सरासुरसमागमो नाम चतुर्विंशतितमोऽध्यायः ॥

॥ श्रीगणेशाय नमः ॥ मुद्गल उवाच ॥ शृणु दक्ष महाभाग कथां पापप्रणाशिनीम् । वक्रतुंडावतारस्य प्रयोजनविकाशिनीम् ॥ १ ॥ दैत्याः संभूय सर्वे ते गताः शुक्रं महामुनिम् । दंडवत्तं प्रणेमुश्च मत्सरेण समन्विताः ॥२॥ शुक्रस्तान् मानयामास किमर्थं यूयमागताः । भवता कार्यसिद्धिर्या तां करिष्यामि यत्नतः ॥ ३ ॥ शुक्रस्य वचनं श्रुत्वा सुधारससमं मुने । हर्षिताः प्रणिपत्यैनमूचुः सर्वे हितावहम् ॥ ४ ॥ तव स्वामिन् प्रसादेन मत्सरः कुलधारकः । अस्माकं सर्वभागस्य फलरूपस्तथा कृतः ॥ ५ ॥ वरान् प्राप्य महाबाहुरस्माकं हितमाश्रितः। दैत्यानां दानवादीनां राजाऽयमिति निश्चितम् ॥ ६ ॥ तस्य राज्याभिषेकार्थं याहि त्वं सर्वमानद । अस्माकं धामसर्वस्वं त्वमेव मुनिसत्तम ॥७॥ दैत्यानां वचनं श्रुत्वा शुक्रोऽवादीत् तथेति च । अगमत् राज्यलाभार्थं मत्सरस्य दुरात्मनः ॥ ८ ॥ मिलितास्तत्र सर्वे ते दैत्यदानवराक्षसाः । हर्षेण महता युक्ता महोत्सवपरायणाः ॥ ९ ॥ तेषां मुख्यान् महाभागांस्तान् छृणुष्व प्रजापते । संक्षेपेण प्रवक्ष्यामि प्राधान्येन महत्तमान् ॥ १० ॥ नमुचिः शंबरः शुंभो निशुंभः कालभैरवः । विरोचनो विप्रचित्तिः प्रह्लादो महिषासुरः ॥ ११ ॥ अंधकासुरनामा च रुरुदैत्यः प्रतापवान् । इत्याद्या बहवो दैत्या मिलितास्तस्य चोत्सवे ॥१२॥ यथाविधि तथा तत्र ब्राह्मणैर्वेदपारगैः । ऋग्यजुःसाममंत्रैश्चाभिषिक्तो मत्सरोऽभवत् ॥ १३ ॥ उशनाः सर्वकर्ताभूत्तेषां मध्ये प्रतापवान् । साक्षाद्योगी गणेशस्य महाभक्तो महामुनिः ॥१४॥ दैत्यादीनां स राजाभून् मत्सरः परवीरहा । शुशुभेऽतीव तेजस्वी मध्याह्नार्क इव श्रिया ॥१५॥ सर्वे स्वस्वगृहं जग्मुः सनाथाश्च वयं कृताः । शुक्रेणेति वदन्तस्ते हर्षयुक्ता प्रजापते ॥१६॥ गते कियति काले च मत्सरः स मनो दधे । ब्रह्मांडजयने दुष्टो जुहाव सकलासुरान् ॥१७॥ आगतास्ते त्वराभाजः किं कार्यं वद मानद । तानुवाच जयाकांक्षी त्रैलोक्यं वशमानये ॥१८॥ तस्य तद् वचनं श्रुत्वा हृष्टाः सर्वे महाऽसुराः । नदंतो मेघसन्नादैः कालानां कलनात्मकैः ॥१९॥ शस्त्रास्त्राणि ह्यमोघानि धृत्वा वाहनगा बभुः । सन्नद्धाः सर्वभावेन चतुरंगबलान्विताः ॥२०॥ पदातयो ह्यसंख्याता नानाशस्त्रधरास्तथा । पर्वतद्रुमपाषाणहस्ताः संनिःसृताः प्रभो ॥२१॥ सिंदूरारुणभालाश्च मुक्तकेशा महाबलाः । उड्डीयोड्डीय धावंतः शिक्षायुद्धकरास्ततः ॥२२॥ शस्त्रयुद्धे मल्लयुद्धे गदायुद्धे विशारदाः । अस्त्रयुद्धविचारज्ञा निःसृताः प्रासधारकाः ॥२३॥ धूलिव्रजेन तेषां तु भास्करो निष्प्रभः कृतः । अग्रे दैत्यस्य सेनाया भूषणानि यथा बभुः ॥२४॥ तथा हस्तिसहस्राणां सहस्राणि ययुः पुरः । धातुभी रंजितान्येव नानाचित्रैर्महामुने ॥२५॥ सिंदूरारुण-

भालानि लसत्कुंभधराणि च। घंटासांद्रनिनादैश्च नादितानि त्वितस्ततः ॥२६॥ महावीराश्रितान्येव कुंतलाद्यस्त्रकैस्तथा। पूर्णानि चंचलाश्चैव पर्वता इव शोभिताः ॥२७॥ गिरीणां चैव दंताग्रैर्भेदकानि प्रजापते। शुंडाभिर्वृक्षजालानां छेदकानि महांति च ॥२८॥ मदनासिक्तभालानि भ्रमरैर्गुंजितानि च। रणे शत्रुसहस्राणां नाशकाराणि सर्वशः ॥२९॥ निःसृतानि पुरेभ्यश्च सेनाशोभाकराणि च। दैत्यैः सुदारुणैस्तानि स्वाश्रितानि समंततः ॥३०॥ ततोऽश्वानां महासेना निःसृता बलवत्तराः। चंचला वायुवेगाश्च तत्राऽश्वाः पूर्णभूषिताः ॥३१॥ चामरैर्वीजिताश्चैव मनोवेगा महाबलाः। उड्डीयोड्डीय धावंत आकाशे वायवो यथा ॥३२॥ खुराघातैर्विस्फुलिंगान् प्रस्रवंत इतस्ततः। नानाशस्त्रधरास्तत्र दैत्या रजुर्यथा घनाः ॥३३॥ कालस्य भयदाः सर्वे नानायुद्धविशारदाः। अपाराश्च समारूढा दारुणाः पापनिश्चयाः ॥३४॥ तत्र केचिन्महादैत्याः खरारोहा विनिःसृताः। अजयानाधिरूढाश्च गोवाहनविराजिताः ॥३५॥ महिषारूढकाश्चान्ये व्याघ्रारूढा महाबलाः। सिंहशार्दूलवाहाश्च खगवाहास्तथापरे ॥३६॥ इत्यादिचित्ररूपेषु वाहनेषु विराजिताः। निःसृता असुराः सर्वे यमसन्नुमिवोद्यताः ॥३७॥ ततो रथसमारूढा रथिनो निःसृताः प्रभो। अपाराश्च महाक्रोधारुणनेत्रा भयंकराः ॥३८॥ रथाश्वालंकृतास्तत्र मणिमुक्तादिभिः परैः। नानाशस्त्रास्त्रभारैश्च पूरिता मेघघोषिणः ॥३९॥ ध्वजैरलंकृताः पूर्णा अश्वैर्जवनशालिभिः। संयुताश्चतुरैः सूतैर्महावीरैः समाश्रिताः ॥४०॥ रथाः खरयुताः केचिद् वृकैर्वै वाहिताः परे। सिंहगोभिर्गजैर्ऋक्षैर्नानापशुभिरावृताः ॥४१॥ तत्र वज्रसमांगैश्च खरैः शतमितैर्युतम। अलंकृतं रथं दैत्यो मत्सरः स समारुहत् ॥४२॥ तस्याऽग्र तत्सुतौ शूरावश्वारूढौ प्रजग्मतुः। विरोचनादयो दैत्याः समंतात्तत्सुराजिषु ॥४३॥ पृथिव्यां तस्य सैन्यं तत समुद्र इव संबभौ। महारथमहावीरयुद्धभूषणभूषितम ॥४४॥

॥ ॐ इति श्रीमदान्त्ये पुराणोपनिषदि श्रीमन्मौद्गले महापुराणे प्रथमे खंडे वक्रतुंडचरिते मत्सरासुरसेनावर्णनं नाम पंचविंशोऽध्यायः ॥

॥ श्रीगणेशाय नमः ॥ शुक्र उवाच। ततो दक्ष महत्सैन्यं पृथिवीजयनोद्यतम। हनने क्षत्रियाणां तत्प्रवृत्तं कालचक्रवत् ॥१॥ विरोचनादयो दैत्याः स्थिता यत्र यमोपमाः। युद्धं तैः सह कुर्वाणः कः स्थास्यति पुमान् भुवि ॥२॥ दैत्याः पादप्रहारेण

चूर्णयंतोऽद्रिसंचयान् । शेषमस्तकमानम्य भारेणैव प्रचक्रिरे ॥३॥ तान् मेघसदृशान् दृष्ट्वा पर्वताकारसंस्थितान् । अभवन् यमरूपान् ते क्षत्रिया गतजीविनः ॥४॥ केचित्पलायितास्तत्र केचिच्च शरणं ययुः । महावीरास्तु ते युद्धं कृत्वा स्वर्गं ययुर्मृताः ॥५॥ ये मृतास्तत्सुतास्तैस्तु स्थापिताः करदायिनः । शरणागतराजानः स्थापिताः स्वपदे तथा ॥६॥ यच्च राजविहीनं तु दैत्यास्तत्राधिपाः कृताः । राजानः सर्वविषये बभूवुर्भोगसंयुताः ॥७॥ देशे देशे तथा दैत्याः क्षत्रियाणां च सन्निधौ । स्थापिता भावबोधार्थमेवं सर्वत्र कारितम् ॥८॥ सद्वीपां वसुधां सर्वां जित्वा दैत्यो ननंद ह । मत्सरोऽतिवशां पृथ्वीं तत्र दृष्ट्वा प्रजापते ॥९॥ पातालमगमद्दैत्यो दैत्यवृंदसमन्वितः । मत्सरो नागसर्पाणां जयार्थं बलवांस्ततः ॥१०॥ नागोद्यानानि गत्वा ते बभंजुर्दितिनंदनाः । तान् दृष्ट्वा नागराजा वै युद्धार्थं समुपाययुः ॥११॥ वासुकिस्तक्षकश्चैव कंबलाश्वतरौ तथा । इत्याद्या बहवो नागा नागराजाः समाययुः ॥१२॥ सन्नद्धाः क्रोधयुक्तास्ते महाभोगा महाबलाः । रथादिषु समारूढा नानावाहनगा बभुः ॥१३॥ शस्त्रास्त्रनिचयैर्बाणैर्दैत्यान् जघ्नुर्महाबलान् । दैत्यास्तान् शस्त्रसंघातैः पातयामासुरोजसा॥१४॥ नागैर्महाबैलस्तत्र निहता दैत्यसंचयाः । भग्नदर्पाः पलायंत दशदिक्षु सुविह्वलाः ॥१५॥ दैत्यानां कदनं दृष्ट्वा विरोचनमुखाऽऽययुः । असुराः क्रोधसंयुक्ता नागांश्चामर्दयंस्तु ते ॥१६॥ शस्त्रास्त्रैर्विविधैर्दैत्या मारयामासुरोजसा । केषांचिन् मस्तका भग्नाः पादहस्तोदरं तथा ॥१७॥ शोणितानां महानद्यः प्रास्रवन् वै दिशो दश । भग्नदर्पा भयान्नागाः पलायनमकुर्वत ॥१८॥ केचित्तान् शरणं जग्मुर्दैत्यान् परमदारुणान् । हाहाकाररवैर्युक्ता नागास्त्राससमन्विताः ॥१९॥ दैत्यानां पौरुषं दृष्ट्वा वासुकिप्रमुखाऽऽययुः । क्रोधेन परितप्तांस्तान् वारयामासुरोजसा ॥२०॥ तक्षकादिमहानागा विषं क्षुब्धाश्च तत्यजुः । विवरं तद्विषैः सर्वं व्याप्तं तत्र प्रजापते ॥२१॥ महाविषभवा ज्वाला ददाहासुरपुंगवान् । मृता दैत्या अनेके च गरलेन प्रपीडिताः ॥२२॥ न स्थातुं शक्यते तत्र दैत्यैः संग्राममंडले । शस्त्राणि तेषां सर्वाणि दग्धानि च तदा किल ॥२३॥ गजाश्वरथपादातं मृतं दग्धं च सर्वशः । मूर्छिताः पतिता भूमौ विरोचनमुखास्ततः ॥२४॥ नागा मोदं प्रचक्रुस्ते नादयंतो दिशो दश । हर्षेण महता युक्ता नृत्यंति स्म स्थिताः परे ॥२५॥ एतस्मिन्नंतरे तत्र प्रतापी च विरोचनः । उत्थितः समरश्लाघी गतपीडो महाबलः ॥२६॥ शुक्रेण तत्र दैतेया विद्यया निर्विषाः कृताः । उत्थिताः सर्वतः सर्वे अंधकप्रमुखा बभुः ॥२७॥ असुराः क्रोधसंयुक्ता गरुडास्त्रं च तत्यजुः । तस्मात्तु गरुडा जाता नागान् सर्वानभुंजत ॥२८॥ तत्र वासुकिना तेन विषज्वाला प्रवर्तिता ।

गरुडाश्च तया दग्धा गरुडास्त्रं तथाऽभवत् ॥२९॥ एतत् दृष्ट्वा महाश्चर्यं वासुकेः पौरुषं महत् । विरोचनादयः सर्वे गरुडा माययाऽभवन् ॥३०॥ तैः सर्वैर्भक्षितं सैन्यं नागानां तद्दिशो दश । पलायंत भयोद्विग्ना महानागाश्च भीरवः ॥३१॥ सर्पराट् तक्षकाद्या ये गरुडैः पीडिता भृशम् । मूर्छिताश्च मृतप्राया जाता युद्धे च दारुणे ॥३२॥ शेषेण सर्ववृत्तांतो ज्ञातो ज्ञातिभयंकरः । आययौ साम्भावेन शरणं दैत्यसन्निधौ ॥३३॥ किमर्थं क्रोधसंयुक्ता दैत्या ब्रूत महाबलाः । भ्रातरस्त्व-सुरा यूयं मदीया नात्र संशयः ॥३४॥ किमर्थं युद्धमारब्धं वक्तव्यं दितिनंदनाः । पातालवासिनः सर्वे भवंतो वयमेव च ॥३५॥ मुद्गल उवाच । शेषस्य वचनं श्रुत्वा प्रतापी च विरोचनः । उवाच तं वचो रम्यं तेजोयुक्तं स्वभावतः ॥३६॥ विरोचन उवाच । शेष शेष महाभाग मान्योऽसि च महामते । स्नेहेन वदामि प्राज्ञ सत्यं शृणु च मद्वचः ॥३७॥ अस्माकं मत्सरो राजा ब्रह्मांडं वशमात्मनः । इच्छत्याशासनं तस्य ग्राह्यं युष्माभिरादृतैः ॥३८॥ नोचेन्नागासुराणां च विनाशः प्रभ-विष्यति । त्वं श्रेष्ठः सर्वभावेन सर्वेषां हितमाचर ॥३९॥ विरोचनवचः श्रुत्वा शेषः सर्वार्थकोविदः । प्रहसंस्तमुवाचेदं सामयुक्तं महामतिः ॥४०॥ यदिच्छति महाभागो मत्सरस्तत् करोम्यहम् । इत्युक्त्वा दातुमुद्युक्तः करभारं च वार्षिकम् ॥४१॥ नानारत्नानि दत्त्वा वै साम चक्रेऽसुरैः सह । नागान् वासुकिमुख्यान स गृहीत्वा स्वस्थलं ययौ ॥४२॥ असुरा हर्षिताः सर्वे जितनागा महाबलाः । पातालजयिनो भूत्वा वरुणं जेतुमाययुः ॥४३॥

॥ इति श्रीमदांत्ये पुराणोपनिषदि श्रीमन्मौद्गले महापुराणे प्रथमे खंडे वक्रतुंडचरिते पातालविजयो नाम षड्विंशोऽध्यायः ॥

❦

॥ श्रीगणेशाय नमः ॥ मुद्गल उवाच । असुरा जयशोभाढ्या वरुणालयमागताः । दूतं संप्रेषयामासुर्वरुणस्य सभां प्रति ॥१॥ वरुणस्य सभां गत्वा दूतो वचनमब्रवीत । शृणु तोयेंद्र वाक्यं मे प्रेषितो मत्सरेण यत ॥२॥ मम वै वशगो भूत्वा तिष्ठ स्थाने महाबल । नोचेत्संग्रामभूमौ त्वां वधिष्यामि सुरांस्तथा ॥३॥ दूतस्य वचनं श्रुत्वा वरुणः क्रोधमूर्छितः । संग्रामाय च सन्नद्धो बभूवातिभयानकः ॥४॥ मकरारूढ एवाऽसौ पाशाद्यस्त्रप्रधारकः । यादांसि देवरूपाणि गृहीत्वा बहिराययौ ॥५॥ दूतेन कथितः सर्वो वृत्तान्तो वरुणस्य तम् । श्रुत्वा मत्सरदैत्येयो दैत्यैर्युद्धोद्यतोऽभवत् ॥६॥ देवानामसुराणां च सैन्ये

परमदारुणे। परस्परं सुसन्नद्धे रणभूमौ प्रजग्मतुः ॥७॥ देवानां सैन्यमत्युग्रं दृष्ट्वा खलु विरोचनः। महिषासुरनामा च शुंभश्चैवांधकासुरः ॥८॥ अन्ये ते बहवस्तत्र धावंतो रणमूर्धनि। नादयंतो दिशः सर्वे जघ्नुर्देवांश्च साहसात् ॥९॥ मिलिता देवदैत्यास्ते परस्परजयेप्सवः। शस्त्रास्त्रैर्वृक्षपाषाणैर्जघ्नुर्वीराननेकशः ॥१०॥ अभवत्तुमुलं युद्धं दैत्यदेवविनाशनम्। दिनत्रयं महाघोरं दैत्या भग्नास्ततोऽभवन् ॥११॥ जलशायिन एवं स्म देवा गर्जंति भैरवम्। मूर्छिता दैत्यभूपाश्च विरोचनमुखास्तथा ॥१२॥ तान् काव्यः सावधानांश्च चकार स्वेन तेजसा। उत्थिताः सर्ववीरास्ते युयुधुस्त्वसुराः पुनः ॥१३॥ क्रोधेन महता युक्ता जघ्नुर्देवान् महाबलान्। पुनश्च तुमुलं युद्धं बभूवातिभयानकम् ॥१४॥ युद्धं चक्रुरहोरात्रं सुराः सर्वे जलौकसः। यादसां च गणाः सर्वे मृता भग्नाः प्रचूर्णिताः ॥१५॥ सर्वे देवगणास्तत्र वव्रजुः सर्वतोदिशम्। वरुणं चदधाराऽपि बलवान् स विरोचनः ॥१६॥ धृतं वरुणमाश्रुत्य दुद्रुवुश्च जलौकसः। मृताः केचित् क्षताः केचिच्छरणं के च तान् ययुः ॥१७॥ हर्षिता नादसंयुक्ता दैतेया जग्मुराहताः। उत्तरे धननाथं ते जलमार्गत एव च ॥१८॥ कुबेरेण स वृत्तांतः श्रुतो वरुणलोकतः। पलायनं समालंब्य कैलासे शंकरं ययौ ॥१९॥ तं तथागतमाश्रुत्य दैत्या परमदारुणाः। अलकायां प्रवेशं ते चक्रुश्च जयशालिनः ॥२०॥ एवं जित्वा कुबेरं तं वरुणेन समन्विताः। धर्मराजं ययुः सर्वे दैतेया मृत्युरूपकम् ॥२१॥ यमराजस्तु संनद्धः श्रुत्वा दूतमुखात् कथाम्। यमो रागैश्च रक्षोभिर्विविधैः परिवारितः ॥२२॥ महिषारूढ एवाऽसौ दंडहस्तो महाबलः। आययौ रणभूमिं च महामृत्युसमन्वितः ॥२३॥ यमं समागतं दृष्ट्वा मृत्युरोगादिभिर्युतम्। दैतेयाः क्रोधसंयुक्ता युयुधुः सहसा बलात् ॥२४॥ देवानां चैव दैत्यानां वीराश्च युयुधुर्भृशम्। परस्परं बोधयंतो जघ्नुर्नानाप्रहारतः ॥२५॥ महाद्भुतं पंचदिनं युद्धं दारुणरूपकम्। नाशकं देवदैत्यानां बभूवैवं प्रजापते ॥२६॥ याम्यैश्च मर्दिता दैत्या मृताः केचित् क्षताः परे। वव्रजुः सर्वशस्तत्र मृत्युसंत्राससतापिताः ॥२७॥ एतस्मिन्नंतरे तत्र विषयप्रिय आगतः। मत्सरासुरपुत्रस्तु युयुधे मृत्युना सह ॥२८॥ मत्सरप्रेरणात् शीघ्रं नराणां हृद्यताडयत्। तेनास्त्रेण च शस्त्रेण रोगाः परमपीडिताः ॥२९॥ याम्यास्ते मृत्युरूपा वै पलायनमकुर्वत। यमेन बहुधा शस्त्रैर्योधयामास दारुणम् ॥ महिषं मूर्छितं कृत्वा पातयामास वै यमम् ॥३०॥ उत्थितो धर्मराजश्च कालदंडेन वेगतः। अताडयद्दैत्यपुत्रं तं गर्जन्विषयप्रियम् ॥३१॥ कालदंडस्तु तं दृष्ट्वा पतितो धरणीतले। आगत्य सहसा तेन प्रतापेन धृतो यमः ॥३२॥ तस्यैतच्च महत्कर्म दैत्यपुत्रस्य दैत्यपाः। तुष्टुवुः

परमप्रीता धन्यं धन्यं तमब्रुवन् ॥३३॥ यमं धृत्वा च दैत्या आययुश्चामरावतीम् । इंद्रोऽपि देवसंघैश्च सन्नद्धो वैरभावतः ॥३४॥ अग्निर्वायुः प्रसन्नद्धावागतौ बलसंयुतौ । देवाः सर्वे महाभागाः स्वस्वलोकात् समाययुः ॥३५॥ विश्वेदेवाश्च साध्याश्च रुद्रा वसव एव च । गंधर्वाश्चैव यक्षाश्च विद्याधरसमायुताः ॥३६॥ ग्रहाश्चंद्रश्च सूर्यश्च आदित्या बलवत्तराः । सन्नद्धाः सर्वदेवास्ते वज्रिणं जग्मुराहृताः ॥३७॥ सर्वदेवगणैरिंद्रो रणभूमिं समाययौ । ऐरावतसमारूढो वज्रपाणिर्महाबलः ॥३८॥ देवसैन्यं सुसन्नद्धमागतं स्वबलान्वितम् । दृष्ट्वा दैत्यगणाः सर्वे जघ्नुः शस्त्रप्रहारतः ॥३९॥ देवा जघ्नुश्च तान् शस्त्रैर्महाक्रोधसमन्विताः । एवं परस्परं तत्र तुमुलं युद्धमप्यऽभूत् ॥४०॥ मृता दैत्यास्तथा देवैस्ताडिताः शस्त्रघाततः । दैत्यैर्हताश्च देवास्ते छिन्ना भिन्नाः सुमूर्छिताः ॥४१॥ एवं परस्परं युद्धं देवदैत्यविनाशनम् । सप्तरात्रमभूत्तीव्रं ततो दैत्याः पलायिताः ॥४२॥ विरोचनादयः सर्वे मूर्छिता धरणीतले । जयवंतः सुरेंद्रास्ते वदंतः स्म प्रहर्षिताः ॥४३॥ एतद् दृष्ट्वा महाश्चर्यं सुंदरप्रिय आगतः । ज्येष्ठपुत्रो मत्सरस्य युयुधे सर्वदैवतैः ॥४४॥ शस्त्रास्त्रैर्मल्लयुद्धैस्तेन मर्दितं तेन सर्वशः । देवसैन्यं दिक्षु तत्र पलायत भयातुरम् ॥४५॥ शोणितप्रस्रवास्तत्र नद्यो जाताः प्रजापते । इंद्रोऽपि युयुधे तेन दैत्यपुत्रेण धीमता ॥४६॥ वज्रेण निहतस्तत्रेंद्रेण दैत्यो महाबलः । न चचाल तदाश्चार्यमिंद्रश्चेतसि संगतम् ॥४७॥ दैत्यपुत्रः समागत्य खड्गेनैरावतं गजम् । मूर्छितं कारयामास वज्रिणं च पदाग्रहीत ॥४८॥ मर्दयित्वा सुरेशानं स्ववशं च चकार ह । धृत्वा पुरंदरं सोऽपि स्वस्थानमगमन्मुदा ॥४९॥ दैत्यैः संपूजितस्तत्र महाबलपराक्रमः । सुंदरप्रियपुत्रोऽभूत् मत्सरस्य प्रहर्षितः ॥५०॥ देवाः केचिद् धृतास्तत्र केचिद्वै मूर्छिताः कृताः । केचित् पलायिता दक्ष भग्नाः केऽपि विचूर्णिताः ॥५१॥ एवं स सकलान् देवान् वशांश्चक्रे महाबलः । मत्सरासुर एवाऽयं स्वर्गाधीशो बभूव ह ॥५२॥

॥ ॐ इति श्रीमदान्त्ये पुराणोपनिषदि श्रीमन्मौद्गले महापुराणे प्रथमे खंडे वक्रतुंडचरिते मत्सरासुरविजय इंद्रपराजयो नाम सप्तविंशतितमोऽध्यायः ॥

॥ श्रीगणेशाय नमः ॥ मुद्गल उवाच । देवाश्च शरणं केचित् कश्यपादीन् समाययुः । विह्वला भयभीतास्ते शशंसुर्दैत्यचेष्टितम् ॥१॥ देवा ऊचुः । मत्सरेण प्रदुष्टेन जिता देवाः सवासवाः । इंद्रो धृतो महाभाग वयं शरणमागताः ॥२॥ रक्ष त्वं मुनिशार्दूल त्वं पिता भयविह्वलान् । जीवनाशसमाद् दुःखादिंद्रं मोचय मत्सरात् ॥३॥ देवानां वचनं श्रुत्वा वसिष्ठादिसमन्वितः । ब्रह्माणं प्रययौ देवैः कश्यपो वंशवृद्धये ॥४॥ सत्यलोके समासीनं गत्वा दृष्ट्वा ननाम च । स्तुत्वा तं विविधैर्वाक्यैः प्रांजलिः प्रत्युवाच ह ॥५॥ कश्यप उवाच । मत्सरेण धृतः स्वामिन्निंद्रो देववरैः सह । देवस्थानपतिर्जातो दैत्यः परमदारुणः ॥६॥ देवा दैत्याः पदे स्वे स्वे यथायोग्ये वसंति वै । तथा कुरु जगन्नाथ त्वं धाता च गतिर्हि नः ॥७॥ कश्यपस्य वचः श्रुत्वा देवांश्चर्षीनथाऽब्रवीत् । पितामहः प्रजानाथ हृदयेन विदूयता ॥८॥ ब्रह्मोवाच । शृणुध्वं मुनयो देवाः शिवप्राप्तवरोऽसुरः । अजेयः सर्वभूतानां देवादीनां विशेषतः ॥९॥ न शक्तोऽहं कदा कर्तुं यथायोग्यं स्वभावतः । गच्छामि शरणं विष्णुं भवद्भिः सह पालकम् ॥१०॥ वैकुंठमगमद् ब्रह्मा देवैश्च मुनिभिः सह । गत्वा विष्णुं नमस्कृत्य स्तुत्वोवाच प्रजापतिः ॥११॥ मत्सरेण धृतो युद्धे इंद्रो देववरः प्रभो । किं स्थितोऽसि महाविष्णो त्वं पालक इति श्रुतः ॥१२॥ ब्रह्मणो वचनं श्रुत्वा विष्णुस्तं प्रत्युवाच ह । न शक्यते मया धातर्वशं कर्तुं महासुरम् ॥१३॥ शिवस्य वरदानेन मत्तोऽसौ दैत्यपुंगवः । तस्माच्च शरणं यामः शंकरं नात्र संशयः ॥१४॥ ब्रह्मादिभिः स्वयं विष्णुः कैलासमगमत्किल । शंकरं प्रणिपत्याऽह सर्वैर्मुनिगणैः सह ॥१५॥ विष्णुरुवाच । नमस्ते भगवन् शंभो नमस्ते शूलपाणये । नमस्ते जगतां नाथ सर्वसाक्षिन्नमोस्तु ते ॥१६॥ नमो नमो महादेव स्रष्ट्रे राजसरूपिणे । पात्रे विष्णुस्वरूपाय हंत्रे रुद्रस्वरूपिणे ॥१७॥ पंचवक्त्रधरायैव योगिने योगदायिने । निर्गुणाय निरूपाय ब्रह्मभूताय ते नमः ॥१८॥ मत्सरेण महादेव पीडितास्ते सुरर्षयः । धृत इंद्रः सुराधीशो मर्दयित्वा सुरान् परम् ॥१९॥ भयभीता वयं तेन शरणं त्वामुपागताः । रक्ष नो देवदेवेश त्वं श्रेष्ठो देवपालक ॥२०॥ विष्णोर्वचनमाकर्ण्य शिवश्चिंतातुरः स्वयम् । उवाच तान् देवमुनीन् विष्णुमुख्यान् महेश्वरः ॥२१॥ शिव उवाच । तपसोग्रेण देवेश मया दैत्यो विवर्धितः । वरैर्महादुर्लभैश्च किं करोमि जनार्दन ॥२२॥ दैत्यो नाशयितुं विष्णो न शक्यः स कदाचन । विचारं कुरु देवेश त्वं बुद्धियुत एव हि ॥२३॥ शिवस्य वचनं श्रुत्वा विष्णुः परमकंपितः । उवाच दुःखयुक्तेन हृदयेन सुरेश्वरम् ॥२४॥ विष्णुरुवाच । कर्ता त्वमन्यथा कर्ता ह्यकर्ता नात्र संशयः । विपरीतं त्वयोक्तं चेद्वयं किं करवामहे ॥२५॥ तव वै सन्निधौ

देव वसामश्च सदाशिव । वयं दैत्यवशा नैव चराम इति मे मतिः ॥२६॥ वैकुंठादिपदं त्यक्त्वा तव सन्निधिमागताः । अधुना मत्सरो दैत्य आगमिष्यति तत्र सः ॥२७॥ वैकुंठं सत्यलोकं च गृहीत्वा सुखमेष्यति । तव स्थानं न कैलासं भक्तत्वाद्वै ग्रहीष्यति ॥२८॥ विष्णोश्च वचनं श्रुत्वा शिवो निःश्वाससंयुतः । स्थितस्तत्रैव दक्ष त्वं शृणु मत्सरचेष्टितम् ॥२९॥

॥ ओमिति श्रीमदान्त्ये पुराणोपनिषदि श्रीमन्मौद्गले महापुराणे प्रथमे खंडे वक्रतुंडचरिते मत्सरासुरचेष्टितकथनं नाम अष्टाविंशोऽध्यायः ॥

॥ श्रीगणेशाय नमः ॥ मुद्गल उवाच । इंद्रं धृत्वा महादैत्यो मत्सरो हर्षसंयुतः । ऐरावतसमारूढो ययौ नाममरावतीम् ॥ १ ॥ विरोचनमुखैर्वीरैः संवृतो दैत्यपुंगवः । शुशुभे तत्र तेजस्वी प्रभावेण बलेन च ॥ २ ॥ इंद्रासने समासीनं तं ययुश्चाप्सरोगणाः । गंधर्वाश्चारणाश्चैव भयभीताः समंततः ॥ ३ ॥ सिषेविरे महाभागं मत्सरं त्वमितौजसम् । सर्वभावेन तं हृष्टं चक्रुः सर्वे स्वविद्यया ॥ ४ ॥ देवोद्यानेषु सर्वेषु विचचार महासुरः । कुशलो देवभोगेषु भोगांश्च बुभुजे परान् ॥५॥ देवस्थानानि सर्वाणि विभज्य प्रददौ स्वयम् । दैत्येभ्यो मुख्यमुख्येभ्यो बलेन सहितो मुने ॥ ६ ॥ दत्तानि यानि स्थानानि स्थितास्तेषु महासुराः । नानारूपान् देवभोगान् बुभुजुस्तत्र संस्थिताः ॥ ७ ॥ मत्सरं सेवमानास्ते ह्यतिदर्पेण संवृताः । एकस्मिन् दिवसे भौमे इंद्रासनसमाश्रितः ॥ मत्सरो हर्षयुक्तः सन् दैत्यान् प्रोवाच गर्वितः ॥ ८ ॥ मत्सरासुर उवाच । भो भो विरोचनाद्याश्च शृणुध्वं च वचोऽसुराः । ब्रह्मादयो महाभागाः कथमत्रैव नागताः ॥ ९ ॥ नमस्यंति न देवेशा मां यदा मत्सरान्विताः । सर्वं मदं तदा तेषां हरिष्यामि न संशयः ॥१०॥ मत्सरस्य वचः सर्वे तुष्टुवुर्दैत्यदानवाः । दूतं संप्रेषयामास मत्सरः क्रोधसंयुतः ॥११॥ गच्छ दूत त्रयाणां त्वं ब्रह्मादीनां पदेषु वै । देवेशान् वद वाक्यं मे सावधानेन चेतसा ॥१२॥ दर्शनार्थं मत्सरस्य यांतु देवा मया सह । नोचेन्मत्सरदैत्यस्ताडयिष्यति निश्चितम् ॥१३॥ मत्सरस्य वचः श्रुत्वा गतो दूतो बलान्वितः । अंधको नाम दैत्येंद्रो महावेगसमन्वितः ॥१४॥ सत्यलोके स धातारं न ददर्श महाबलः । शून्यां तां नगरीं वीक्ष्य गतो वैकुंठमादरात् ॥१५॥ तत्राऽपि तादृशं दृष्ट्वा गतः कैलासमेव सः । तत्रानंदयुतान् सर्वान् देवांश्चर्षीन् ददर्श च ॥१६॥ सभामध्यगतो दैत्यः शिवचारैः प्रवेशितः । आसनस्थेन शर्वेण आसने विनिवेशितः ॥१७॥ कैलासविभवं दृष्ट्वा विस्मितो मानसेऽभवत् । सदानंदमयं धन्यं मन्यमानः स्वचेतसि ॥१८॥ पृच्छंतं शंकरं दैत्य उवाच

बलगर्वितः । तृणीकृत्य महेशानं सर्वान् देवांस्तदांधकः ॥१९॥ अंधक उवाच । मत्सरासुरवाक्यं च शृणुध्वं सुरसत्तमाः । जित्वेंद्रं देवनाथं च जातोऽहं जगदीश्वरः ॥२०॥ अतो मद्दर्शनार्थं च भवंतोऽपि सहानुगाः । ब्रह्मा विष्णुश्च रुद्रश्च आगच्छंतु मदंतिकम् ॥२१॥ तस्माद्भवद्भिरद्यैव मया सह सुरेश्वराः । आगंतव्यं मत्सरस्य दर्शनार्थं तु सत्वरम् ॥२२॥ अंधकस्य वचः श्रुत्वा शिवः क्रोधसमन्वितः । उवाच तं महादैत्यं मुखादग्निं समुद्गिरन् ॥२३॥ शिव उवाच । किं मां वदसि पापिष्ठ तृणीकृत्य च यत् वचः । मद्वरस्य प्रभावेण मत्सरो विजयी ध्रुवम् ॥२४॥ यदाऽहं क्रोधसंयुक्तस्तदा भस्ममयं खलम् । करिष्यामि न संदेहः सासुरं मत्सरं खलु ॥ २५ ॥ मत्सराज्ञावशोऽहं रे किं प्रजातोऽसुराधम । मत्वा त्वां मूढ दूतेति मोचयामि न संशयः ॥ २६ ॥ गच्छ तं मत्सरं दैत्यं वद वाणीं मयेरिताम् । नोचेत्त्वां भस्मसात् कुर्यां कुपितोऽहं खलोत्तम ॥ २७ ॥ शिवस्य वचनं श्रुत्वा मत्सरं त्वंधको ययौ । कथयामास वृत्तांतं सर्वदैत्ययुताय च ॥ २८ ॥ विभवं वर्णयामास कैलासस्य यथायथम् । ब्रह्मांडे न समं किंचित् कैलासस्य महासुराः ॥ २९ ॥ अंधकस्य वचः क्रूरं श्रुत्वा दैत्याः महाबलाः । विरोचनमुखाः सर्वे मत्सरं क्रूरमब्रुवन् ॥ ३० ॥ किं स्थितोऽसि महाबाहो जेष्यामस्त्वत्प्रसादतः । देवत्रयं न संदेह आज्ञां देह्यसुरेश्वर ॥३१॥ दैत्यानां वचनंश्रुत्वा तेजोयुक्तं स मत्सरः । उवाच क्रोधसंयुक्तस्तान् दैत्यान् हर्षयन्निव ॥३२॥ मत्सर उवाच । मया तपःप्रभावेण प्राप्तं तेजो महाद्भुतम् । तत्र शंभुर्वृथा मानी स्वात्मानं मन्यतेऽर्थदम् ॥ ३३॥ तपोहीनाय राज्यं वै ब्रह्माण्डस्य ददाति चेत् । तदायं जगदीशो वै मन्यते नान्यथा मया ॥ ३४ ॥ अतः शंभुं विजेष्यामस्तपस्तेजः-समन्वितः । दर्पं तस्य हरिष्यामि वृथा ब्रह्मेति मानिनम् ॥ ३५ ॥ वेदांते ब्रह्मवेदेषु कथितं निर्विकल्पकम् । तदेव सर्वमान्यं वै जगदीशतया बभौ ॥ ३६ ॥ सकामकर्मणा सर्वं प्राप्यते मनुजस्तथा । ब्रह्मार्पणतया कर्म कृतं चेन्मुक्तिराप्यते ॥ ३७॥ अखिलं कर्मणा सृष्टं पालितं च प्रहीयते । तत्र किं तैस्त्रिभिर्देवैः क्रियते कर्मजैः खलु ॥ ३८ ॥ कर्मणाऽहं सृजाम्येव पालयामि हरामि च । कर्माधीनं जगत्सर्वं सदेवासुरमानुषम् ॥ ३९ ॥ एवमुक्त्वा महादैत्यो विरोचनमुखैर्वृतः । आययौ शंकरस्थानमावेशेन समन्वितः ॥ ४० ॥ नानाशस्त्रास्त्रधाराभिर्हतास्तत्र बहिः स्थिताः । शिवचाराश्च तैः सर्वे पलायंत च पीडिताः ॥ ४१ ॥ छिन्नभिन्नांगदेहाश्च ययुः शंकरसंनिधौ । ऊचुः समागतो दैत्यैः सर्वैः साकं स मत्सरः ॥ ४२ ॥

॥ ओमिति श्रीमदांत्ये पुराणोपनिषदि श्रीन्मौद्गले महापुराणे प्रथमे खंडे वक्रतुंडचरिते शिवमत्सरासुरसमागमो नाम एकोनत्रिंशोऽध्यायः ॥

॥ श्रीगणेशाय नमः॥ सूत उवाच । गणानां च पिशाचानां वचनं दारुणं महत्। श्रुत्वा शिवः स्वयं तत्र युद्धार्थं दंशितोऽभवत् ॥ १ ॥ ब्रह्मा विष्णुश्च कामश्च वसवो धनदोऽभवत् । चंद्रः सूर्यस्तथा वह्निसमीराद्याश्च दंशिताः ॥ २ ॥ कालाग्निरुद्रमुख्या ये भैरवो भूतनायकः । कृत्वा युद्धक्षमं वेषं स्थिताः शंकरसंनिधौ ॥३॥ अष्टभैरवमुख्याश्च वीरभद्रादयोऽभवन्। नंदी भृंगी पुष्पदंतमहाकालरवाः स्थिताः ॥४॥ महाकालीमुखास्तत्र देव्यः शस्त्रधराऽऽययुः । एवं नानाविधैः सैन्यैर्वृतः शंभुर्महेश्वरः ॥५॥ वृषारूढो महातेजा आययौ युद्धलालसः। यत्र दैत्याः स्थितास्तत्र कार्तिकेयादिभिर्युतः ॥६॥ शंकरं सैन्यसंयुक्तं नानायुद्धविशारदम । नानाशस्त्रधरं दृष्ट्वा दैत्येशाश्चिक्षिपुः शरान् ॥७॥ तद् दृष्ट्वा कुपिता देवाः शस्त्रास्त्रैस्तानताडयन। एवं परस्परं युद्धमभवद्दारुणं महत् ॥८॥ देवानां चैव दैत्यानामन्योन्यजयकांक्षिणाम् । शस्त्रास्त्रनिचयैर्बाणैरंधकारः प्रवर्तितः ॥९॥ सैन्यानां रजसा व्याप्तमाकाशं सर्वतो बभौ । न प्राज्ञायत तत्रैव स्वीयो वाऽपर एव च ॥१०॥ घंटानां शंखतूर्याणां वीराणां रथिनां तथा । बृंहितानां हेषितानां शब्दैस्तद्बधिरीकृतम् ॥ ११ ॥ देवान दृष्ट्वा सुरा जघ्नुर्दैत्यान देवास्तथापरे । असंबंधं महायुद्धं चक्रिरे सुरदानवाः ॥१२॥ शस्त्रैः शस्त्राणि संवार्य तथास्त्रैरस्त्रसंचयम्। मल्लयुद्धं महावीराश्चक्रुस्तत्र मदान्विताः ॥१३॥ संग्रामे तुमुले तत्र प्रवृत्ते घोररूपिणि । मृता मुमूर्षवः केचिच्छिन्नभिन्नास्तथाऽभवन ॥१४॥ नानाजंतुशरीरेभ्यः प्रवृत्ता रक्तसंभवा । नदी बभौ महाघोरा मांसकर्दमशालिनी ॥१५॥ रक्ता चास्थिबलाका च केशशैवालशोभिता । चापसर्पाशिरःपद्माकबंधद्रुमवाहिनी ॥ १६ ॥ भल्लकाष्ठा महाघोरा चामरैस्तृणकैर्युता। छत्रावर्ता दुर्गमा च चर्मपट्टिशदर्दुरा ॥ १७ ॥ भीरुभीतिकरा चैव वीरहर्षप्रवर्धिनी । तां दृष्ट्वा दैत्यराजास्ते क्रोधयुक्ताः समाययुः ॥१८॥ तैः समंताद्बलं भग्नं देवानां सर्वसंजसा । बाणजालैर्दिशो व्याप्ता गंतुं मार्गो न विद्यते ॥१९॥ पलायनपरा देवाः सर्वे दशदिशोऽगमन। तद् दृष्ट्वा देवराजास्ते तान वारयामासुरोजसा ॥२०॥ द्वंद्वयुद्धं च तत्रासीत्परस्परविनाशनम । देवानां मुख्यदैत्यानां किंचित्तेषां वदामि ते। २१॥ नमुचिः कामदेवेन युयुधे बलसंयुतः। शंबरो वायुना सार्द्धं शुंभो देव्या महाबलः ॥२२॥ चंद्रेणाऽपि निशुंभश्च गुहेन च विरोचनः। कालभैरवदेवेन कालभैरवदानवः ॥२३॥ महिषासुरदैत्यः कालाग्न्याख्यहरेण च। प्रह्लादो विष्णुना सार्धं विप्रचित्तिश्च भानुना ॥२४॥ अंधकासुरनामा च वीरभद्रेण संयुतः। अग्निना चैव दुर्बुद्धिर्युयुधे बलसंयुतः ॥२५॥ विषयप्रिय एवाऽसौ ब्रह्मणा युयुधे भृशम्। शंभुना

युयुधे तत्र सुंदरप्रिय एव सः ॥ २६ ॥ मत्सरासुरदैत्येशो युद्धं द्रष्टुं स्थितोऽभवत् । एवं नानाद्वंद्वयुद्धं शतशोथ सहस्रशः ॥ २७ ॥ संख्यातुं नैव शक्यं तदपारत्वात् प्रजापते । शस्त्रास्त्रैरसुरा जघ्नुः सुरांस्तानपि ते सुराः ॥ २८ ॥ अग्निवाय्वादिकास्त्राणि तत्यजुः क्रोधसंयुताः । चकंपे च त्रिभुवनं दारुणे संयुगे तदा ॥ २९ ॥ देवासुरप्रणाशश्च महांस्तत्र प्रवर्तितः । शोणितौघैः प्रवृत्तास्तु नद्यः परमदारुणाः ॥ ३० ॥ एवं सप्त दिवानक्तं गतं तेषां प्रयुध्यताम् । नासुरा न च देवास्ते विरामं चक्रुरंजसा ॥ ३१ ॥ ततश्च कुपिता देवा अत्यंतं शंकरादयः । दैत्यानामस्त्रसंघातानस्त्रैः संवार्य तान् पुनः ॥ ३२ ॥ ताडयामासुरव्यग्रा अस्त्रैर्नानाविधैः परम् । मूर्छितान् पतितांश्चक्रुर्मृतान् संचूर्णितान् परान् ॥ ३३ ॥ ततो दश दिशो दैत्या वव्रजुर्भयसंकुलाः । त्रिशूलादि महाशस्त्रैस्तत्राऽपि तु सुरा बभुः ॥ ३४ ॥ सुंदरप्रियकाद्याश्च मूर्च्छिता धरणीं गताः । मृतप्रायाः कृतास्तैस्ते विष्णवादिभिरथो मुने ॥ ३५ ॥ तद् दृष्ट्वा क्रोधसंयुक्तो मत्सरः स्वयमाययौ । कृत्वा नादं महाघोरं ब्रह्मांडं कंपयन्निव ॥ ३६ ॥ धनुश्चक्रे सनादं वै तेन संशयिताः सुराः । बाणवृष्टिं ससर्जासौ दारुणां शत्रुनाशिनीम् ॥ ३७ ॥ तस्य बाणैः सुराः सर्वे मर्दिता बलवत्तरम् । मृताः केचित् क्षताः केचिन् मूर्च्छिता पतिता मृधे ॥ ३८ ॥ पंचबाणैश्च सेनान्यं ताडयामास वक्षसि । पतितः स धरापृष्ठे मूर्च्छितो भृशविह्वलः ॥ ३९ ॥ अग्निं च सप्तभिर्बाणैर्नंदिनं दशभिस्तथा । ताडयामास दैत्येंद्रः पतितं रणमूर्धनि ॥ ४० ॥ दशभिर्वीरभद्रं स सवितारं ततोष्टभिः । चंद्रं च सप्तभिर्बाणैः पातयामास दैत्यपः ॥ ४१ ॥ अनिलं नवभिश्चैव कालाग्निं रुद्रमष्टभिः । दशभिश्च महाकालीं ताडयामास मत्सरः ॥ ४२ ॥ पंचभिः पंचभिश्चैव गणपान् भृंगिमुख्यकान् । बाणैः स पातयामास प्रलयाग्निसमद्युतिः ॥ ४३ ॥ कुबेरं दशभिश्चैव ताडयामास वक्षसि । ब्रह्माणं शतबाणैश्च पातयामास भूतले ॥ ४४ ॥ एवं तस्याद्भुतं कर्म दृष्ट्वा विष्णुः समाययौ । बाणैः सहस्रसंख्याकैर्ववर्ष घनवद् भृशम् ॥ ४५ ॥ दैत्यो बाणान्निवार्यैव तैः शरैः क्रोधसंयुतः । शतेन ताडयामास पतितः स धरातले ॥ ४६ ॥ ततश्च शंकरः क्रुद्धस्त्रिशूलेनाहनद् भृशम् । त्रिशूलं निष्फलं तत्र पतितं धरणीतले ॥ ४७ ॥ पाशं दैत्यपतिः क्षिप्त्वा सहसा शंकरं ततः । गृहीत्वा पशुवत् कंठे आनयामास सन्निधौ ॥ ४८ ॥ धृत्वा शंभुं महाबाहुर्वदति स्म च तं मुने । अतुलं किं त्वया मेऽद्य दत्तं वद सदाशिव ॥ ४९ ॥ कर्मणा त्वं समर्थश्च तथाहं कर्मणा किल । जगदीश्वरतां प्राप्तो वृथाहं-

कारवानसि ॥ ५० ॥ क्रमेण विष्णुमुख्यांश्च देवान् धृत्वा महाबलः । कैलासशिखरे रम्ये रेमे दैत्यसमन्वितः ॥ ५१ ॥ सर्वपूज्यतमो भूत्वा दैत्यः परमहर्षितः । नानाकौतुकयुक्तश्च भोगांश्च बुभुजे परान् ॥ ५२ ॥

॥ ओमिति श्रीमदांत्य पुराणोपनिषदि श्रीमन्मौद्गले महापुराणे प्रथमे खंडे वक्रतुंडचरिते शिवादिपराजयो नाम त्रिंशोऽध्यायः ॥

॥ श्रीगणेशाय नमः ॥ मुद्गल उवाच ॥ शृणु दक्ष महाश्चर्यं दैत्यस्य च विचेष्टितम् । ब्रह्मांडाधिपतिर्जातो मत्सरः कर्मणा स्वयम् ॥ १ ॥ सुंदरप्रियपुत्रं च कैलासाधिपतिं ततः । चक्रे वैकुंठनाथं तं पुत्रं स्वं विजयप्रियम् ॥ २ ॥ प्रह्लादं सत्यलोकेशं माहेंद्रेशं विरोचनम् । एवं चक्रे च राजेशः स्वर्गाधीशान् स दैत्यपान् ॥ ३ ॥ स्वयं भूमिं समागम्य नगरं निर्ममे ततः । मत्सरावासकं नाम तत्रैव न्यवसन्मुदा ॥ ४ ॥ त्रैलोक्यं वशगं सर्वं चकार स्वेन तेजसा । शिवादयश्च देवेंद्रा गृहे तस्य समास्थिताः ॥ ५ ॥ तान् समानाय्य दैत्येशो हर्षयुक्तेन चेतसा । उवाच मधुरं वाक्यं सामयुक्तं महासुरः ॥ ६ ॥ शृणु शंभो महाभाग देवेंद्रैः सह देवप । यत्रेच्छा गच्छ तत्र त्वं मदाज्ञां पालयन् सदा ॥ ७ ॥ एवमुक्त्वा स दैत्येंद्रो मोचयामास शंकरम् । देवैः सह महाभागो मत्सरो हर्षसंयुतः ॥ ८ ॥ शिवोऽपि देवसंघातैः पर्वतद्रोणिमाश्रितः । चिंताविष्टो महादेवः काले पश्यंश्च संस्थितः ॥ ९ ॥ यत्र तत्र गुहायां ते देवा विष्णुपुरोगमाः । संस्थिता भयभीताश्च दिवसानतिचक्रमुः ॥ १० ॥ पृथिव्यां दैत्यराजेन ततो धर्मस्य खंडनम् । कृतं सर्वत्र तेनैव हाहाकारोऽभवत् महान् ॥ ११ ॥ देवानां प्रतिमा यत्र तां भङ्क्त्वा चिक्षिपुर्जले । दैत्यास्तदाज्ञया दक्ष धर्मलोपं प्रचक्रिरे ॥ १२ ॥ मत्सरस्य च दैतेयाः प्रतिमाः सर्वभावतः । देशे देशे पुरे ग्रामे स्थापयामासुरंजसा ॥ १३ ॥ गृहे गृहे च देवानां प्रतिमां संस्थितां पराम् । तां भङ्क्त्वा जलमध्ये ते चिक्षिपुश्च प्रजापते ॥ १४ ॥ मत्सरप्रतिमां कृत्वा प्रतिगेहं ददुस्ततः । दैत्याः सुदारुणा विश्वं त्रासयामासुरेव च ॥ १५ ॥ ब्राह्मणांश्च समानीय ताडयामास मत्सरः । ममैव मंत्रसूक्तेन यज्ञादि क्रियतां द्विजाः ॥ १६ ॥ मम नाम्ना च गायत्रीं युक्तां जपत मा चिरम् । अग्निहोत्रादिकं कर्म कुरुध्वं मत्मतं तथा ॥ १७ ॥ अहमेवेश्वरो देवो ब्राह्मणादि जनस्य च । भजतां मम पादौ च दुर्लभं किं भविष्यति ॥ १८ ॥ धनधान्यादिकं सर्वं स्वर्गभोगादिसंयुतम् । दास्यामि नात्र संदेहो मदधीनं

जगत्सदा ॥ १९ ॥ मम प्रीतिकरा येन दैत्या भोज्यैः प्रपूजिताः। तेन संतर्पितो नूनं वांछितं पूरयाम्यहम् ॥ २० ॥ एवमादि स सर्वत्र नानाधर्मनिकृंतनम्। कारयामास दुर्बुद्धिर्मत्सरो मत्सरान्वितः ॥ २१ ॥ केचिद्दषिगणा दक्ष वनं व्याघ्रादिसंयुतम्। जग्मुस्तत्र क्रियाः सर्वाश्चकुर्धर्मपरायणाः ॥ २२ ॥ देहरक्षणसक्ताश्च मुनयो भ्रंशमागताः। सर्ववर्णपरिभ्रष्टा जना जाताः प्रजापते ॥ २३ ॥ यजनं याजनं तत्र स्वधर्मादिस्वभावजम्। कर्म सर्वं न चक्रुस्ते जनास्तद्भयभाविताः ॥ २४ ॥ न स्वाहा न स्वधा कुत्र न-वषट्कार आभवत्। वर्णसंकरकृल्लोकाः स्थिता भयसमन्विताः ॥ २५ ॥ एवं पापस्य वृद्धिश्च संजाता भयदायिनी। ततो देवगणाः सर्वे उपोषणनिपीडिताः ॥ २६ ॥ विचारं तत्र चक्रुस्ते मत्सरस्य विनाशने। न च किंचिद्भयोद्विग्ना नाशार्थं शेकुरोजसा ॥ २७ ॥ एतस्मिन्नंतरे तत्र दत्तात्रेयः समाययौ। साक्षाद् ब्रह्ममयो योगी न्यस्तस्वपरविभ्रमः ॥ २८ ॥ मलिनो जडवल्लोके भ्रमति स्म पिशाचवत्। चेष्टितैश्चेष्टते नग्नो बालवद् द्वंद्वकारकः ॥ २९ ॥ उन्मत्तवन्महाभागो भयं नैव प्रविंदति। आत्रेयो गणराजस्य भक्तः परमशोभनः ॥ ३० ॥ तं दृष्ट्वा देवसंघास्ते समुत्तस्थुः सुसादराः। प्रणेमुः कार्यसिध्यर्थं पूजयामासुरंजसा ॥ ३१ ॥ पादसंवाहनं तस्य चक्रुः केचन भावतः। फलादिना च नैवेद्यमर्पयामासुरादरात् ॥३२॥ पप्रच्छुर्भुक्तवंतं तं विनयेन समन्विताः। शंभुविष्णुमुखाः सर्वे भयभीता महामुनिम् ॥३३॥ शिव उवाच। स्वामिंस्त्वं द्वंद्वहीनश्च नित्यमानंदभाक् परः। न्यस्तस्वपरभावश्च तथाऽपि जनवत्सलः ॥ ३४ ॥ गणेशस्य वरो भक्तः साक्षाद्गणपतिः स्वयम्। योगभावेन संपन्नो योगी योगविदां वरः ॥ ३५ ॥ तथापि दुःखितान् दृष्ट्वा मनस्ते कलिलं भवेत्। उपाधिहीनभावेन दुःखनाशं करोषि वै ॥ ३६ ॥ अतो वयं महाभाग पीडिता मत्सरेण वै। भ्रष्टस्थाना वने सर्वे चरामः श्वापदा इव ॥ ३७ ॥ अत्राऽपि धर्मलोपेन पीडिता वयमुत्कटम्। उपोषणपराः स्वामिन् मरिष्यामो महामते ॥ ३८ ॥ अत्र ते दर्शनं प्राप्तं पूर्वपुण्यबलेन भोः। तेन दुःखविहीनाश्च भविष्यामो न संशयः ॥ ३९ ॥ अतो मत्सरदैत्यस्य नाशोपायं वद प्रभो। येन सर्वं जगत्क्लिष्टं तत् सुखं कुरु मानद ॥ ४० ॥ एकस्य दोषयोगेन बहवः पीडिता यदि। अनुपाधितया योगी तं दोषं नाशयिष्यति ॥ ४१ ॥ शक्तश्चेत् स्वस्वभावेन सर्वेभ्यः सुखदायकः। अतस्त्वं रक्ष योगीश जगत् कृत्स्नं विशेषतः ॥ ४२ ॥ मुद्गल उवाच। शिवस्य वचनं श्रुत्वा देवान् दीनतमान् परान्। दृष्ट्वा स करुणायुक्तः प्रत्युवाच च हर्षयन् ॥ ४३ ॥ दत्तात्रेय उवाच।

शृणु शंभो जगन्नाथ त्वं साक्षादीश्वरः शिवः । तवाधीनमिदं सर्वं त्वां ब्रुवे किं महामते ॥ ४४ ॥ तथापि वच्मि देवेश त्वदाज्ञासंप्रचोदितः । येन त्वं देवसंयुक्तः सुखं विंदसि शाश्वतम् ॥ ४५ ॥ त्वदीये हृदये शंभो मत्सरः संस्थितोऽधुना । ईश्वरोऽहमिदं सर्वं मदधीनं प्रवर्तते ॥ ४६ ॥ न मत्समस्त्रिभुवने इति यत् मत्सरः स च । जहि तं योगमार्गेण हृदयस्थं महासुरम् ॥ ४७ ॥ श्रेष्ठं दृष्ट्वा महेर्ष्या ते जायते या महासने । जहि तां तपसा शंभो गणेशस्य प्रसेवया ॥ ४८ ॥ एकाक्षरविधानेन मयाऽसौ सेवितः पुरा । तेनाऽहं च गणाधीशो न भिन्नौ मयि निष्ठतः ॥ ४९ ॥ अतस्त्वं योगमार्गेण गणेशं सर्वसिद्धिदम् । एकाक्षरविधानेन तमाराधय यत्नतः ॥ ५० ॥ हृदिस्थं मत्सरं हत्वा पश्चात्तं जहि दानवम् । योगेन त्वं समर्थो हि भविताऽसि न संशयः ॥ ५१ ॥ एवमुक्त्वा महादेवं गतोऽसौ मुनिसत्तमः । यदृच्छया चरन् सन् वै सेवते गणनायकम् ॥ ५२ ॥

॥ ॐमिति श्रीमदांत्ये पुराणोपनिषदि श्रीमन्मौद्गले महापुराणे प्रथमे खंडे वक्रतुंडचरिते दत्तात्रयसंगमो नामैकत्रिंशोऽध्यायः ॥

॥ श्रीगणेशाय नमः ॥ शुक्र उवाच ॥ शृणु दक्ष महाप्राज्ञ चेष्टितं परमं महत् । यत्कृतं सर्वदेवैस्तत कथयामि समासतः ॥१॥ गते मुनौ महाभागे शिवो हर्षसमन्वितः । गणेशं हृदि संचिंत्य ब्रह्मादींश्च वचोऽब्रवीत् ॥ २ ॥ शृणु विष्णो विधे देवाः शृणुध्वं सर्वतापसाः । ऋषयः संस्थिता अत्र वचनं हितकारकम् ॥ ३ ॥ आत्रेयेण च दत्तेन कथितं दुःखनाशनम् । अत एकाक्षरेणैव प्रसादयत विघ्नपम् ॥ ४ ॥ शंभोर्वचनमाकर्ण्य मुनयो देवनायकाः । साधुसाध्वब्रुवन् सर्वे प्रसन्नाश्च तथाऽभवन् ॥ ५ ॥ तत एकाक्षरेणैव मंत्रेण गणपं मुने । देवाश्च मुनयः सर्वे सेवयामासुरादरात् ॥ ६ ॥ महोग्रतपसा युक्ताः स्थितास्तत्र शिवादयः । आराधयंस्तु देवेशं गणेशं सर्वनायकम् ॥ ७ ॥ पद्मासनगताः केचिद्वीरासनगताः परे । स्वस्तिकासने आसीना एवं नानासने स्थिताः ॥ ८ ॥ निराहारास्तथा केचित् स्थितास्तत्र प्रजापते । पत्रवायुभुजश्चान्ये प्राणायामपरायणाः ॥ ९ ॥ जलभक्ष्याः स्वपादाग्रस्थिताः केचिद् दृढासनाः । केचिन्मानसपूजाभिः पूजयामासुरंजसा ॥ १० ॥

केचित् पुष्पोपहाराद्यैर्यत्नतः समपूजयन्। प्रदक्षिणापराः केचिद्देवं नानाविधानतः ॥ ११ ॥ तपंतो गणपं चैव मंत्रेण विधिपूर्वकम्। एकचित्तेन सर्वे ते तोषयामासुरंजसा ॥१२॥ एवं वर्षसहस्रेण दिव्येन तपसा स्वयम्। प्रसन्नोऽभून् महातेजा वक्रतुंडः प्रतापवान् ॥ १३ ॥ देवानां च ऋषीणां च ययौ चाग्रे गणाधिपम्। तेजसां पुंज एवाऽसौ साक्षाद् ब्रह्ममयो बभौ ॥ १४ ॥ सिंहगो गजवक्त्रश्च शूर्पकर्णो महोदरः। चतुर्बाहुश्च पाशेनांकुशेन वरदेन च ॥ १५ ॥ अभयेन समायुक्तो वामांगे सिद्धिधारकः। दक्षिणांगे च बुद्धिं वै दधानो भगवान् परः ॥ १६ ॥ नाभिशेषो मुकुटवान् कुंडली कटकान्वितः । चिंतामणिलसद्वक्षा व्यालयज्ञोपवीतवान् ॥ १७ ॥ नानाभूषणशोभाढ्यस्तेजसा ज्वलदद्भुतः । पुष्करं पुष्करे धृत्वा भ्रामयन् समुपाययौ ॥ १८ ॥ तं दृष्ट्वा देवविप्रास्ते भयभीताः समंततः। उदितं किमिदं तेजः प्रलयानलसंनिभम् ॥१९॥ अथवा गणराजोऽयं किं वा स्वामी समागतः। अथवा प्रलयो भावी अकाले दैवनिर्मितः ॥ २० ॥ इति तर्कसमायुक्तान् देवान् मुनिसमन्वितान् । उवाच वक्रतुंडस्तान् मेघगंभीरनिस्वनः ॥ २१ ॥ वक्रतुंड उवाच । भो भो मुनिगणा देवाः स एवाऽहं समागतः। यं ध्यायथ महाभागास्तं जानीत गणेश्वरम् ॥ २२ ॥ तपसा मंत्रराजेन मम ध्यानेन सर्वशः। परितुष्टो वरं दातुमागतोऽहं न संशयः ॥ २३ ॥ मुद्गल उवाच । वक्रतुंडवचः श्रुत्वा हर्षिता अमरर्षयः। प्रणेमुः प्रार्थयामासुः सौम्यभावं प्रविह्वलाः ॥ २४ ॥ तेषां प्रार्थितमाकर्ण्य सौम्यतेजा अभूत् प्रभुः। यथा तं मुनयो देवा अपश्यन् स्वेन चक्षुषा ॥ २५ ॥ सौम्यभावेन संयुक्तं वक्रतुंडं सुरेश्वराः। मुनयस्तं प्रणम्योचुर्धन्या धन्या वयं प्रभो ॥ २६ ॥ अपूजयन् प्रयत्नेन भावेन स्नेहतस्तथा। उपचारैः षड्दशभिर्यथाविधि महेश्वराः ॥ २७ ॥ यथाविधि प्रणम्यैव तुष्टुवुः कृतमंगलाः। बद्धांजलिपुटाः सर्वे भक्तिनम्रात्मकंधराः ॥२८॥ साश्रुनेत्राः सरोमांचास्तद्दर्शनमहोत्सवाः। यथाज्ञानं यथान्यायं वक्रतुंडं महौजसम् ॥ २९ ॥ देवर्षय ऊचुः। नमस्ते वक्रतुंडाय गजवक्त्राय ते नमः। एकदंताय देवाय सर्वाधिपतये नमः ॥ ३० ॥ निर्गुणाय निरूपाय चतुर्बाहुधराय ते। सिंहवाहाय नागानां पत्युर्नाभौ धराय च ॥ ३१ ॥ अनंताय ह्यपाराय दुर्लक्ष्याय नमो नमः। पाशांकुशधरायैव नागयज्ञोपवीतिने ॥ ३२ ॥ वरदाभयहस्ताय सिद्धिबुद्धिवराय च। ब्रह्मभूताय भक्तानां ब्रह्मभूयकराय ते ॥ ३३ ॥ नमस्ते शंभुरूपाय विष्णुरूपाय ते नमः। सूर्यरूपाय धात्रे च नमः शक्तिमयाय च ॥ ३४ ॥ दैत्यदानवरूपाय देवरूपधराय च। नमः पक्षिस्वरूपाय शुकरूपाय ते नमः ॥ ३५ ॥ ग्रहनक्षत्ररूपाय लतावृक्षस्वरूपिणे।

पर्वताय नमस्तुभ्यं सरित्सागररूपिणे ॥३६॥ जलजंतुस्वरूपाय सर्परूपाय ते नमः। वेदाधिकाशीनिलक्षयोनिसंस्थाय ते नमः ॥ ३७ ॥ चराचरमयायैव नमो नानाप्रभेदिने। कर्माकर्मस्वरूपाय नमः खलु विकर्मणे ॥ ३८ ॥ ज्ञानयोगाय देवाय स्वात्मरूपधराय ते। स्वसंवेद्यस्वरूपाय सदा योगमयाय ते ॥३९॥ नानाधारप्रधाराय शब्दब्रह्ममयाय ते। मायारूपाय मायायै मायाहीनाय ते नमः ॥ ४० ॥ मायिभ्यो मोहदात्रे च सर्वकाराय ते नमः। स्थूलसूक्ष्मादिभेदाय भेदहीनाय ते नमः ॥ ४१ ॥ भेदाभेदमयायैवानंतपाराय ते नमः। भक्तेभ्यो वरदात्रे च भक्तसंरक्षकाय ते ॥ ४२ ॥ नमो नमः परेशायाव्ययाय च नमो नमः। गणेशाय नमस्तुभ्यं योगाधीशाय ते नमः ॥ ४३ ॥ यं स्तोतुं न समर्थाश्च वेदाः सांगाश्च योगिनः। तं किं स्तुमो गणेशानं वक्रतुंडस्वरूपिणम् ॥ ४४ ॥ मायादुःखं च सर्वेषां मनसि ज्ञानकारकम्। ब्रह्म तस्मात्तथा वक्रं ज्ञानहीनं बुधैः स्मृतम् ॥ ४५ ॥ माया च ब्रह्मतुंडं यद् द्वयोर्योगे भवत्परम्। योगशांतिश्च सर्वेषां योगिनां हृदि संस्थिता ॥ ४६ ॥ मायादेहस्वरूपा ते ब्रह्म वक्रं स्मृतं मुखम्। उभयोर्योगभाव त्वं वक्रतुंडः प्रकथ्यते ॥ ४७ ॥ तं वक्रतुंडं पश्यामः साक्षाद् योगमयं परम्। धन्या वयं गणाध्यक्षं स्तुत्वा तं प्रणताः स्तवैः ॥ ४८ ॥ धन्यं जन्म त्वक्षि धन्यं धन्याः संपद एव च। ज्ञानं धन्यं तपश्चैव येन दृष्टो गजाननः ॥ ४९ ॥ प्रसन्नो यदि देवेश यदि देयो वरः शुभः। तदा त्वदीयपादाब्जे भक्तिरस्तु सदा च नः ॥ ५० ॥ प्रार्थयामो वरं चैतं यतस्त्वं चिंतितार्थदः। मत्सरासुरनाशं च वक्रतुंड कुरु प्रभो ॥ ५१ ॥ जगत्सर्वं वयं चैव पीडितास्तेन विघ्नप ॥ सर्वेषामुपकारार्थं जहि दैत्यं महाबलम् ॥ ५२ ॥ स्तुत्वैवं प्रार्थयित्वा तं प्रणतास्ते सुरर्षयः। तानुत्थाप्य स्वयं साक्षाद्वक्रतुंड उवाच ह ॥ ५३ ॥ वक्रतुंड उवाच। भवत्कृतमिदं स्तोत्रं सर्वसिद्धिप्रदं परम्। भविष्यति महाभागा ईप्सितार्थप्रदं महत् ॥ ५४ ॥ मत्सरासुरनाशं च करिष्यामि सुरर्षयः। भवतां भक्तियोगेन प्रसन्नः पूर्णतां गतः ॥ ५५ ॥ पंचभूतमयं सर्वं त्रिगुणं जगदुच्यते। अष्टावरणसंयुक्तं ब्रह्मांडं हि सुरर्षयः ॥ ५६ ॥ अष्टावरणसंयुक्ता देवाः सर्वे च मानवाः। नागाश्चराचरं सर्वं तस्य तेभ्यो भयं नहि ॥ ५७ ॥ अतो मत्सरदैत्यस्य नाशश्च कठिनो महान्। तथापि भवतां देवाः करिष्यामि प्रियं द्विजाः ॥ ५८ ॥

॥ ओमिति श्रीमदान्त्ये पुराणोपनिषदि श्रीमन्मौद्गले महापुराणे प्रथमे खण्डे वक्रतुण्डचरिते वक्रतुण्डप्रादुर्भावो नाम द्वात्रिंशोऽध्यायः ॥

॥ श्रीगणेशाय नमः ॥ मुद्गल उवाच। एवमुक्त्वा सुरान् विप्रान् सस्मार बलमुत्कटम् । तस्य स्मरणमात्रेण प्रादुर्भूता गणाः प्रभोः ॥ १ ॥ प्रमोदामोदकाद्याश्च वक्रतुंडा गजाननाः। चतुर्बाहुधराः सर्वे नानाशस्त्रास्त्रपाणयः ॥ २ ॥ केचित् सिंहसमारूढाः केचिन्मूषकवाहनाः । केचिन्मयूरमारूढाः शेषारूढास्तथापरे ॥ ३ ॥ अश्वारूढास्तथान्ये च मुकुटैः सुविराजिताः। कटकैः कुंडलैश्चैव नानाभूषणराजिताः ॥ ४ ॥ भयंकराश्च शत्रूणां भक्तेभ्यः सुखदायकाः। महात्मानो महाशब्दा ब्रह्मांडस्फोटकारकाः ॥ ५ ॥ नानाक्रीडासमायुक्ताः सदा स्वानंदभाविताः। गणेशनाममाहात्म्यं कथयंतः परस्परम् ॥ ६ ॥ वक्रतुंडं नमस्कृत्य स्थिताः प्रांजलयोऽभवन्। आज्ञां कुरु गणाध्यक्ष करवामस्तवेप्सितम् ॥ ७ ॥ अस्माकं स्मरणं देव किमर्थं कृतमादरात्। दासान् त्वदीयपादस्य करिष्यामोऽखिलान् जनान् ॥ ८ ॥ तेषां वचनमाकर्ण्य वक्रतुंडः प्रतापवान्। उवाच तान् महाभागान् मेघगंभीरनिस्वनः ॥ ९ ॥ वक्रतुंड उवाच । शृणुध्वं मोदकाद्याश्च मत्सरासुरदैत्यपम्। हनिष्यामि महावीर्यं तेन युद्धं भविष्यति ॥ १० ॥ अधुना दारुणं तत्र मया सह महाबलाः। एतदर्थं विशेषेण स्मरणं भवतां कृतम् ॥ ११ ॥ वक्रतुंडवचः श्रुत्वा सर्वे हर्षसमन्विताः। गणा ऊचुः प्रणम्यैनं निबद्धकरसंपुटाः ॥ १२ ॥ गणा ऊचुः । स्वामिन् वदसि यत्सर्वं तदाश्चर्यमयं बहु। मत्सरासुरनाशश्च एकेन क्रियतेऽधुना ॥ १३ ॥ त्वत्प्रसादात् सदा सर्वं सुलभं नो गणाधिप। आज्ञां कुरु महाभाग पश्य चैकस्य पौरुषम् ॥ १४ ॥ गणानां तद्वचो रम्यं श्रुत्वा प्राह गणाधिपः। वक्रतुंडः प्रसन्नात्मा हर्षयन् सकलानिव ॥ १५ ॥ वक्रतुंड उवाच। भवद्भिः कथितं सर्वं तत्तथा न तदन्यथा। क्रीडार्थं निर्मितो दैत्यो मया मायाप्रभावतः ॥ १६ ॥ यदि क्षणेन तं दैत्यं नाशयामि प्रभावतः। तदा क्रीडा कथं देवा मया प्रक्रियते परा ॥ १७ ॥ अतस्तेन महाभागा युध्यध्वं मम सन्निधौ। अष्टावरणहीनेन हन्मि रूपेण तं क्षणात् ॥ १८ ॥ इति तस्य वचः श्रुत्वा गणा हर्षसमन्विताः। जगर्जुर्नादयंतस्ते दिशो विदिश एव च ॥ १९ ॥ तद् दृष्ट्वा परमाश्चर्यं विस्मितास्ते सुरर्षयः। हर्षेण महता युक्ता मेनिरे मत्सरं हतम् ॥ २० ॥ ततः सर्वान् समादाय गणान् देवान् मुनीनपि। वक्रतुंडो ययौ तां च पुरीमीर्ष्याह्वयां पराम् ॥ २१ ॥ यत्र राज्यं च कुरुते मत्सरः स प्रतापवान्। ब्रह्मांडस्य महावीरो नानाभोगसमन्वितः ॥ २२ ॥ देवांगनापरिवृतः सदा तिष्ठति दैत्यपः। मद्यादिपानसंयुक्तो नानावीरप्रपालितः ॥ २३ ॥ यद्यन्मनसि तेनापि चिंतितं सफलं सदा। तत्तद्भवति

सर्वं स्म तपसा वरदानतः ॥ २४ ॥ न बुबोध गतं कालं कालेनैव च वंचितः । धन्योऽहंमन्यमानो न मत्समो मानसेऽपरः ॥ २५ ॥ एकस्मिन् दिवसे तत्र सभायां संस्थितोऽभवत् । वीरैः परिवृतो नाना नृत्यं पश्यन् विनोदतः ॥ २६ ॥ तत्राकाशात्तदा वाणी बभूव भयदायिका । आगतो मत्सरं हंतुं वक्रतुंडो महाबलः ॥ २७ ॥ श्रुत्वाऽऽकाशभवां वाणीं मूर्च्छितो मत्सरासुरः । पतितः शुष्ककंठश्च कंपमानांगविह्वलः ॥ २८ ॥ तं तथा पतितं दृष्ट्वाऽसुराः सर्वे भयातुराः । केनोक्तं परुषं वाक्यं हन्मस्तं त्वत्र निश्चितम् ॥ २९ ॥ ततः केचिन्नभोमार्गे बभ्रमुर्यत्र तत्र ते । ददृशुस्तं न तत्रापि सभायां पुनराययुः ॥ ३० ॥ सर्वैः कृतः स दैत्येशः सावधानो यथा पुरा । उपविष्टः सभामध्ये हृदयेन विदूयता ॥ ३१ ॥ उवाच हि स्वतो वाचं मत्सरो भयविह्वलः । वचनं किमिदं सत्यमनृतं वा भविष्यति ॥ ३२ ॥ कालस्य कालरूपोऽहं मम मृत्युः कथं भवेत । असत्या नभसो वाणी न ज्ञाता न श्रुताऽपि च ॥ ३३ ॥ अष्टावरणसंयुक्तं ब्रह्मांडं सर्वमंजसा । अष्टावरणयुक्तेभ्यो मम मृत्युर्न जायते ॥ ३४ ॥ कोऽसौ वक्राननो जंतुः कथितः कुत्र वर्तते । तं हनिष्यामि दृश्यश्चेत् क्षणमात्रान्न संशयः ॥ ३५ ॥ इति श्रुत्वा वचस्तस्य मत्सरस्य दुरात्मनः । ऊचुः प्रह्लादमुख्यास्तं विनयेन समन्विताः ॥३६॥ प्रह्लादादय ऊचुः ॥ मा कुरुष्व महाभाग चिंतां शत्रुनिषूदन । तव मृत्युः कथं भावी पश्चात् सूर्योदयः कथम् ॥ ३७ ॥ अस्माकं शत्रुभावेन स्थिता देवाः महेश्वराः । जितास्तदपि सर्वे ते छिद्रदर्शिन एव च ॥ ३८ ॥ तैश्च माया कृता च स्यादीदृशी वाऽसुरोत्तम । अन्यथा ते महामृत्युः कथं भवति मानद ॥ ३९ ॥ तेयमाकाशवाणी भोस्तस्माद्देवान् महेश्वरान् । हनिष्यामोऽद्य दैत्येश शत्रुहीनास्तदा वयम् ॥ ४० ॥ तेषां वचनमाकर्ण्य मत्सरश्चैव हर्षितः । सत्यमुक्तं भवद्भिर्यद्धंतव्यं विद्विषां वधं ॥ ४१ ॥ मत्सराज्ञां समादाय निःसृता दैत्यपुंगवाः । विचिन्वंति स्म सर्वत्र देवान् सर्वान् प्रयत्नतः ॥ ४२ ॥

इति श्रीमदान्त्ये पुराणोपनिषदि श्रीमन्मौद्गले महापुराणे प्रथमे खंडे वक्रतुंडचरिते मत्सरासुरविचारो नाम त्रयस्त्रिंशोऽध्यायः ॥



॥ श्रीगणेशाय नमः ॥ मुद्गल उवाच । दैत्या भ्रमणयुक्तास्ते आययुर्दुंढिसन्निधौ । यत्र देवगणैर्युक्तो वक्रतुंडः प्रतापवान् ॥ १ ॥ दृष्ट्वा तं वक्रतुंडं ते भयभीतास्तदाऽभवन् । महाकायं महावीर्यं नरनागस्वरूपिणम् ॥ २ ॥ नानावीरैः परिवृतं प्रलयाग्निसमैः परैः । देवैर्हर्षसमायुक्तैः संस्तुतं भक्तिभावितैः ॥ ३ ॥ मनसा दैत्यपाः सर्वे मेनिरे मृत्युमात्मनः । सत्याकाशभवा वाणी सोऽयं वक्राननो भवेत् ॥ ४ ॥ वक्रतुंड जय त्वं वै जय त्वं जय सर्वदा । देवैः प्रकथ्यते तस्माद्वक्रतुंडोऽयमागतः ॥ ५ ॥ यदि युद्धं करिष्यामोऽनेन सार्धं महाद्भुतम् । युद्धे वयं मृताश्चेद्वा वृत्तांतं को निवेदयेत् ॥ ६ ॥ अतो मत्सरदैत्येशं गमिष्यामो जवान्विताः । एवं निश्चययुक्तास्ते मत्सरं जग्मुरादरात् ॥ ७ ॥ स देवो वक्रतुंडस्तु दूरतः पंचयोजनम् । ईर्ष्यापूरं परित्यज्य स्थितः कृत्वा सभां प्रभुः ॥ ८ ॥ दैत्यास्ते मत्सरं गत्वा वृत्तांतं तं न्यवेदयन् । भो राजन् सत्यमेवेदं वचनं खसमुद्भवम् ॥ ९ ॥ नरकुंजररूपेण दृष्टो वक्राननः प्रभुः । देवैः समावृतो भूप विचारं कुरु सर्वथा ॥ १० ॥ तेषां वचनमाकर्ण्य मत्सरश्चिंतयान्वितः । बभूव म्लानतुंडश्च ज्ञात्वा शत्रुं महाबलम् ॥ ११ ॥ ततः क्रोधसमाविष्टस्तं हंतुं कृतवान् मनः । आज्ञापयत् स दैत्येंद्रान् सज्जिता भो भवंत्विति ॥ १२ ॥ गमिष्यामि रिपुं हंतुं वक्रतुंडं महाबलम् । सदेवं सपरीवारं ततो हृदि सुखं भवेत् ॥ १३ ॥ आज्ञामात्रेण दैत्येशाः सन्नद्धाः समुपाययुः । हर्षेण महता युक्ता देवमर्दनलालसाः ॥ १४ ॥ चतुरंगं महत्सैन्यं निःसृतं नगराद्बहिः । तन्मध्ये मत्सरो वीरः शुशुभे रथसंगतः ॥ १५ ॥ आगतास्ते त्वराभाजो वक्रतुंडः स्थितो यतः । तान् दृष्ट्वा देवसंघास्तं शशंसुर्गणनायकम् ॥ १६ ॥ स्वामिन् समागतो दैत्यः स्वयमेव महाप्रभो । यत्करिष्यसि देवस्त्वं त्वरया तत् कुरु प्रभो ॥ १७ ॥ अस्मान्नोचेच्च दैतेया हनिष्यंति महाबलाः । मरणं प्राप्तमस्माभिः कुत्र स्थातुं न शक्यते ॥ १८ ॥ देवानां वक्रतुंडश्च श्रुत्वा वचनमादरात् । उवाच विस्मितो भूत्वा मा भयं कुरुत प्रियाः ॥ १९ ॥ स दैत्यं मत्सरं देवा हनिष्यामि न संशयः । पश्यंतु कौतुकं युद्धे मदीयं परमाद्भुतम् ॥ २० ॥ इत्युक्त्वा वक्रतुंडः स सिंहारूढोऽभवत्प्रभुः । पाशांकुशकरो गर्जन्मेघनादसमस्वनः ॥ २१ ॥ तस्य शब्देन संत्रस्तं त्रैलोक्यं सचराचरम् । भयभीता दैत्यगणा बभूवुश्च प्रजापते ॥ २२ ॥ मत्सरो हृदि संत्रस्तो वचनं चेदमब्रवीत् । दृश्यते प्रबला सेना किं भविष्यति दैत्यपाः ॥ २३ ॥ भययुक्तं वचस्तस्य श्रुत्वा तं दैत्यपा जगुः । वयं योत्स्यामहे स्वामिन् पश्य त्वं युद्धजं महः ॥ २४ ॥ इत्युक्त्वा मत्सरं सर्वे प्रह्लादप्रमुखाः सुराः । वक्रतुंडं ययुर्वीरा

नादयंतस्त्रिविष्टपम् ॥ २५ ॥ बाणवृष्टिं महोग्रां ते चक्रुः क्रोधसमन्विताः । ववर्षुरस्त्रशस्त्राणि वर्षाकाले घना इव ॥ २६ ॥ तैरस्त्रैर्दैत्यराजैश्च हता सेना दिवौकसाम् । देवा विष्णुमुखास्तत्र युयुधुस्तान् समागतान् ॥ २७ ॥ घोरयुद्धं ततस्तेषां देवासुरविनाशनम् । अभवद्दारुणं क्रूरं द्रष्टुं नैव प्रशक्यते ॥ २८ ॥ देवाश्च दानवाश्चैव युयुधुः शस्त्रपाणयः । मरणे निश्चयं कृत्वा परस्परजयेप्सवः ॥ २९ ॥ केचिद्बाणमयीं वृष्टिं चक्रुः शक्तीस्तु केचन । चिक्षिपुर्भिंदिपालांश्च खड्गैर्वै चिच्छिदुः परे ॥ ३० ॥ बबंधुरपरे पाशैर्भल्लैर्वा विव्यधुः परे । गदायुद्धं महाघोरं चक्रिरे वीरसत्तमाः ॥ ३१ ॥ मुद्गरैश्च महावीरा मारयामासुरोजसा । मल्लयुद्धं परे चक्रुर्नादयंतो दिशो दश ॥ ३२ ॥ सैन्यस्य रजसा सर्वं व्याप्तमासीद् दिगन्तरम् । नाभूत् स्वपरबोधोऽपि पुरोगान् जघ्निरे तदा ॥ ३३ ॥ शस्त्रैः शस्त्राणि संवार्य तथास्त्रैरस्त्रसंचयम् । बाणैर्बाणान् समारुध्य चिच्छिदुस्ते परस्परम् ॥ ३४ ॥ शस्त्रे भग्ने च ते वीरा मल्लयुद्धं सुदारुणम् । चक्रिरे क्रोधसंयुक्ता मंडलानि प्रबभ्रमुः ॥ ३५ ॥ हस्तेन हस्तमापीड्य पादैः पादान् प्रगृह्य च । कूर्परं कूर्परेणैव मर्दयामासुरोजसा ॥ ३६ ॥ मस्तकं मस्तकेनैव जानुभ्यां जानुनी तथा । ललाटेन ललाटं च स्फालयामासुरोजसा ॥ ३७ ॥ एवं युद्धे प्रवृत्ते वै मृताः केचित्तु मूर्च्छिताः । भग्नाः केऽपि क्षता अन्ये नानाशस्त्रप्रहारतः ॥३८॥ शोणितौघवहा घोरा नदी जाता दुरत्यया । रक्तेन सर्वतस्तत्र रणवो मज्जितास्ततः ॥ ३९ ॥ तेन प्रकाशितास्तत्र दिशः स्वपरबोधिकाः । ततोऽभूत्तुमुलं युद्धं यथायोग्यं प्रजापते ॥ ४० ॥ रथिनो रथिभिः सार्धं गजिनो गजिभिस्तथा । अश्वारूढा हयारूढैः पदाताश्च पदातिभिः ॥४१॥ श्रेष्ठा युयुधिरे श्रेष्ठैर्महाबलसमन्वितैः । प्रबोध्य जघ्निरे केचिद्वीराः समरशालिनः ॥ ४२ ॥ परस्परमभिंदंस्ते शस्त्रास्त्रैर्मर्मभेदिभिः । सर्वे शुशुभिरे चैव पुष्पिताः किंशुका इव ॥ ४३ ॥ कदाचिज्जयिनो देवाः कदाचिद्दानवास्तथा । न रात्रौ विश्रमं चक्रुः क्रोधयुक्ताः परस्परम् ॥ ४४ ॥ एवं पंचदिनं युद्धमभवत्तत्र दारुणम् । न जयं प्राप्नुयुर्देवा दैत्याश्चाऽपि प्रजापते ॥ ४५ ॥

॥ ॐमिति श्रीमदान्दे पुराणोपनिषदि श्रीमन्मौद्गले महापुराणे प्रथमे खण्डे वक्रतुंडचरिते देवासुरयुद्धप्रसंगो नाम चतुस्त्रिंशोऽध्यायः ॥

॥ श्रीगणेशाय नमः ॥ मुद्गल उवाच । एवं परस्परं घोरं युद्धं कृत्वा महाबलाः । न जयं प्राप्नुवंति स्म कर्म चैव यथासुरम् ॥ १ ॥ तं दृष्ट्वा परमाश्चर्यं प्रह्लादः कुपितोऽभवत् । धनुः सज्जं महाघोरं कृत्वा बाणान् समाददे ॥ २ ॥ मंत्रयन्ननलास्त्रेण चिक्षेप स शरान् बहून् । तेभ्यो जातो महानग्निः प्रलयानलसंनिभः ॥ ३ ॥ ददाह देवसेनां स प्रह्लादोऽसुरसत्तमः । भयभीताः सुराः सर्वे जज्वलुश्च समंततः ॥ ४ ॥ हाहाकारं प्रकुर्वंतो दग्धास्ते जातवेदसा । मर्यादां रणभूमिं च तथा त्यक्त्वा पलायिताः ॥ ५ ॥ महाग्निः सर्वतस्तान् वै सुरान् वाहनसंयुतान् । प्रबलो दाहयामास प्रह्लादेन प्रचोदितः ॥ ६ ॥ तेन दैत्यगणाः सर्वे हर्षयुक्ता बभूविरे । प्रह्लादं पूजयंतस्ते साधु साधु कृतं त्वया ॥ ७ ॥ सर्वान् पलायमानान् स सुरान् दृष्ट्वा पुरंदरः । मेघास्त्रं योजयामास धनुषि क्रोधसंयुतः ॥ ८ ॥ एतस्मिन्नंतरे तत्र प्रह्लादः समुपागतः । खड्गेन सहसेंद्रस्य धनुश्चिच्छेद लाघवात् ॥ ९ ॥ तत इंद्रः प्रकोपेन वज्रं तत्याज तं प्रति । वज्रेण निहतो भूमौ प्रह्लादः स पपात ह ॥ १० ॥ पतितं तं तथा दृष्ट्वा महिषासुर आगतः । गदया देवराजं तं जघान खलु मस्तके ॥ ११ ॥ गदया निहतः सोऽपि पपात रणमूर्धनि । मघवा मूर्च्छितोऽत्यंतं मुखाद्रक्तं समुद्वमन् ॥ १२ ॥ ततोऽग्निः परमक्रुद्धो जज्वाल ज्वालयासुरम् । महिषो जलरूपोऽभूत् प्लावयामास तं क्षणात् ॥ १३ ॥ निस्तेजाश्चितया युक्ताः शक्तिं चिक्षेप पावकः । तां खड्गेन महादैत्यः पातयामास भूतले ॥१४॥ ततो महिषरूपेण शृंगाभ्यां दहनं पुनः । चकार मूर्च्छितं क्रुद्धः पपात महसां निधिः ॥ १५ ॥ ततो ययौ यमस्तं वै दंडघातेन सोऽहनत् । जक्रे संमूर्च्छितं दैत्यं महिषं भयदायकम् ॥ १६ ॥ एतस्मिन्नंतरे तत्र प्रतापी च विरोचनः । खड्गेन तं जघानाशु यमं सर्वभयंकरम् ॥ १७ ॥ पपात खड्गाघातेन यमो यमवतां प्रभुः । वरुणस्तं बबंधापि पाशेन च विरोचनम् ॥ १८ ॥ ततस्तं मोचयामास पाशं छित्वा महाबलः । अंधकः खड्गाघातेन गदया वरुणं तथा ॥ १९ ॥ मूर्च्छितं च चकाराऽभूदुत्थितः स विरोचनः । ततो वायुः कुबेरश्च तावुभौ क्रोधमूर्च्छितौ ॥ २० ॥ वायुना खड्गघातेन मूर्च्छितस्त्वमितौजसा । अंधकासुरनामाऽसौ पपात धरणीतले ॥ २१ ॥ शंबरेण हतो वायुर्मुसलेन महाबलः । स पपात तदा भूमौ देवः सर्वधरोऽपि सन् ॥ २२ ॥ विरोचनेन बाणौघैस्ताडितो धनरक्षकः । मर्मभेदिभिरत्युग्रैः पपाताऽसौ महाबलः ॥ २३ ॥ एतस्मिन्नंतरे तत्र विष्णुः स्वयमुपागतः । गदया तं जघानैव विरोचनमथो रिपुम् ॥ २४ ॥ भिन्नोरसं च दैत्येशं मृततुल्यं चकार ह । अधंकं चक्रघातेन पातयामास केशवः ॥ २५ ॥

शंबरं बाणजालैः संपातयामास भूतले । कुपितो माधवस्तत्र चक्रं तत्याज दारुणम् ॥ २६ ॥ चक्रेण क्षुरधारेण हता दैत्याः सहस्रशः । गदया मूर्च्छिताः केचित् मुरुया ये तत्र संस्थिताः ॥ २७ ॥ एतस्मिन् समरे वीरः प्रह्लादः संबभूव ह । सावधानो महाभागस्तं ययौ क्रोधदीपितः ॥ २८ ॥ बाणवृष्टिं चकाराऽसौ महोग्रां देवनाशिनीम् । तया नांच्छिन्नभिन्नांगान् देवांश्चक्रे धरातले ॥ २९ ॥ गदया देवदेवेशं केशवं युयुधे भृशम् । खड्गेन मूर्च्छितं चक्रे गरुडं दैत्यनायकः ॥ ३० ॥ ततश्च कुपितो विष्णुस्तं हंतुं चक्रमाददे । बहुधा भ्रामयामास तत्याज ह्यस्त्रमुत्तमम् ॥ ३१ ॥ तन्मस्तकानि दैत्यानां चक्रं चिच्छेद सर्वतः । बाहूदरभुजांश्चैव चकार शकलीकृतान् ॥ ३२ ॥ सहसाऽसुरराजं च प्रह्लादं हंतुमाययौ । चक्रं तेजोमयं दिव्यं समीपे ज्वलनप्रभम् ॥ ३३ ॥ प्रह्लादस्त्वरयास्त्रं च महाधनुषि संदधे । नारायणात्मकं चैव हृदि स्मृत्वा जनार्दनम् ॥ ३४ ॥ मुमोच तत महास्त्रं वै तेजोरूपममोघकम् । अनिवार्यं जगद्भस्मकारकं कुपितः परः ॥ ३५ ॥ नारायणास्त्रवेगेन चक्रं प्रतिहतं ततः । देवान् सर्वान् ददाहापि महास्त्रं सर्वतः परम् ॥ ३६ ॥ हृदये सहसागत्य पतितं केशवस्य तत् । मूर्च्छितं मृततुल्यं तं चकार च जनार्दनम् ॥ ३७ ॥ ततो मदयुता दैत्या जगर्जुर्हर्षसंयुताः । प्रशशंसुर्महाभागं प्रह्लादं तेजसान्वितम् ॥ ३८ ॥ नारायणास्त्रसंदग्धान् देवर्षीन् वीक्ष्य शंकरः । क्षुभितो देवरक्षार्थं पिनाकं स्वकरे दधौ ॥ ३९ ॥ महास्त्रं तत पाशुपतं संदधे क्रोधसंयुतः । बलेन मोचयामास त्वरावान् शंकरोऽभवत् ॥ ४० ॥ महास्त्रं वै पाशुपतं तथा नारायणात्मकम् । उभे अस्त्रे संयुगे ते युयुधाते विहायसि ॥ ४१ ॥ देवा मुनिगणास्तत्र हर्षयुक्ता बभूविरे । प्रशशंसुर्महादेवं देवदेवं च शंकरम् ॥ ४२ ॥ ततः पशुपतिः क्रुद्धस्त्रिशूलं संदधे मुने । तत्याज दैत्यसेनायां कुर्वाणं प्रलयं परम् ॥ ४३ ॥ त्रिशूलं च करोति स्म मृतान् दैत्यान् सहस्रशः । प्रह्लादहृदयकस्मात् पपात यमसन्निभम् ॥ ४४ ॥ तेनाऽसौ पतितो भूमौ वाताहत इव द्रुमः । दैत्यसैन्ये महानासीत्तदा कोलाहलः परः ॥ ४५ ॥ ततस्त्रिशूलवेगेन शितेन सहसाऽसुराः । मूर्च्छिताश्च कृताः केचित् केचिद्धि मारिता मुने ॥ ४६ ॥ सर्वेऽसुरगणास्तत्र पतिता रणमूर्धनि । ततो मत्सरपुत्रौ द्वौ शंकरं जग्मतुः प्रभो ॥ ४७ ॥ सुंदरप्रियनामा च विषयप्रिय एव यः । ऊचतुः शंकरं तत्र क्रोधयुक्तौ महासुरौ ॥ ४८ ॥

॥ इति श्रीमदान्त्ये पुराणोपनिषदि श्रीमन्मौद्गले महापुराणे प्रथमे खंडे वक्रतुंडचरिते शिवविजयो नाम पंचत्रिंशोऽध्यायः ॥

॥ श्रीगणेशाय नमः ॥ दक्ष उवाच। वद ब्रह्मन्विशेषेण मम हर्षकरीं कथाम्। विस्तरेण महाभाग वक्रतुंडप्रभावजाम् ॥ १ ॥ मुद्गल उवाच। न शक्यतेऽग्निपुत्रेण विस्तरेण पिनाकिना। शेषेण विधिना वक्तुं संक्षेपेण ब्रवीम्यतः ॥ २ ॥ दक्ष उवाच। किमुक्तं दैत्यपुत्राभ्यां शंकरेण श्रुतं वद। श्रुत्वा तत् किं कृतं तेन महादेवेन मानद ॥ ३ ॥ दैत्याभ्यां किं कृतं तत्र तद्वद त्वं विशेषतः। श्रुत्वा त्वद्वदनांभोजात् कथां तृप्याम्यहं न च ॥ ४ ॥ सूत उवाच। एवमादरमाज्ञाय दक्षस्य प्रयतात्मनः। मुद्गलस्त-मुवाचाथ हर्षयुक्तः स शौनक ॥ ५ ॥ मुद्गल उवाच। दैत्यपुत्रौ महावीर्यौ शंकरं क्रोधसंयुतौ। यदूचतुश्च तत्सर्वं शृणु दक्ष प्रजापते ॥ ६ ॥ मत्सरपुत्रावूचतुः। तिष्ठ तिष्ठ महादेव पश्य पौरुषमावयोः। ज्ञातं त्वदीयं सामर्थ्यं न च गंतुं त्वमर्हसि ॥ ७ ॥ अस्मदीया महासेना हता सर्वा सदाशिव। दैत्येंद्राः पातिताः सर्वे त्वया शंकर तेजसा ॥ ८ ॥ पौरुषं दर्शितं पूर्णं सर्वदेवातिगं महत्। अधुना त्वां हनिष्यावो वक्रतुंडस्य पश्यतः ॥ ९ ॥ त्वां हत्वा वक्रतुंडं च हनिष्यावो न संशयः। पश्चात् सर्वान् सुरेंद्रांश्च ततो मुनिगणान् सुरान् ॥ १० ॥ एवमुक्त्वा महादेवं धनुः सज्जं प्रचक्रतुः। तावुवाच महादेवः स्मयमान इदं वचः ॥ ११ ॥ शिव उवाच। भवद्भ्यां गदितं क्रूरं तत्सर्वं तथ्यमेव च। अधुनाऽयं समुत्पन्नो वक्रतुंडो महाबलः ॥ १२ ॥ भूभारहरणार्थं वै भवतां नाशनाय च। अधुना स गतः कालो विपरीतेन कर्मणा ॥ १३ ॥ वक्रतुंडप्रसादेन हनिष्यामि समत्सरम्। असुरं बलमत्यर्थं पापरूपं न संशयः ॥ १४ ॥ इत्युक्त्वा बाणवृष्टिं स चक्रे वै शंकरः प्रभुः। महोग्रां कालरूपां वै प्रलयस्य प्रकाशिनीम् ॥ १५ ॥ तां च चिच्छिदतुर्दैत्यौ स्वशरैरतिवेगितैः। तौ मंडपं क्षणेनैव चक्रतुः शरसंभवम् ॥ १६ ॥ तद्बाणैरपि ते देवाश्छिन्ना भिन्नाः कृता मुने। शंकरो विस्मितो भूत्वा शूलमुग्रं मुमोच ह ॥ १७ ॥ आगतं कालरूपं च शूलं दृष्ट्वा महासुरौ। महास्त्रं तौ पाशुपतं मोचयामासतुस्तदा ॥ १८ ॥ अनिवार्यं महोग्रं वै सर्वभस्मकरं परम्। जज्वाल तेजसा सर्वं ब्रह्मांडं व्याकुलं ततः ॥ १९ ॥ त्रिशूलं निष्फलं तेन महास्त्रेण कृतं क्षणात्। शिवस्य हृदये गत्वा पपात भयदायकम् ॥ २० ॥ मूर्च्छितः शंकरस्तेन पतितो धरणीतले। हाहाकारश्च सर्वत्र देवसैन्ये ततोऽभवत् ॥ २१ ॥ पतितं शंकरं दृष्ट्वा वक्रतुंडो महाबलः। स्वां सेनां प्रेरयामास दैत्यमर्दनलालसः ॥ २२ ॥ गणेशदूतमुख्यास्तेष्वष्टौ तत्राययुः परे। स्वां स्वां सेनां समादाय महाकाया महाबलाः ॥ २३ ॥ प्रमोदश्चैष आमोदस्तथा ब्रह्मप्रियो मुने। योगप्रियश्च स्वानंदभोक्ता ज्ञानमयश्च हि ॥ २४ ॥ सर्वगः सर्वविच्चैव क्रोधयुक्ताः समाययुः। तैः प्रेक्षिताः सुराः सर्वे गतमूर्च्छास्तदाऽभवन् ॥ २५ ॥

श्रमहीनाः क्षतादिभ्यो हीना जाताः प्रभावतः । तेजसा द्विगुणाश्चैव हृष्टपुष्टा यथा मुने ॥ २६ ॥ एतस्मिन्नंतरे तत्र कविना जीवितास्तथा । दैत्याः समुत्थिताः सर्वे नीरुजश्च महाबलाः ॥ २७ ॥ प्रह्लादप्रमुखा वीराश्चक्रुर्नादं समंततः । ब्रह्मांडमखिलं तेन सनादमभवत् परम् ॥ २८ ॥ ततो देवगणाः सर्वे शंखनादं प्रचक्रिरे । तेन दैत्यगणा भीता बधिरा इव ते स्थिताः ॥ २९ ॥ शंखानां चैव भेरीणां दुंदुभीनां स्वरैः परैः । वीराणां क्ष्वेडितैश्चैव हेषितैर्बृंहितस्वनैः ॥ ३० ॥ रथनेमिस्वनैः सर्वं व्याप्तमासीन्नभो मुने । परस्परं संपदं च वीक्ष्य वीक्ष्य च विस्मिताः ॥ ३१ ॥ एतस्मिन्नेव काले ते प्रमोदाद्या गणा ययुः । कुपिताः शस्त्रसंवृष्टिं चक्रिरे दैत्यमोहिनीम् ॥ ३२ ॥ तेषां शस्त्राणि सर्वाणि ह्यमोघानि महामुने । चिच्छिदुर्दैत्यराजानां मस्तकानि भुजादिकान् ॥ ३३ ॥ ब्रह्मप्रियो महाबाहुः शुक्रं धृत्वा प्रपश्यताम् । असुराणां गतो दूरं गुहायां चाक्षिपत् मुनिम् ॥ ३४ ॥ गतं शुक्रं तदा दृष्ट्वा दैत्याः सर्वे भयातुराः । हाहाकारं प्रचक्रुस्ते किं भविष्यति विह्वलाः ॥ ३५ ॥ रक्षिता गुरुरत्युग्रः पश्यतां नो महासुराः । नीतश्च मरणं तस्माच्छ्रेष्ठं किं न मृता वयम् ॥ ३६ ॥ अधुना क्व गमिष्यामस्तस्माद्युद्ध्यामहे वयम् । मरिष्यामोऽथ वा मोचयिष्यामस्तं स्वतेजसा ॥ ३७ ॥ परस्परं चेति दैत्या उक्त्वा मरणनिश्चयाः । उदायुधाश्च सर्वे ते युयुधुर्देवसैनिकैः ॥ ३८ ॥ व्यंगा देवाः कृतास्तैस्ते पतिता रणमूर्धनि । हाहाकारश्च सर्वत्र देवसैन्ये प्रवर्तितः ॥ ३९ ॥ ततो ब्रह्मप्रियाद्या ये कुपिताः शस्त्रधारिणः । परशुप्रमुखैः शस्त्रैस्त्रिशूलांकुशपाशकैः ॥ ४० ॥ शस्त्रैर्दैत्यान्निजघ्नुस्तान् कालरुद्रा इव प्रजाः । तैरस्त्रैर्दैत्यसेनायाः कदनं कृतमंजसा ॥ ४१ ॥ बहवश्च मृता दैत्या मूर्च्छिताश्चापरेऽवनौ । पेतुस्ते सर्वशो वीरा प्रह्लादप्रमुखा मुने ॥ ४२ ॥ ततो दैत्यकुमारौ तावागतौ रणमूर्धनि । ऊचतुस्तान् गणांस्तत्र प्रमोदाद्यान महासुरौ ॥ ४३ ॥ दैत्यपुत्रावूचतुः । प्रमोदामोदकाद्याश्च भवद्भिर्बलमंजसा । हतं सर्वं च दैत्यानां दैत्यश्रेष्ठाः प्रमूर्च्छिताः ॥ ४४ ॥ अधुना मरणं प्राप्तं समीपे वः प्रपश्यताम् । शस्त्रैस्तीक्ष्णैर्हनिष्यावो वक्रतुंडयुतान् खलान् ॥ ४५ ॥ एवमुक्त्वा स्वबाणांस्तौ ववर्षतुरथासुरौ । ततस्तयोर्बलं वीक्ष्य द्वौ वीरौ समुपस्थितौ ॥ ४६ ॥ सर्वगः सर्वविच्चैव सबलौ धृतकार्मुकौ । बाणवृष्टिं तु संवार्य बाणांश्चिक्षिपतुः परान् ॥ ४७ ॥ अमोघाः सर्वबाणास्ते जग्मुः कालयमोपमाः । दैत्यान सर्वान प्रचक्रुस्ते छिन्न-भिन्नात्मकान मुने ॥ ४८ ॥ मृता मुमूर्षवः केचित्पतिता धरणीतले । अकस्माद्रक्तसंभूता नदी तत्र प्रवर्तिता ॥ ४९ ॥ तयोर्बलं निरीक्ष्यैव कंपितौ दैत्यपुंगवौ । अग्न्यस्त्रं धनुषि श्रेष्ठं दधतुः क्रोधसंयुतौ ॥ ५० ॥ यावत् मुमुचतुस्तावत् परश

यमसन्निभौ। आगतौ च शिरश्छेदं दैत्ययोश्चक्रतुः क्षणात् ॥ ५१ ॥ मत्सरस्य सुतौ वीक्ष्य मृतौ सर्वे भयातुराः। मत्सरं शरणं जग्मुरूचुर्वृत्तांतमंजसा ॥ ५२ ॥ दैत्या ऊचुः। श्रृणु दैत्येश वृत्तांतं रणभूमिसमुद्भवम् । महाभयंकरं घोरं कथितुं शक्यते न च ॥ ५३ ॥ प्रह्लादप्रमुखाः सर्वे घातिता रणमूर्धनि। मृततुल्या मृता वा किमस्माभिर्ज्ञायते न च ॥ ५४ ॥ तव पुत्रौ महावीर्यौ मृतौ संग्राममंडले। कृत्वा युद्धं महाघोरं परशुभ्यां महामते ॥ ५५ ॥ अकस्माद्वक्रतुंडस्य गणौ द्वौ समुपस्थितौ। ताभ्यां चैव हतौ वीरौ स्वल्पकालेन दैत्यप ॥ ५६ ॥ वक्रतुंडसमश्चैव न भूतो न भविष्यति। इति स्वांते च संज्ञाय देवं तं शरणं व्रज ॥ ५७ ॥ नोचेदैत्यगणाः सर्वे नाशं यास्यंति निश्चितम् । मा गर्वं कुरु दैत्येश दैत्यान् रक्ष महामते ॥ ५८ ॥

॥ ओमिति श्रीमदान्त्ये पुराणोपनिषदि श्रीमन्मौद्गले महापुराणे प्रथमे खण्डे वक्रतुंडचरिते सुंदरप्रियविषयप्रियवधो नाम षट्त्रिंशोऽध्यायः ॥

॥ श्रीगणेशाय नमः। मुद्गल उवाच। दैत्यानां वचनं श्रुत्वा स दैत्यो मत्सरासुरः। मूर्च्छितः सहसा भूमौ पपात भयविह्वलः ॥१॥ अनिश्वसन् दैत्यपस्तु तैराशु विधृतो नृपः। सावधानं प्रचक्रुस्तं प्रयत्नैः परमैस्ततः ॥ २ ॥ द्विमुहूर्तेन संबुद्धो मत्सरः प्रललाप ह। किं जातं भावि वा किं वा दैवेन विफलं कृतम् ॥ ३ ॥ तपसा त्वमरत्वं च पृथिवीराज्यमंजसा। मया प्राप्तं स्वसामर्थ्यादतुलं तद् वृथा कृतम् ॥४॥ अहो हि बलवद् दैवं प्रयत्नो निष्फलो मतः। अचिंत्या मेऽभयप्राप्तिः पश्चात् सूर्योदयो यथा ॥ ५ ॥ मृता दैत्या असंख्याश्च मदर्थं नात्र संशयः। मृतौ पुत्रौ महाकालौ कालस्य कथमद्य तौ ॥ ६ ॥ अधुना शोकसंतप्तो मरिष्यामि न संशयः। मृतौ पुत्रौ महाकालौ किं कार्यं जीवितेन मे ॥ ७ ॥ ब्रह्मांडाधिपतेः पुत्रौ कथं तौ निधनं गतौ। कथं मिथ्या हि जातं मे वरदानं महत्तरम् ॥ ८ ॥ अहो पुत्रौ महावीर्यौ कथं मरणमापतुः। याभ्यां स्वभुजवीर्येण जिता विष्णुमुखाः सुराः ॥९॥ अहो पुत्रौ च मां त्यक्त्वा घोरे दुःखार्णवे परे। क्व गतौ वदतं वाक्यमभूतं निष्ठुरौ कथम् ॥ १० ॥ सखींश्च पितरं वृद्धं त्यक्त्वा मां सुंदरप्रिय। विषयप्रिय मद्वालौ कथं मृत्युमुपस्थितौ ॥ ११ ॥ इति नानाविधं शोकं चक्रे दैत्येंद्रपालकः। तं ते सभ्यवराः सर्वे सांत्वयामासुरादरात् ॥ १२ ॥ वृद्धा ऊचुः। न रोदनं प्रकर्तव्यं त्वया दैत्येंद्रनायक। रणे मृतौ महावीर्यौ कीर्तिं कृत्वा महत्तराम् ॥ १३ ॥ देहस्य मरणं नित्यं जन्म चैव तथा प्रभो। किं चित्रं

तच्च संजातं येन शोचसि दैत्यप ॥ १४ ॥ आत्मनो मरणं नैव जन्मशास्त्रेषु कथ्यते। मायामोहं परित्यज्य स्वस्थो भव महामते ॥ १५ ॥ जंतोरूर्ध्वक्रिया सर्वा कर्तव्या स्वजनैरपि। अतस्त्वं दैत्यराजेंद्र सार्थकं त्वेतयोः कुरु ॥ १६ ॥ अथवा तौ परित्यज्य वक्रतुंडं जहि प्रभो। अथवा शरणं याहि येनैव कुशलं भवेत् ॥ १७ ॥ वीरा रुदंति कुत्रापि नैव जानीहि दैत्यप। सपत्नान् हर्षसंयुक्तान् मा कुरुष्वाधुना परान् ॥ १८ ॥ एवं प्रबोधितो दैत्यो मत्सरः क्रोधसंयुतः। आदाय सकलं सैन्यं ययौ संग्राममंडलम् ॥ १९ ॥ मत्सरासुरमायांतं दृष्ट्वा शंभ्वादयः सुराः। भयभीताश्च तं प्रोचुर्वक्रतुंडं प्रणम्य ते ॥ २० ॥ स्वामिन समागतो दैत्यो मत्सरः स प्रतापवान्। यस्याग्रे सशक्रा देवास्तृणरूपा नरादयः ॥ २१ ॥ यस्याग्रे वशवर्तिन्यः श्रियः सर्वार्थदायिकाः। ब्रह्मांडं कंपते यस्य भयात्सोऽयं समागतः ॥ २२ ॥ यस्य राज्ये महाभागा जना दुःखविवर्जिताः। सर्वर्तुफलदा वृक्षा मेघाः कालप्रवर्षिणः ॥ २३ ॥ यस्याज्ञा वशगश्चासौ तपत्येव दिवाकरः। न शीतं प्रबलं तत्र मत्सरे राज्यभोगिनि ॥ २४ ॥ न रोगाः प्रचरंतीह भयभीताः समंततः। न च चोरादिसंत्रस्तं जगद्राज्यं प्रशासति ॥ २५ ॥ यस्य पूजा च सर्वत्र जगति क्रियते जनैः। यज्ञादि सर्वमखिलं भुक्तं येन महात्मना ॥ २६ ॥ कालो बिभेति यं दृष्ट्वा तदाज्ञा पालकोऽभवत्। कर्मखंडनमप्यत्र कृतं येन सुरारिणा ॥ २७ ॥ न स्वाहा न स्वधा यत्र न वषट्कार एव च। न वेदाध्ययनाचारो मत्सरे राज्यकर्तरि ॥ २८ ॥ न स्नानादिक्रिया यत्र न स्वधर्मः स्वभावजः। न वर्णाश्रमयोर्धर्मो मत्सरे राज्यकर्तरि ॥ २९ ॥ देवाः श्वापदतुल्या वै भ्रमंति वनगोचराः। अन्नवस्त्रादिसंहीनाः कृता दैत्येंद्रकेण भोः ॥ ३० ॥ मुनयस्तपसा हीनाः शापसामर्थ्यहीनकाः। कृता मत्सरदैत्येन सोऽयं स्वामिन समागतः ॥ ३१ ॥ देवांगनाश्च नरकन्या नागकन्या महात्मना। भुक्ता नानाविधा भोगाः सोऽयं मत्सर आगतः ॥ ३२ ॥ नरकन्याः पशोः कन्या मुनिकन्याः समाहृताः। बलेन न समं यस्य ब्रह्मांडे सोऽयमागतः ॥ ३३ ॥ यस्याष्टावरणैर्मृत्युर्न भवेच्च कदाचन। सोऽयं समागतो दैत्यः पश्य पश्य गणाधिप ॥ ३४ ॥ इत्येवं ब्रुवतो देवान वक्रतुंडो महाबलः। मा भयं कुरुत प्राज्ञा हनिष्यामीति सोऽब्रवीत् ॥ ३५ ॥ सिंहारूढो महाबाहुरेकदंतविराजितः। पाशांकुशधरो भूत्वा ययौ संग्राममंडलम ॥ ३६ ॥ प्रमोदामोदकाद्यैश्च संवृतं युद्धलालसम्। तं दृष्ट्वा क्रोधसंयुक्तो मत्सरः प्राह भर्त्सयन ॥ ३७ ॥ मत्सरासुर उवाच। किमर्थमागतस्त्वं मे वक्रतुंड रणेऽग्रतः। अद्यैव त्वां हनिष्यामि मा मुखं दर्शयस्व रे ॥ ३८ ॥ मूढोऽसि येन संग्रामं कर्तुमागत एव च । न मे मृत्युर्भवेदष्टावरणैर्देहधारिभिः

॥ ३९ ॥ शंभुविष्णुमुखैर्देवैः प्रेरितस्त्वं न बुध्यसे । मोहभावेन संयातो मत्सरेण युयुत्सुना ॥ ४० ॥ हन्मि त्वामेकबाणेन ससैन्यं नात्र संशयः । पदाघातेन मे भूमिर्विशीर्णा जायते खल ॥ ४१ ॥ तलप्रहारसंयुक्ताः पर्वताश्चूर्णतां गताः । तस्याऽग्रे कथमायातः कालेन प्रेरितोऽथवा ॥ ४२॥ शब्दगर्जनमात्रेण कंपते सचराचरम् । तस्याग्रे त्वं सुसंग्रामं किं करिष्यसि तद्वद ॥ ४३ ॥ ब्रह्मांडं सकलं युद्धे जितं येन प्रभावतः । तदा त्वं कुत्र गुप्तः सन् स्थितोऽसि भयभावितः ॥ ४४ ॥ समीचीनमिदं मूढाऽधुना खल कृतं त्वया । दृष्टः समीपगो जातो हतो मम भविष्यसि ॥ ४५ ॥ शरणं याहि मे दुष्ट जीवितुं यदि चेच्छसि । मदाज्ञावशगो भूत्वा वने तिष्ठ यथासुखम् ॥४६ ॥ मूढभावेन संयातं त्वां न हन्मि च निर्बलम् । प्रेरकान् मुनिदेवांस्ते तान् हनिष्यामि निश्चितम् ॥ ४७ ॥

॥ ओमिति श्रीमदान्त्ये पुराणोपनिषदि श्रीमन्मौद्गले महापुराणे प्रथमे खण्डे वक्रतुंडचरिते मत्सरासुरसमागमो नाम सप्तत्रिंशोऽध्यायः ॥

॥ श्रीगणेशाय नमः । मुद्गल उवाच । एवं ब्रुवंतमत्यंतं मत्सरं क्रोधसंयुतम् । वक्रतुंडः प्रसन्नात्मा स्मयन्निव जगाद तम् ॥ १ ॥ वक्रतुंड उवाच । मा गर्वं कुरु दैत्येश नाहं देवो न मानुषः । नासुरो नैव नागश्च न गंधर्वो न पर्वतः ॥ २ ॥ न नानायोनिजो जंतुर्नाष्टावरणजस्तथा । ब्रह्मरूपोऽहमानंदानंदकारक एव च ॥ ३ ॥ त्वां हंतुं मुनिदेवानां स्थापनार्थमिहागतः । हनिष्यामि त्वसंदेहाद् दैत्यनायक दुर्मते ॥ ४॥ शिथिलं वरपुण्यं ते सांप्रतं पापसंचयात् । नानापापफलार्थस्य दाता तेऽहं समागतः ॥ ५ ॥ अकर्तुं कर्तुमीशं मामन्यथाकर्तुमादरात् । जानीहि मत्सर त्वं वै किं करिष्यसि तद्वद ॥ ६ ॥ जीवितुं चेच्छसि प्राज्ञ तदा मां शरणं व्रज । स्वस्थाने धर्मविद्वेषं त्यक्त्वा त्वं तु सुखी भव ॥ ७ ॥ देवादीनां च विद्वेषं त्यक्त्वा तिष्ठसि दैत्य चेत् । तदा त्वां न हनिष्यामि जानीहि त्वं मतं मम ॥ ८ ॥ मुद्गल उवाच । वक्रतुंडवचः श्रुत्वा मत्सरो विस्मितोऽभवत् । उवाच तं प्रसन्नात्मा भक्तिभावेन यंत्रितः ॥ ९ ॥ मत्सर उवाच । वक्रतुंड नमस्तुभ्यं वद मे सकलं प्रभो । संशयं छिंधि तं पूर्वं हृदिस्थं गणनायक ॥ १० ॥ यदि त्वं सगुणो नासि निर्गुणोऽपि न वर्तसे । ब्रह्मरूपोऽसि सर्वेश तदाकारधरः कथम् ॥ ११ ॥ अन्यच्च त्वं महाभाग ब्रह्मभावेन संस्थितः । सुरासुरसमं ब्रह्म कथमेकं समाश्रितः ॥ १२॥ असुराणां निहंता त्वं सुराणां पालकोऽधुना । एतं मे संशयं ब्रह्मन् छेत्तुमर्हसि विघ्नप ॥ १३ ॥ मत्सरस्य वचः श्रुत्वा वक्रतुंडः प्रतापवान् । उवाच तं

महावीरं भावं दृष्ट्वा हृदि स्थितम् ॥ १४ ॥ वक्रतुंड उवाच । शृणु मत्सर यत्पृष्टं त्वया बुद्धिविशारद । तत्सर्वं कथयिष्यामि संशयच्छेदनाय ते ॥ १५ ॥ अखिलं ब्रह्मरूपेण मया सृष्टं चराचरम् । लीलार्थं बंधहीनेन स्वस्वधर्मयुतं परम् ॥ १६ ॥ पुरुषप्रकृतिभ्यां तत् पाल्यते ह्रियते मया । तयोर्हृदि स्थितेनैव चिंतामणिस्वरूपिणा ॥ १७ ॥ सर्वेषां चित्तवृत्तश्च चालकोऽहं न संशयः । मदाज्ञावशगं सर्वं वर्तते दैत्यपुंगव ॥ १८ ॥ यदा स्वधर्ममत्यंतं त्यक्त्वा देवगणेश्वराः । दैत्यानां निधनार्थं च यतंते मूलनाशकाः ॥ १९ ॥ तदा दैत्यहृदिस्थोऽहं तपसि प्रेरकोस्म्यतः । दैत्याः कुर्वंति च तपो देवानां प्रजिघांसया ॥ २० ॥ तपसा वरलाभेन देवान् घ्नंति महाबलाः । ततस्ते सततं देवाः सत्ताहीना भवंति वै ॥ २१ ॥ ततोऽहं देवसंघानां विपरीतो न संशयः । भवामि चासुराणां वै सिद्धिदाता महासुर ॥ २२ ॥ यदि दैत्या महादुष्टास्त्यक्त्वा घ्नंति स्वधर्मकम् । देवान् मूलविहीनांश्च कर्तुमिच्छंति दानव ॥ २३ ॥ तदाऽहं देवरूपेण तेषां हृदि समास्थितः । छिद्रं प्रकाशयाम्यादौ हनने दैत्यरक्षसाम् ॥ २४ ॥ ततस्तेनैव देवेंद्रा मार्गेण सुरविद्विषः । घ्नंति मत्सर ते सर्वं कथितं मे चरित्रकम् ॥ २५ ॥ यदि स्वहृदये देवा निश्चयं कुर्वते परम् । दैत्यानां तपसां विघ्नं कर्तव्यमिति सांप्रतम् ॥ २६ ॥ तदाऽहं वरदाता च भवाम्यसुरनायक । दैत्येभ्यो नात्र संदेहो देवगर्वप्रहारकः ॥ २७ ॥ यदि दैत्या महाभागा देवैर्जाता दुरासदाः । तदाऽहं दैत्यनाशाय भवामि तनुधारकः ॥ २८ ॥ यदा दैत्याश्च देवाश्च स्वस्वधर्मपरायणाः । तदाऽहं ब्रह्मभावेन स्थितस्तेषां हृदि ह्यहो ॥ २९ ॥ त्वया प्रपीडिता देवास्त्यक्त्वा धर्मं स्वभावजम् । अतस्त्वां हंतुमायातो दैत्यराज महामते ॥ ३० ॥ इत्युक्त्वा निजरूपं तद्दर्शयामास विघ्नपः । बिंदुमात्रे ब्रह्मणि स्वे संस्थितं सुंदरं मुने ॥ ३१ ॥ वक्रतुंडप्रसादेन तस्य दर्शनजेन च । फलेन दैत्यराजोऽपि दिव्यं चक्षुरवाप्तवान् ॥ ३२ ॥ तेनैव चक्षुषा तेन दैत्येन परमाद्भुतम् । दृष्टं रूपं गणेशस्य ब्रह्माकारं प्रजापते ॥ ३३ ॥ न न्यूनं नाधिकं तत्र न समं चात्मना न च । चतुष्पादमयं ब्रह्म पादहीनं स्वभावतः ॥ ३४ ॥ न देहो न च देह्यत्र सगुणो निर्गुणो न च । न मायामायिको भाति वक्रतुंडो गजाननः ॥ ३५ ॥ देहं सगुणरूपं च निर्गुणं मस्तकं मुने । गजवक्त्रमयं तेन दृष्टं भिन्नं प्रभावतः ॥ ३६ ॥ तयोर्योगकरः साक्षाद् वक्रतुंडः प्रतापवान् । संयुक्तोऽवयवाद्यैश्च ज्ञातो दैत्याधिपेन सः ॥ ३७ ॥ ततस्तं प्रणनामाथ भक्तियुक्तेन चेतसा । तुष्टाव परया भक्त्या बद्धांजलिपुटोऽसुरः ॥ ३८ ॥ मत्सरासुर उवाच । नमामि वक्रतुंडं च चतुष्पादं चतुःपरम् । चतुर्देहविहीनं च बिंदुमात्रे व्यवस्थितम् ॥ ३९ ॥ साकारं

च निराकारं मायारूपधरं प्रभुम्। नमामि मायिनं तं च मायाहीनस्वरूपकम् ॥ ४० ॥ जगन्मयं च तद्धीनं सर्वकामप्रपूरकम्। ब्रह्मभूयप्रदं चैव नमामि गणनायकम् ॥ ४१ ॥ सिंहारूढं चतुर्बाहुं विघ्ननाशं नमामि च । सिद्धिबुद्धिपतिं चैव सिद्धिबुद्धिप्रदायकम् ॥ ४२ ॥ अनंतलीलया युक्तं लीलाहीनं नमामि तम्। अव्यक्तं व्यक्तरूपं वै नमामि स्वहृदि स्थितम् ॥ ४३ ॥ वेदांतवेद्यं सज्योतिर्ज्योतिषामपि भासकम्। नमामि सच्चिदानंददेहरूपं गजाननम् ॥ ४४ ॥ योगिनां हृदि संस्थं च योगिभ्यो योगदायकम्। भावाभावमयं देवं नमामि भववर्जितम् ॥ ४५ ॥ सर्वत्र पक्षहीनं तं सर्वपक्षधरं प्रभुम्। नमामि वक्रतुंडाख्यं ब्रह्मब्रह्माधिपं विभुम् ॥ ४६ ॥ अहो भाग्यमहो भाग्यं येन दृष्टो गजाननः। सर्वाकारनिराकारहीनोऽयं वक्रतुंडकः ॥ ४७ ॥ शरणं ते प्रपन्नोऽस्मि पाहि मां भक्तवत्सल । प्रवणं त्वत्पदे नित्यं संसारोत्तारणैषिणम् ॥ ४८ ॥ एवं स्तुत्वा वक्रतुंडं पादयोर्निपपात ह । पुनः पुनः प्रणम्याऽसौ बद्धांजलिपुटः स्थितः ॥ ४९ ॥ स दृष्ट्वा तादृशं दैत्यं भक्तियुक्तं गजाननः। जगाद तं महाभागं भक्तेशो भावतोषितः ॥ ५० ॥ वक्रतुंड उवाच । मत्सर त्वद्विनाशाय कुपितोऽहं न संशयः। शरणागतनाशं च नेच्छामि वृणु वाञ्छितम् ॥ ५१ ॥ इदं त्वया कृतं स्तोत्रं मत्प्रीतेर्वर्धनं महत् । महैश्वर्यायुरारोग्यदायकं धनधान्यदम् ॥ ५२ ॥ पुत्रपौत्रकलत्रादिनानासंपत्करं परम्। धर्मार्थकाममोक्षाणां दायकं प्रभविष्यति ॥ ५३ ॥ मुद्गल उवाच । वक्रतुंडवचः श्रुत्वा मत्सरो भक्तिसंयुतः । जगाद वचनं तत्र वक्रतुंडं कृतांजलिः ॥ ५४ ॥ मत्सर उवाच । प्रसन्नो यदि सर्वेश मह्यं देयो वरो यदि । सुदृढां च तदा भक्तिं त्वदीयां देहि विघ्नप ॥ ५५ ॥ अन्यं त्वं मे वरं देहि त्वद्भक्तास्ते च मे प्रियाः । स्थानं देहि तथा वृत्तिं योगक्षेमकरीं प्रभो ॥ ५६ ॥ मत्सरस्य वचः श्रुत्वा वक्रतुंडस्तमब्रवीत् । अचला यदि मे भक्तिरद्य ते संभविष्यति ॥ ५७ ॥ स्वस्वधर्मरतान् जंतूंस्तान् रक्षस्व च मत्सर। मदीयान् प्रवरान् भक्तांस्तान् पालय च यत्नतः ॥ ५८ ॥ मदीयमूर्तिपूजा च यत्रादौ स्मरणं भवेत् । सर्वारंभेषु तत्र त्वं मा विघ्नं कुरु दैत्यप ॥ ५९ ॥ अन्यत्र सर्वभावेषु कर्मज्ञानादिकर्तृषु । आसुरेणैव वर्तस्व फलं ग्राह्यं त्वयाऽसुर ॥ ६० ॥ तेषां हृदि समाविश्य कुरु राज्यं महामते । मद्भक्त्यादिषु भावेषु दासवत्त्वं सदा भव ॥ ६१ ॥ एवमुक्तो महादैत्यस्तथेति तमुवाच ह । प्रणिपत्य गणेशानं हर्षयुक्तेन चेतसा ॥ ६२ ॥

॥ ओमिति श्रीमदान्त्ये पुराणोपनिषदि श्रीमन्मौद्गले महापुराणे प्रथमे खण्डे वक्रतुंडचरिते वक्रतुंडविजयो नामाष्टत्रिंशोऽध्यायः ॥

॥ श्रीगणेशाय नमः ॥ मुद्गल उवाच । मत्सरं शांतिमापन्नं दृष्ट्वा देवर्षयस्तदा । प्रहृष्टमनसो जातास्तुष्टुवुस्तं गजाननम् ॥ १ ॥ देवर्षय ऊचुः । सदा ब्रह्मभूतं विकारादिहीनं विकारादिभूतं महेशादिवंद्यम् । अपारस्वरूपं स्वसंवेद्यमेकं नमामः सदा वक्रतुंडं भजामः ॥ २ ॥ अजं निर्विकल्पं कलाकालहीनं हृदिस्थं सदा साक्षिरूपं परेशम् । जनज्ञानकारं प्रकाशैर्विहीनं नमामः सदा वक्रतुंडं भजामः ॥ ३ ॥ अनंतस्वरूपं सदानंदकंदं प्रकाशस्वरूपं सदा सर्वगं तम् । अनादिं गुणादिं गुणाधारभूतं नमामः सदा वक्रतुंडं भजामः ॥४॥ धरावायुतेजोमयं तोयभावं सदाकाशरूपं महाभूतसंस्थम् । अहंकारधारं तमोमात्रसंस्थं नमामः सदा वक्रतुंडं भजामः ॥ ५ ॥ रविप्राणविष्णुप्रचेतोयमेशविधात्रश्विवैश्वानरेंद्रप्रकाशम् । दिशां बोधकं सर्वदेवाधिरूपं नमामः सदा वक्रतुंडं भजामः॥६॥ उपस्थत्वगुक्तीक्षणस्थप्रकाशं करांघ्रिस्वरूपं कृतघ्राणजिह्वम् । गुदस्थं श्रुतिस्थं महाखप्रकाशं नमामः सदा वक्रतुंडं भजामः ॥ ७ ॥ रजोरूपसृष्टिप्रकाशे विधिं तं सदा पालने केशवं सत्त्वसंस्थम् । तमोरूपधारं हरं संहरं तं नमामः सदा वक्रतुंडं भजामः ॥ ८ ॥ दिशाधीशरूपं सदाशास्वरूपं ग्रहादिप्रकाशं ध्रुवादिं खगस्थम् । अनंतोडुरूपं तदाकारहीनं नमामः सदा वक्रतुंडं भजामः ॥ ९ ॥ महत्तत्त्वरूपं प्रधानस्वरूपमहंकारधारं त्रयीबोधकारम् । अनाद्यंतमाद्यं तदाधारपुच्छं नमामः सदा वक्रतुंडं भजामः ॥ १० ॥ सदा कर्मधारं फलैः स्वर्गदं तमकर्मप्रकाशेन मुक्तिप्रदं तम् । विकर्मादिना यातनाधारभूतं नमामः सदा वक्रतुंडं भजामः ॥ ११ ॥ अलोभस्वरूपं सदा लोभधारं जनज्ञानकारं जनाधीशपालम् । नृणां सिद्धिदं मानवं मानवस्थं नमामः सदा वक्रतुंडं भजामः ॥ १२ ॥ लतावृक्षरूपं सदा पक्षिरूपं धनादिप्रकाशं सदा धान्यरूपम् । प्रसूपुत्रपौत्रादिनानास्वरूपं नमामः सदा वक्रतुंडं भजामः ॥ १३ ॥ खगेशस्वरूपं वृषादिप्रसंस्थं मृगेंद्रादिबोधं मृगेंद्रस्वरूपम् । धराधारहेमाद्रिमेरुस्वरूपं नमामः सदा वक्रतुंडं भजामः ॥ १४ ॥ सुवर्णादिधातुस्थसद्रंगसंस्थं समुद्रादिमेयस्वरूपं जलस्थम् । जले जंतुमत्स्यादिनानाविभेदं नमामः सदा वक्रतुंडं भजामः ॥ १५ ॥ सदा शेषनागादिनागस्वरूपं सदा नागभूषं च लीलाकरं तैः । सुरारिस्वरूपं च दैत्यादिभूतं नमामः सदा वक्रतुंडं भजामः ॥ १६ ॥ वरं पाशधारं सदा भक्तपोषं महापौरुषं मायिनं सिंहसंस्थम् । चतुर्बाहुधारं सदा विघ्ननाशं नमामः सदा वक्रतुंडं भजामः ॥ १७ ॥ गणेशं गणेशादिवंद्यं सुरेशं परं सर्वपूज्यं सुबोधादिगम्यम् । महावाक्यवेदांतवेद्यं परेशं नमामः सदा वक्रतुंडं भजामः ॥ १८ ॥ अनंतावतारैः सदा पालयंतं स्वधर्मादिसंस्थं जनं कारयंतम् । सुरैर्दैत्यपैर्वन्द्यमेकं

समं त्वां नमामः सदा वक्रतुंडं भजामः ॥ १९ ॥ त्वया नाशितोऽयं महादैत्यभूपः सुशांतिर्धरोऽयं कृतस्तेन विश्वम्। अखंडप्रहर्षेण युक्तं च तं वै नमामः सदा वक्रतुंडं भजामः ॥ २० ॥ न विंदंति यं वेदवेदज्ञमर्त्या न विंदंति यं शास्त्रशास्त्रज्ञभूपाः । न विंदंति यं योगयोगीशकाद्या नमामः सदा वक्रतुंडं भजामः ॥ २१ ॥ न वेदा विदुर्यं च देवेंद्रमुख्या न योगैर्मुनींद्रा वयं किं स्तुमश्च । तथाऽपि स्वबुध्या स्तुतं वक्रतुंडं नमामः सदा वक्रतुंडं भजामः ॥ २२ ॥ मुद्गल उवाच । एवं स्तुत्वा वक्रतुंडं स्थिता देवर्षयः प्रभो । बद्धांजलिपुटाः सर्वे तूष्णींभावेन मानद ॥ २३ ॥ देवानां च मुनीनां स स्तुतिं श्रुत्वा गजाननः । उवाच तान् प्रसन्नात्मा हर्षयन् वचनं महत् ॥ २४ ॥ वक्रतुंड उवाच । शृणुध्वं मुनयः सर्वे देवा मे वचनं महत् । भवत्कृतमिदं स्तोत्रं मत्प्रीतेर्वर्धनं भवेत् ॥ २५ ॥ अनेन स्तौति यो नित्यं मां तस्य परिपूरये । भोगान्नानाविधांश्चैव पुत्रपौत्रादिसंपदः ॥ २६ ॥ यं यमिच्छति तं तं च दास्येऽहं नात्र संशयः । भुक्तिमुक्तिप्रदं चैतद्ब्रह्मभूयकरं भवेत् ॥ २७ ॥ नानासिद्धिप्रदं चैव हृदि बुद्धिप्रकाशकम् । सुरेंद्रैर्वंद्यतां याति यो मां स्तौति त्वनेन सः ॥ २८ ॥ सहस्रावर्तनान् मर्त्यः कारागृहगतं नरम् । मोचयेन्नात्र संदेहो मत्प्रियः सर्वदा भवेत् ॥ २९ ॥ अपराधशतैर्युक्तो यो वै भवति मानवः । तस्यापराधसहनं करोमि स्तोत्रपाठतः ॥ ३० ॥ एकविंशतिवारं य एकविंशद्दिनानि वै । पठिष्यति सदा तस्मै चिंतितं प्रददाम्यहम् ॥ ३१ ॥ एकविंशतिकाः श्लोका भवद्भिर्मत्प्रियात्मकैः । कृतास्तैर्मां स देवास्तु स्तुता वै मुनयोऽखिलाः ॥ ३२ ॥ तेन विघ्नविहीनाश्च स्वधर्मरुचयस्तथा । भविष्यथ महाभागा भुक्तिमुक्तिप्रदास्तथा ॥ ३३ ॥ वरं ब्रूत महाभागा येषां यन्मनसि स्थितम् । तद्दास्यामि न संदेहः स्तोत्रसंतोषितो ह्यहम् ॥ ३४ ॥ मुद्गल उवाच । एवमुक्ताः सुराः सर्वे मुनयस्तं प्रणम्य च । प्रहृष्टमानसा ऊचुर्वक्रतुंडं महाबलम् ॥ ३५ ॥ देवर्षय ऊचुः । यदि प्रसन्नतां यातो वक्रतुंड ददासि चेत् । त्वदीयामचलां भक्तिं देहि नाथ दयानिधे ॥ ३६ ॥ यदि प्राप्ता त्वदीया च भक्तिर्जंतोस्तदा प्रभो । किं दुर्लभं भवेत्तस्य हस्तगाः सर्वसिद्धयः ॥ ३७ ॥ अतो भक्तिं महाभाग देहि नो विघ्ननायक । तया तृप्ता भविष्यामस्त्वत्पादप्रवणा वयम् ॥ ३८ ॥ तेषां वचनमाकर्ण्य देवदेवो गजाननः । जगाद भावगंभीरं ज्ञाता विज्ञजनप्रियः ॥ ३९ ॥ वक्रतुंड उवाच । मदीया भक्तिरचला भविष्यति न संशयः । भवतां भावयुक्तानां भो भो देवर्षयः खलु ॥ ४० ॥ अंतर्दधे स उक्त्वैवं वक्रतुंडो गणेश्वरः । पश्यतां मुनिदेवानां स्वानंदस्थो बभूव ह ॥ ४१ ॥ ततो देवर्षयः सर्वे खिन्नाः स्वस्वपदं ययुः ।

ध्यायंनश्च तमेवैतं वक्रतुंडं सुसिद्धिदम् ॥ ४२ ॥ मत्सरोऽपि ततः सर्वैर्दैत्यैः परिवृतो ययौ । स्वं पदं पालयन् शीघ्रं सुशांतो ह्यभवत् सदा ॥ ४३ ॥ तं त्यक्त्वा दैत्यसंघास्ते ययुः स्वं स्वं गृहं मुने । एवं मत्सरमाहात्म्यं वक्रतुंडेन कारितम् ॥ ४४ ॥ स एव वक्रतुंडस्तु सृजत्यवति च प्रभुः । हरते भावहीनः सन् नाद्यमध्यांतगः स्वयम् ॥ ४५ ॥ एवं नानावतारेण स्वस्वधर्मरतान् सुरान् । असुरान् मानवादींश्च कुरुते वक्रतुंडकः ॥ ४६ ॥ अवतारा अनंताश्च वक्रतुंडस्य भो विभो । चरित्रमखिलं तेषां कथितुं शक्यते न वै ॥ ४७ ॥ ब्रह्मणा षण्मुखेनाऽपि विष्णुना शंकरेण च । शेषेण मुनिभिश्चैव वेदैः काहं च तत्र वै ॥ ४८ ॥ दिवोदासशमार्थाय स एवं वक्रतुंडकः । शिवपुत्रत्वमापन्नो ढुंढिराजेति नामतः ॥ ४९ ॥ शामनस्य वरं दातुं स एव गणनायकः । प्रकटोऽभूत् महातेजास्तस्याग्रे भक्तपालकः ॥ ५० ॥ एवं नानावतारैश्च भक्तरक्षणलालसः । करोति भक्तसंरक्षां जानीहि त्वं प्रजापते ॥ ५१ ॥ ब्रह्मणा सृष्टिकार्यार्थं व्याकुलेन स न स्मृतः । वक्रतुंडस्ततो दैत्यो मत्सरः प्रविवेश तम् ॥ ५२ ॥ तेनासुरस्वभावेन पीडितो विधिरद्भुतम् । विघ्नयुक्तोऽभवत्तत्र सृष्टिं कर्तुं न स क्षमः ॥ ५३ ॥ पुराननं वचः स्मृत्वा पुनस्तं शरणं ययौ । विधिर्विघ्नविहीनः स ससर्ज सकलं जगत् ॥ ५४ ॥

॥ इति श्रीमदांत्ये पुराणोपनिषदि श्रीमन्मौद्गले महापुराणे प्रथमे खंडे वक्रतुंडचरिते वक्रतुण्डान्तर्धानं नामैकोनचत्वारिंशोऽध्यायः ॥

श्रीगणेशाय नमः ॥ दक्ष उवाच । धन्योऽस्म्यनुगृहीतोऽस्मि यत्त्वया श्रावितं महत् । चरित्रं वक्रतुंडस्य ब्रह्मभूयकरं महत् ॥ १ ॥ श्रुत्वा श्रुत्वा न मे तृप्तिर्जायतेऽमृततो यथा । इच्छामि तत्पुनः श्रोतुं पूजितो विधिना कथम् ॥ २ ॥ विस्तरेण च मे ब्रूहि कथां पापापनोदिनीम् । श्रोतुः प्रष्टुश्च वक्तुश्च त्रयाणां सर्वसिद्धिदाम् ॥ ३ ॥ सूत उवाच । दक्षस्य वचनं श्रुत्वा मुद्गलस्तमुवाच ह । उत्फुल्लनयनो हर्षाद्ब्राह्मणेंद्रः स शौनक ॥ ४ ॥ मुद्गल उवाच । शृणु दक्ष महाभाग धन्योऽसि न च संशयः । यत ते गणराजस्य कथायां प्रीतिरद्भुता ॥ ५ ॥ अल्पपुण्यवतो ढुंढिकथाया अवधारणे । श्रवणे च तथा प्रीतिर्जायते न कदाचन ॥ ६ ॥ अतस्तेऽहं प्रवक्ष्यामि त्वदादरस्तुतोषितः । संक्षेपेण कथां दिव्यां गणेशस्य महात्मनः ॥ ७ ॥ कल्पादौ गणेशेन सृष्टाः पंच सुराधिपाः । तेषां तपःप्रभावेण प्रसन्नो वरदोऽभवत् ॥ ८ ॥ वरस्यैव प्रभावेण समर्थास्ते

बभूविरे । स्वस्वकार्ये प्रवृत्ताश्च सावधानेन चेतसा ॥ ९ ॥ सृष्टिप्रकरणे ब्रह्मा प्रवृत्तो जगतोऽभवत् । न सस्मार गणेशानं विस्मृत्यादौ तदर्चनम् ॥ १० ॥ तेन भ्रांतोऽभवत् सद्यो मानसे गर्वमादधे । त्रिलोके नैव मत्तुल्यः स्रष्टाऽहं नात्र संशयः ॥ ११ ॥ सृजामि सकलं विश्वं तदा विष्णुश्च पाति वै । रुद्रः संहरते तच्च शक्तिर्मोहं करोति च ॥ १२ ॥ सूर्यः कर्मप्रकाशं च करोति जगति प्रभुः । न सृष्टं चेन् मया विश्वं देवत्वं तु निरर्थकम् ॥ १३ ॥ ममाज्ञादौ गणेशेन कृता सृष्टौ विशेषतः । मदीयां पात्रतां दृष्ट्वा तस्मान्नान्योऽस्ति मत्समः ॥ १४ ॥ इति गर्वेण मनसि मोहितोऽभूत् पितामहः । ततो विघ्नगणास्तत्र प्रबभूवुरनेकशः ॥ १५ ॥ सृष्टिं विरचयंतं तं ब्रह्माणं प्राप्य दारुणः । नानारूपा महावीर्यास्ताडयामासु-रोजसा ॥ १६ ॥ त्रिनेत्राः पंचनेत्राश्च पृष्ठनेत्रा महाबलाः । दशतुंडा सहस्रं च मुखानि दधतः परे ॥ १७ ॥ एवं नाना-स्वरूपास्ते विधिं धृत्वा प्रेरेमिरे। बालक्रीडनकं कृत्वा दुःखयुक्तं महाबलाः ॥ १८ ॥ एवं स परवान् ब्रह्मा गर्वं सर्वं प्रमुच्य वै । जगाम शरणं देवं गणेशं विघ्ननायकम् ॥ १९ ॥ गतगर्वो हृदि स्मृत्वा तुष्टाव गणनायकम् । तेन विघ्नगणाः सर्वैऽतर्धानं तत्र चक्रिरे ॥ २० ॥ मुक्तो विघ्नैस्तदा ब्रह्मा तताप परमं तपः । षडक्षरेण मंत्रेण वक्रतुंडमतोषयत् ॥ २१ ॥ वायुभक्षोऽभवद्ब्रह्मा पादांगुष्ठाग्रसंस्थितः । चकार तेजसा वृत्तिं गणेशे निश्चलां ततः ॥ २२ ॥ एवं दिव्यसहस्रं स तपस्तेपे सुदारुणम् । ततो भूतानि सर्वानि व्याकुलाणि तदाऽभवन् ॥ २३ ॥ ततस्तस्योग्रतपसा प्रसन्नो वक्रतुंडकः । आययौ भक्तराजं तं भक्तिभावेन तोषितः ॥ २४ ॥ तेजोरूपी महाकायो वक्रतुंडश्चतुर्भुजः । सिंहारूढस्त्रिनेत्रश्च पाशांकुशधरो विभुः ॥ २५ ॥ वरदाभयहस्तश्च पृथुवक्षा महोदरः । सिद्धिबुद्धियुतश्चिंतामणिना च विराजितः ॥ २६ ॥ नानालंकारसंयुक्तः शेषनाभिर्गजाननः । सिंदूरारुणदेहश्च नानावस्त्रधरः प्रभुः ॥ २७ ॥ तं दृष्ट्वा भयभीतोऽसौ विधाता स्तौति तं परम् । गणेशं हृदि संचिंत्य नानास्तोत्रैर्विधानतः ॥ २८ ॥ वक्रतुंडः स्तुवंतं तमुवाच घननिस्वनः । वरं वृणु विधातस्त्वं दास्यामि तु न संशयः ॥ २९ ॥ इति तस्य वचः श्रुत्वा ब्रह्मा तं प्रणनाम च । उवाच सौम्यरूपेण वरं देहि गजानन ॥ ३० ॥ ब्रह्मणो गिरमाकर्ण्य सौम्यतेजा गजाननः । उवाच तं महाभागं भक्तिभावेन तोषितः ॥ ३१ ॥ वक्रतुंड उवाच । स्वानंदनगरे संस्थं सदैतादृशरूपकम् । मृत्युलोके स्थितस्त्वं च कथं द्रक्ष्यसि मानद ॥ ३२ ॥ तपसा भक्तिभावेन तोषितोऽहं त्वया विधे । तेन सौम्यस्वरूपेण त्वदग्रे संस्थितोऽभवम् ॥ ३३ ॥ त्वं तु मत्तो वरान् ब्रूहि

दास्येऽहं वाञ्छितान् परान् । मयि प्रसन्नतां याते दुर्लभं न भविष्यति ॥ ३४ ॥ गणेशवचनं श्रुत्वा ब्रह्मा तं प्रणनाम च । बद्धांजलिपुटो भूत्वा स्तोतुं तमुपचक्रमे ॥ ३५ ॥

॥ ओमिति श्रीमदांत्ये पुराणोपनिषदि श्रीमन्मौद्गले महापुराणे प्रथमे खंडे वक्रतुंडचरिते ब्रह्मणस्तपश्चरणं नाम चत्वारिंशोऽध्यायः ॥

॥ श्रीगणेशाय नमः ॥ ब्रह्मोवाच । नमस्ते वक्रतुंडाय गणेशाय महात्मने । अनंतानंतपाराय विघ्नेशाय नमो नमः ॥ १ ॥ नमो भक्तिप्रियायैव भक्तसंरक्षकाय ते । अभक्तकामनाशाय सर्वदात्रे नमो नमः ॥ २ ॥ निर्गुणाय निरूपाय निर्मलाय गुणात्मने । अनंताननधाराय सिंहवाहाय ते नमः ॥ ३ ॥ अनादिरूपकायैव नमः सर्वप्रियंकर । वेदांतवेद्यदेहाय गजवक्त्राय ते नमः ॥ ४ ॥ अनंतोदरसंस्थाय नानाभोगकराय ते । मायाधाराय मायाया मोहकाय नमो नमः ॥ ५ ॥ अमेयशक्तये तुभ्यमनाधाराय दंष्ट्रिणे । चतुर्बाहुयुतायैव स्वानंदपतये नमः ॥ ६ ॥ सिद्धिबुद्धिप्रदायैव सिद्धिबुद्धिधराय च । ब्रह्मभूताय देवाय विघ्नहर्त्रे नमोऽस्तु ते ॥ ७ ॥ वक्रतुंड प्रसन्नस्त्वं मह्यं देहि तदानघ । त्वदीयामचलां भक्तिं यया बंधो न विद्यते ॥ ८ ॥ त्वदाज्ञया प्रवृत्तोऽहं तत्र सामर्थ्यमद्भुतम् । सृष्टौ देहि गणाधीश विघ्नहीनं च मे सदा ॥ ९ ॥ अहं स्रष्टा च सर्वेषां त्वया प्रोक्तो गजानन । अतस्त्वं पुत्रभावेन गृहे मे तिष्ठ मायया ॥ १० ॥ त्वं साक्षाद्ब्रह्मभूतश्चेद्यदि पुत्रो भविष्यसि । तदाहं बंधनान्मुक्तो भविष्यामि च राजमात् ॥ ११ ॥ तव माता पिता स्वामिन् बंधयुक्तौ कृतौ यदि । तदा वेदादिकं सर्वं मिथ्याभूतं भविष्यति ॥ १२ ॥ नामग्रहणमात्रेण ब्रह्मभूयप्रदो भवान् । किं पुनः पुत्रभावेन त्वं चेत् स्थास्यसि मे गृहे ॥ १३ ॥ अन्यच्च लालनं कुर्यां सेवनं पूजनं तथा । निरंतरं प्रपद्येयं भवेयमतुलस्ततः ॥ १४ ॥ ब्रह्मणो वचनं तस्य श्रुत्वा गणपतिः स्वयम् । जगाद तं महाभागं हर्षयन् सर्वभाववित् ॥ १५ ॥ वक्रतुंड उवाच । त्वया यत् प्रार्थितं ब्रह्मन् तदस्तु सकलं किल । सृष्टिकर्तृत्वसामर्थ्यमद्भुतं ते भविष्यति ॥ १६ ॥ निर्विघ्नं सर्वकार्येषु मत्स्मृत्या प्रभविष्यति । यं यमिच्छसि तं तं त्वं कामं प्राप्स्यसि सर्वदा ॥ १७ ॥ तव पुत्रो भविष्यामि तारको माययांशतः । वाञ्छितं पूरयिष्यामि भक्तिभावेन तोषितः ॥ १८ ॥ त्वया कृतमिदं स्तोत्रं सर्वदं प्रभविष्यति । मम प्रीतिकरं ब्रह्मन्

ब्रह्मभूयप्रदं तथा ॥ १९ ॥ इत्युक्त्वांतर्दधे दक्ष वक्रतुंडः प्रतापवान् । ब्रह्माऽपि विमना भूत्वा तत्र वै संस्थितोऽभवत् ॥ २० ॥ वक्रतुंडप्रसादेन निर्ममे सकलं जगत् । चराचरमयं सर्वं यथायोग्यं चकार ह ॥ २१ ॥ सृष्ट्वा त्रिभुवनं सर्वं कृतकृत्य इवाऽभवत् । स्थितः स्वसुखनिष्ठः सन् वक्रतुंडं स संस्मरन् ॥ २२ ॥ एकदा वायुवेगेन कंपितः स प्रजापतिः । तस्मात् पुरुषरूपेण दंभश्च प्रकटोऽभवत् ॥ २३ ॥ तत्पुरः पुरुषश्रेष्ठश्चतुर्बाहुधरः खलः । गदाचक्रत्रिशूलास्त्रधनुर्बाणधरो बभौ ॥ २४ ॥ रूपेण तेजसा पूर्णो वीर्येण ह्यतुलः परः । महाकायो महाबाहुः स्थितः पर्वतसन्निभः ॥ २५ ॥ तं दृष्ट्वा विस्मितो ब्रह्मा पप्रच्छ च नरं ततः । कस्य त्वं कुत आयातः किं कार्यं तेऽत्र वर्तते ॥ २६ ॥ वद मे पृच्छते सर्वं महाबलपराक्रम । धन्योऽसि रूपलावण्ययुक्तः परमशोभनः ॥ २७ ॥ ब्रह्मणो वच आकर्ण्य मेघगंभीरया गिरा । उवाच तं विधातारं स्मयमान इदं वचः ॥ २८ ॥ पुरुष उवाच । विधेऽहं त्वां प्रजानामि प्रभावान् मे च मानद । तवांगकंपसंभूतं मां जानीहि प्रजापते ॥ २९ ॥ देहि मे नाम योग्यं त्वं पुत्रोऽहं ते च सुव्रत । स्थानं देहि तथा वृत्तिं योगक्षेमकरीं पराम् ॥ ३० ॥ वचस्तस्य समाकर्ण्य तमूचे पद्मसंभवः । हास्यं कृत्वा महाबाहुः प्रीणयन् वाक्यमादरात् ॥ ३१ ॥ ब्रह्मोवाच । किं मां जानासि पुत्र त्वं दंभेन प्रब्रवीषि रे । अतस्त्वं दंभनामा वै भविष्यसि महाखलः ॥ ३२ ॥ यत्र तत्र गतिस्ते वै भविष्यति महासुर । भोगान्नानाविधान् भुंक्ष्व यथारुचि यथासुखम् ॥ ३३ ॥ एवमुक्तो महाबाहुस्तं जगाम प्रणम्य सः । प्रदक्षिणीकृत्य विधिं क्षितिमंडलमादरात् ॥ ३४ ॥ तत्रागत्य विचारं स कृतवान् मानसे खलः । ब्रह्मणाऽसत्कृतोऽहं वै तस्य गर्वं हराम्यहम् ॥ ३५ ॥ विचार्य सहसा दंभो जगाम शरणं कविम् । तेनोपदिष्टमंत्रेण ब्रह्माणं समतोषयत् ॥ ३६ ॥ एकपादेन तिष्ठन् सन्निराहारपरायणः । तताप तप उग्रं वै वर्षाणामयुतं गतम् ॥ ३७ ॥ तस्यैव तपसा सर्वं व्याकुलं सचराचरम् । न स्थातुमशकत् स्थाने भयभीतं बभूव ह ॥ ३८ ॥ तत् दृष्ट्वा परमाश्चर्यं ब्रह्मा देवगणैः सह । आययौ तं वरं दातुं तपसा तोषितः प्रभुः ॥ ३९ ॥ काष्ठवत्तं स्थितं वीक्ष्य विस्मितः कमलासनः । जगाद तं महाभागं हर्षयन्निव भाषया ॥ ४० ॥ ब्रह्मोवाच । वरं वृणु महाभाग यं यं मनसि संस्थितम् । ईप्सितं पूरयिष्यामि नात्र कार्या विचारणा ॥ ४१ ॥ ब्रह्मणो वचनं श्रुत्वा दंभः परमहर्षितः । तं प्रणम्य प्रतुष्टाव बद्धांजलिपुटो बली ॥ ४२ ॥ दंभ उवाच । नमस्ते सृष्टिकर्त्रे वै सृष्टिपात्रे प्रजापते । सृष्टिहर्त्रे त्रिरूपाय ब्रह्मविष्णुशिवात्मने ॥ ४३ ॥ त्वया ततमिदं सर्वं त्वदाधारं महाप्रभो ।

त्वयि सुप्ते जगन्नष्टं भविष्यति न संशयः ॥ ४४ ॥ चराचरमयो भूत्वा क्रीडसि त्वं पितामह । एकानेकप्रभेदेन त्वं स्थितोऽसि जगत्प्रभो ॥ ४५ ॥ अणुभ्योऽणुतरस्त्वं च महद्भ्यश्च महान् किल । कस्त्वां स्तोतुं समर्थः स्याद् ब्रह्माकारेण संस्थितम् ॥ ४६ ॥ महद्भाग्यं विभो मेऽद्य येन ते दर्शनं परम् । प्राप्तं सकलपापघ्नमग्रे शुभकरं तथा ॥ ४७ ॥ यदि प्रसन्नतां यातो यदि देयो वरो महान् । तदा मे वांछितं सर्वं पूरयस्व प्रजापते ॥ ४८ ॥ राज्यं त्रैलोक्यस्य तथा मह्यं देहि पितामह । पंचभूतात्मकेभ्यश्च मृत्युर्न च कदा भवेत् ॥ ४९ ॥ संग्रामे मत्समः कश्चिन्नान्यः स्यान् मां कुरु प्रभो । अखंडैश्वर्यसंयुक्तमारोग्यादिसमन्वितम् ॥ ५० ॥ इति तस्य वचः श्रुत्वा ब्रह्मा तं प्रत्युवाच ह । तपसा तोषितस्तस्मै दातुमुत्सुकतां गतः ॥ ५१ ॥ ब्रह्मोवाच । त्वया यत्प्रार्थितं दंभ तत्सर्वं प्रभविष्यति । अन्यद्यच्चिंतितं तत्ते सिद्धरूपं भविष्यति ॥ ५२ ॥ इत्युक्त्वांतर्दधे ब्रह्मा दंभः संहर्षितोऽभवत् । स्वगृहं प्रजगामासौ महाबलपराक्रमः ॥ ५३ ॥ नगरं शोभनं नाम कारयामास दर्पितः । पृथिव्यां सर्वशोभाढ्यं वासं तत्र चकार ह ॥ ५४ ॥ ततो दैत्यगणाः सर्वे शुक्रेन प्रेरिता मुने । आययुरत्र दंभस्य नगरे हर्षिता भृशम् ॥ ५५ ॥ शुक्रः समागतस्तत्र मुनिभिर्ब्रह्मवादिभिः । दैत्यराज्यं स दंभायाऽभवद्दातुं स उद्यतः ॥ ५६ ॥ शुभे लग्ने मुहूर्ते च सोऽभिषेकमकारयत् । ब्राह्मणैर्दैत्यराजानां राजा दंभो बभूव ह ॥ ५७ ॥ महोत्सवं हर्षितास्ते चक्रुः सर्वे समागताः । हृष्टपुष्टजनाकीर्णं नगरं शुशुभे भृशम् ॥ ५८ ॥ सर्वे स्वस्वगृहं जग्मुस्ततो हर्षसमन्विताः । मुख्याश्च संस्थितास्तत्र दैत्याः परमदारुणाः ॥ ५९ ॥

॥ ओमिति श्रीमदांत्ये पुराणोपनिषदि श्रीन्मौद्गले महापुराणे प्रथमे खंडे वक्रतुंडचरिते दंभासुरराज्याभिषेको नाम एकचत्वारिंशोऽध्यायः ॥

॥ श्रीगणेशाय नमः ॥ शुक्र उवाच । नगरे दंभदैत्यस्य महोत्सवयुता बभुः । जनाः सर्वे महाभागाः कंचित्कालं प्रजापते ॥ १ ॥ एकदा दैत्यपाः सर्वे ययुस्तत्र महाबलम् । मुहुंडश्च तथा हुंडो रुक्मकेतुर्महाबलः ॥ २ ॥ मदपश्च सकोपश्च तथा क्रोधासुरो महान् । कामासुरो बलाढ्यश्च रामभासुर एव च ॥ ३ ॥ इत्याद्या बहवश्चान्ये दंभं शोभासमन्वितम् । प्रणम्योचुर्महात्मानं उत्सुका देवनाशने ॥ ४ ॥ दैत्येशा ऊचुः । किं स्थितोऽसि महाराज वयं दासाः समागताः । त्रिभुवनं प्रजेष्यामो

देवमर्दनलालसाः ॥ ५ ॥ तवाज्ञावशगाः सर्वे दैत्यदानवराक्षसाः । ब्रह्मांडे न भवेत्तुल्यस्तव दंभ बलेन वा ॥ ६ ॥ यशसा तेजसा चैव न समस्त सुराधिप । आज्ञापय महाबाहो जेष्यामः सकलं जगत् ॥ ७ ॥ दैत्येशानां वचः श्रुत्वा दंभदैत्यः प्रहर्षितः । उवाच तान् महाभागान् भावयुक्तेन चेतसा ॥ ८ ॥ दंभासुर उवाच । सम्यगुक्तं महाभागा ममापि हृदये स्थितम् । भवद्भिः सहितोऽहं वै जेष्यामि सचराचरम् ॥ ९ ॥ एवमुक्त्वा स दैत्येशः शुक्रं तत्रानयन्मुने । मतं तस्य समादाय निर्जगाम ततः पुरात् ॥ १० ॥ अपारसेनया सार्धं चतुरंगसुयुक्तया । सर्वे पृथिव्यां राजानो जिता दैत्यैर्महाबलैः ॥ ११ ॥ पातालेषु च सर्वान् वै नागान् जित्वा दिवं ययुः । तत्रेंद्रो देवदेवेंद्रैर्युयुधे सोऽसुरैः सह ॥ १२ ॥ तेन दैत्यगणाः सर्वे भयभीताः समंततः । वज्रपातैर्महाघोरैश्चूर्णिता ज्वालितास्तथा ॥ १३ ॥ असुरा रणभूमिं च त्यक्त्वा सर्वे पलायिताः । ततो दंभासुरस्तत्र युयुधे बलगर्वितः ॥ १४ ॥ चक्रपातेन देवेंद्रं मूर्च्छितं च चकार ह । देवान् बाणार्दितान् सर्वान् कारयामास दैत्यपः ॥ १५ ॥ लब्ध्वा संज्ञां सुरेंद्रो वै पलायत जिजीविषुः । ततो देवगणास्तं चान्वगुः सर्वे भयातुराः ॥ १६ ॥ दैत्य ऐरावतारूढो देवेंद्रस्यासने स्थितः । अमराणां पुरीं गत्वा हर्षितो हर्षयन् स्वकान् ॥ १७ ॥ इंद्रो देवगणैः सर्वैर्ब्रह्माणं शरणं ययौ । ब्रह्मणा सह विष्णुं च तेन सार्द्धं शिवं ययौ ॥ १८ ॥ शिवः क्रोधसमायुक्त आययौ रणमूर्धनि । जुहाव दैत्यराजं तं संग्रामाय महाबलम् ॥ १९ ॥ ततो दैत्येशसंयुक्तो दंभदैत्यः समाययौ । क्रोधसंरक्तचक्षुस्तं सन्नद्धो बलसंयुतः ॥ २० ॥ ततः समभवद्युद्धं दारुणं रोमहर्षणम् । दैत्यानां चैव देवानां परस्परविनाशनम् ॥ २१ ॥ चत्वारिंशद्दिनान्यत्र तुमुलं नीतिसंयुतम् । शोणितौघा महानद्यो जाताः प्रेतसमाकुलाः ॥ २२ ॥ ततो दंभः स्वयं क्रुद्धो बाणैर्देवानमर्दयत् । चकार देवराजांस्तान् मूर्च्छितान् धरणिं गतान् ॥ २३ ॥ ततः शंभुस्त्रिशूलेन तं जघान महाबलम् । पपात मूर्च्छया दैत्यः क्षणादुत्थितवान् पुनः ॥ २४ ॥ तत्याज बलवांश्चक्रं पातयामास शंकरम् । मूर्च्छितं प्रहरार्द्धं च दंभदैत्यः प्रतापवान् ॥ २५ ॥ दृष्ट्वाऽद्भुतं महावीर्यं दैत्यराजस्य शंकरः । पलायत ससंज्ञः सन् वने वै देवसंयुतः ॥ २६ ॥ देवेंद्रान् गच्छतो दृष्ट्वा जहसुर्दैत्यनायकाः । आनंदेन समायुक्ता विविशुस्त्वमरावतीम् ॥ २७ ॥ ततः स सत्यलोके च वैकुंठे दैत्यनायकान् । कैलासे चामरावत्यां स्थापयामास यत्नतः ॥ २८ ॥ नानादेवपुरे रम्ये स्थापयामास दानवान् । आययौ शोभनायां स स्वपुर्यां बलसंयुतः ॥ २९ ॥ चकार राज्यमुन्मत्तस्त्रैलोकस्य महाबलः । ततः कर्म-

विनाशार्थमाज्ञापयत दैत्यपान् ॥ ३० ॥ तदाज्ञया ययुः सर्वे दैत्याः परमदारुणाः । ब्राह्मणादीन् बबंधुस्ते ताडयामासुरोजसा ॥ ३१ ॥ यज्ञवाटान् बभंजुस्ते यज्ञवृक्षादिकान् खलाः । तीर्थानि लोपयामासुर्देवतायतनानि च ॥ ३२ ॥ एवं नानाविधैर्यत्नैः कर्मलोपं प्रचक्रिरे । केचिद्भ्रष्टा द्विजास्तत्र मृताः केचित्तदाऽभवन् ॥ ३३ ॥ केचिद्वनं ययुस्तत्र सिंहव्याघ्रादिसंकुलम् । संध्यादिभिर्विहीनास्ते द्विजास्तत्राऽभवन् किल ॥ ३४ ॥ न स्वाहा न स्वधा तत्र न वषट्कार एव च । न वर्णाश्रमधर्मश्च दंभे राज्यं प्रकुर्वति ॥ ३५ ॥ वर्णसंकररूपा वै प्रजा जाता महीतले । तदा देवगणाः सर्वे भयभीता बभूविरे ॥ ३६ ॥ कर्मभोगकरा देवा नष्टे कर्मणि शौनक । मृतप्राया मृताः सर्वे इव ब्रह्माणमब्रुवन् ॥ ३७ ॥ देवा ऊचुः । शरणं त्वदृते देव कं याम कमलासन । त्वं धाता त्वं विधाता च सर्वेषां प्राणधारकः ॥ ३८ ॥ त्वं गतिः सर्वदेवानां त्वमेव ब्रह्मभावितः । अतोऽस्मान् रक्ष देवेश दंभासुरभयात् परात् ॥ ३९ ॥ कर्महीनं कृतं तेन त्रैलोक्यं सचराचरम् । देवाः कर्मान्नभोक्तारो महाबुद्धे कृतास्त्वया ॥ ४० ॥ कर्माभावेन जगति मरिष्यामो न संशयः । अतस्त्वं सर्वदेवांश्च रक्षस्व प्रपितामह ॥ ४१ ॥ त्वयैव चाभयं दत्तं पालिताश्च त्वया वयम् । अधुना क्षुधयाऽऽविष्टा मरिष्यामस्त्वदग्रतः ॥ ४२ ॥

॥ ओमिति श्रीमदान्त्ये पुराणोपनिषदि श्रीमन्मौद्गले महापुराणे प्रथमे खंडे वक्रतुंडचरिते दंभासुरविजयो नाम द्विचत्वारिंशोऽध्यायः ॥

॥ श्रीगणेशाय नमः ॥ मुद्गल उवाच । देवेंद्राणां वचः क्रूरं श्रुत्वा चिंतातुरोऽभवत् । चतुर्मुखो विचारं स चकाराऽत्र तु शोभनम् ॥ १ ॥ नावाप देवरक्षार्थं बुद्धिं बुद्धिविशारदः । ततश्चिंतां दुरंतां वै जगाम कमलासनः ॥ २ ॥ जगाद देवमुख्यांस्तु भयेन कमलासनः । अहं यूयं च सर्वेपि प्रार्थयामो गजाननम् ॥ ३ ॥ स वै सर्वविचारज्ञः करिष्यति शुभं महत् । अतस्तत् ध्यानकौशल्यात् ध्यायेम च विनायकम् ॥ ४ ॥ एकाक्षरविधानेन वक्रतुंडं यजामहे । शरणं सर्वदेवानां भविष्यति न संशयः ॥ ५ ॥ मुद्गल उवाच । ब्रह्मणो गिरमाकर्ण्य देवा मुनिगणैः सह । पूजयामासुरव्यग्रा वक्रतुंडं विधानतः ॥ ६ ॥ ब्रह्माऽपि ध्यानसंयुक्तस्तोषयामास विघ्नपम् । पुरा दृष्टं तथा चित्ते सिद्धिबुद्धियुतं मुने ॥ ७ ॥ गतेषु शतवर्षेषु ब्रह्मा-ऽपश्यच्च तं हृदि । साकारं गुणसंयुक्तं वदंतं मंजुला गिरः ॥ ८ ॥ दृष्ट्वा विस्मितचित्तोऽसौ यावत्पृच्छति तं प्रभुम् ।

तावत् सोपि बहिर्यातः सिद्धिबुद्धिसमन्वितः ॥ ९ ॥ ब्रह्माणं बोधयामास वक्रतुंडो महाबलः । सुप्रसन्नतरो जातस्तपसा ध्यानशालिना ॥ १० ॥ वक्रतुंड उवाच । पश्य मां पुत्रभावेन पितामह गणाधिपम् । तव ध्यानात् समुत्पन्नं ध्यानजं प्रवदंत्यतः ॥ ११ ॥ तपसा पूर्वकाले मां त्वया पुत्रत्वमादरात् । याचितं सफलं तच्च कृतं तव मयाऽधुना ॥ १२॥ वचनं वक्रतुंडस्य श्रुत्वा ब्रह्मा मुदा युतः । बहिर्वीक्ष्य गणेशानं सिद्धिबुद्धिविराजितम् ॥ १३॥ प्रणनाम स साष्टांगं वक्रतुंडं गजाननम् । सिद्धिं बुद्धिं विधानेन पूजयामास यत्नतः ॥ १४॥ तद् दृष्ट्वा परमाश्चर्यं देवाः सर्वे समागताः । ऋषयस्तं महाभागाः प्रणेमुर्भक्तिभावतः ॥ १५ ॥ सुतं मानसिकं दृष्ट्वा सिद्धिं बुद्धिं तथात्मजे । ताभ्यां सह विनीतास्ते तुष्टुवुर्बद्धपाणयः ॥ १६ ॥ ब्रह्माऽपि पूजनं कृत्वा स्तोतुं सर्वैः समन्वितः । उद्यतोऽभूत् महातेजा वक्रतुंडं सभार्यकम् ॥ १७ ॥ सदेवर्षिर्ब्रह्मोवाच । नमस्ते ब्रह्मभूताय वक्रतुंडाय साक्षिणे । सिद्धिबुद्धियुतायैव गणेशाय नमो नमः ॥ १८ ॥ विघ्नेशाय नमस्तुभ्यं निर्गुणाय गुणात्मने । अनादये च सर्वज्ञ पालकाय नमोऽस्तु ते ॥ १९ ॥ नमस्ते सर्वरूपाय सर्वाध्यक्षाय धीमते । आदिमध्यांतहीनाय साक्षाद्देवाय ते नमः ॥ २० ॥ अमेयशक्तये तुभ्यं मायिभ्यो मोहदाय च । अमायिने च मायाया आधाराय नमो नमः ॥ २१ ॥ सत्याय सत्यरूपाय सत्यपालक रक्षिणे । ज्ञानाय ज्ञानदात्रे च ज्ञानगम्याय ते नमः ॥ २२ ॥ लंबोदराय देवाय गणानां पतये नमः । गणेशाय गुणाधार हेरंबाय नमो नमः ॥ २३ ॥ त्वां स्तोतुं न समर्थाश्च वेदाः शास्त्रसमन्विताः । योगींद्रा देवमुख्याश्च तत्र कोऽहं गजानन ॥ २४ ॥ यथाबुद्धि प्रमोदेन संस्तुतोऽसि गणेश्वर । तेन मे सफलं सर्वं जातं लंबोदराधुना ॥ २५ ॥ ब्रह्मांडानामनंतानां कारकस्त्वं न संशयः । कथं मे पुत्रतां यातः सिद्धिबुद्धिसमन्वितः ॥ २६ ॥ सिद्धिबुद्धियुतं ब्रह्म हृदि ध्यातं विशेषतः । तदेव बहिरायातं तारितुं मां न संशयः ॥ २७ ॥ इत्युक्त्वा ब्राह्मणैः सार्धं जातकर्मादिकां क्रियाम् । चकार च स्वयं ब्रह्मा परमानंदसंयुतः ॥ २८ ॥ एकादशदिने तस्य सिद्धिबुद्धिपतिस्त्विति । नाम संस्थापयामास द्विजैः सह पितामहः ॥ २९ ॥ बालक्रीडनभावेन क्रीडति स्म विनायकः । सावित्री स्तनपानं सा कारयामास भावतः ॥ ३० ॥ दिने दिनेऽथ बालोऽसौ ववृधे शुक्लचंद्रवत । आनंदं जनयन् मातुः पितुश्च चरितैः स्वकैः ॥ ३१ ॥ सिद्धिबुद्धियुतो दक्ष वर्षद्वयवयाः स्थितः । एकदा तं विधातारं पप्रच्छ विनयान्वितः ॥ ३२ ॥ सिद्धिबुद्धिपतिरुवाच । तात किं वनवासं त्वं करोषि मुनिभिः सह । देवैः परमदुःखार्तो मम किं भाससे प्रभो ॥ ३३ ॥ तस्य तद्वचनं श्रुत्वा ब्रह्मा हर्षसमन्वितः । जगाद गणपं

सर्वं वृत्तांतं दैत्यसंभवम् ॥ ३४ ॥ तच्छ्रुत्वा कोपदीप्तोऽसौ वक्रतुंडस्तमब्रवीत्। हर्षयन् देवविप्रादीन् मेघगंभीरनिस्वनः ॥ ३५ ॥ वक्रतुंड उवाच। दंभासुरं महावीर्यं हनिष्यामि न संशयः। देवेभ्यो ब्राह्मणेभ्यश्च स्वपदानि ददाम्यहम् ॥ ३६ ॥ एवमुक्त्वा समारूढः सिंहं शस्त्रधरः प्रभुः। सिद्धिबुद्धियुतस्तत्र जगामासुरवेश्मनि ॥ ३७ ॥ नगरप्रांतभागे स संस्थितो जगदीश्वरः। तं देवमुनयः सर्वे ययुर्हर्षसमन्विताः ॥ ३८ ॥ दूतमिंद्रं गणेशश्च प्रेषयामास सत्वरः। स्वधर्मे तिष्ठ दैत्येंद्र नो चेद्धन्मि न संशयः ॥ ३९ ॥ इंद्रो गत्वा महादैत्यं सामपूर्वमिदं वचः। उवाच सर्वभावज्ञो भावपूर्वं सुरद्विषम् ॥ ४० ॥ इंद्र उवाच। ब्रह्मणः पुत्रतां यातं पूर्णं ब्रह्म सनातनम्। सिद्धिबुद्धिपतिं विद्धि मानसं ध्यानयोगतः ॥ ४१ ॥ स एव मुनिभिर्देवैरागतः पुरसन्निधौ। मां दूतं प्रेषयामास सामार्थं तव सन्निधौ ॥४२॥ स्वधर्मे त्वं समातिष्ठ देवाः संतु हविर्भुजः। वर्णाश्रमयुता लोकास्तिष्ठंतु विगतज्वराः ॥ ४३ ॥ इंद्रस्य वचनं श्रुत्वा कुपितोऽनितरां मुने। दंभासुर उवाचाऽथ तमिंद्रं प्रदहन्निव ॥ ४४ ॥ दंभासुर उवाच। किं करोमि समायातो दूतरूपेण मे गृहे। नो चेत्त्वां बंधयित्वा तु कारागारे क्षिपाम्यहम् ॥ ४५ ॥ इंद्र गच्छ महाभाग वद तं गणनायकम्। पंचमे दिवसे त्वां च योधयामि न संशयः ॥ ४६ ॥ तत इंद्रः समायातः सिद्धिबुद्धिपतिं प्रति। कथयामास वृत्तांतं विस्तरेण यथायथम् ॥ ४७ ॥ श्रुत्वा गणपतिः प्रीतस्तमुवाच महामतिम्। समीचीनं त्वया तत्र कृतं देवपते यथा ॥ ४८ ॥

॥ ॐमिति श्रीमदांत्ये पुराणोपनिषदि श्रीमन्मौद्गले महापुराणे प्रथमे खंडे वक्रतुंडचरिते दंभासुरदूतसंवादो नाम त्रिचत्वारिंशोऽध्यायः ॥

॥ श्रीगणेशाय नमः ॥ मुद्गल उवाच। देवेंद्रे प्रस्थिते तत्र गणेशस्यैव सन्निधौ। दंभासुरः कविं विप्रमाह्वयामास संनिधौ ॥ १ ॥ समागतं महाबुद्धिं शुक्रं मुनिवरं प्रभो। प्रणनाम समाष्टांगं बद्धांजलिपुटः स्थितः ॥ २ ॥ तं काव्यः स्थापयामास कांचनोत्तर आसने। पप्रच्छ मामाह्वयसे किमर्थमिति दानवम् ॥ ३ ॥ शुक्रस्य वचनं श्रुत्वा भयहर्षसमन्वितः। उवाच तं महाभागं भक्तियुक्तेन चेतसा ॥ ४ ॥ दंभासुर उवाच। स्वामिन् योद्धुं समायातः सिद्धिबुद्धिपतिः प्रभुः। ब्रह्मणो मानसः पुत्रस्तपसा तेन निर्मितः ॥ ५ ॥ परिपृच्छामि तत्र त्वां सर्वज्ञं मुनिसत्तमम्। येन तं सर्वभावेन जानामि खलु

तत्त्वतः ॥ ६ ॥ का सिद्धिः का तथा बुद्धिस्तयोः कोऽसौ पतिः प्रभो । किं सामर्थ्यधरो भाति वद सर्वं च मेऽग्रतः ॥ ७ ॥ दंभस्य वचनं श्रुत्वा शुक्रस्तं पुनरब्रवीत् । येन तत्त्वे प्रविज्ञाते गणेशे जायते मतिः ॥ ८ ॥ शुक्र उवाच । शृणु दैत्येंद्र तस्याऽपि महिमानं महाद्भुतम् । येन त्वं गाणपत्ये च तत्त्वे प्रनिपुणो भवेः ॥ ९ ॥ सिद्धिर्मोहकरी माया सर्वत्रैव प्रदृश्यते । सिध्यर्थं सर्वलोकाश्च यत्नवंतो भवंत्यतः ॥ १० ॥ इहलोके स्वभोगार्थी सिद्धिमिच्छति दानव । परलोकस्य सिध्यर्थं जनस्तत्प्रसमाकुलः ॥ ११ ॥ ब्रह्मभूयपदप्राप्तिमिच्छेद्वै सिद्धिरूपिकाम् । इह ब्रह्मपरप्राप्तिस्त्रिविधा मोहसंज्ञिता ॥ १२ ॥ माया गणपतेः प्रोक्ता भ्रांतिरूपा महामते । वामभागस्थया देव्या क्रीडतेऽसौ गजाननः ॥१३॥ भ्रामयन् ब्रह्मविष्णवादीन् योगिनो मानवादिकान् । ब्रह्मभूतस्वरूपत्वात् स्वाधीनः सततं मतः ॥१४॥ द्वितीया बुद्धिरूपा च माया तस्य महात्मनः । तां शृणुष्व महादैत्य येन त्वं सर्वविद्भवेः ॥ १५ ॥ यत्किंचिद् दृश्यते सर्वं मनोवाणीमयं जगत् । मनोवाणीविहीनं यत् सर्वं बुद्धिमयं बभौ ॥ १६ ॥ क्षिप्तं मूढं च विक्षिप्तमेकाग्रं च निरोधकम् । चित्तं पंचविधं प्रोक्तं बुद्धिरूपं तदेव च ॥ १७ ॥ पंचानां बहवो भेदा वक्तुं तान् नैव शक्यते । एवमेकाप्यनेकाऽसौ बुद्धिः सर्वत्र दृश्यते ॥ १८ ॥ मोहधारकरूपां ता सुभ्रांतां बुद्धिमादरात् । ज्ञानरूपां हृदिस्थां तु ब्रह्माकारां प्रविद्धि हि ॥१९॥ बुद्धियुक्तनरेणैव परत्रेह प्रलभ्यते । बुध्या ब्रह्ममयो योगो युज्यते ज्ञानिभिः परः ॥ २० ॥ एतादृशी महाभागा दक्षिणांगधराऽसुर । तस्य योगेश्वरस्याऽपि गणेशस्य महात्मनः ॥ २१ ॥ क्रीडार्थं रचिते माये स्वस्यांगात्तेन दैत्यप । ब्रह्मरूपं च तं विद्धि योगेन लभते नरः ॥ २२ ॥ स्वानंदाख्यं परं ब्रह्म तदेव नगरं मतम् । तत्र नित्यं वसति यः सिद्धिबुद्धिसमन्वितः ॥ २३ ॥ ब्रह्मणाराधितं ब्रह्म पुत्रभावार्थमादरात् । तदेव गणराजोऽयमागतो ब्रह्मणः सुतः ॥ २४ ॥ मातुः पितुश्च बंधं च पुत्रौ हरति यत्त्विति । तदर्थं पुत्रभावेन ब्रह्मणा प्रार्थितो विभुः ॥ २५ ॥ धर्मसंरक्षणार्थाय त्वां हनिष्यति निश्चितम् । अतस्त्वं शरणं गच्छ प्रभुमिच्छसि जीवितुम् ॥२६॥ मुद्गल उवाच । काव्यस्य मुनिमुख्यस्य वचनं ब्रह्मदायकम् । वेदांतसारसंभूतं श्रुत्वा दंभ उवाच ह ॥२७॥ दंभ उवाच । स्वामिन् श्रुतं मया वाक्यं त्वदीयं योगसंयुतम् । परं तु संशयं छिंधि हृदिस्थं कथयामि ते ॥२८॥ एतादृशं परं ब्रह्म गाणेशं चेन् महामुने । धर्माधर्मावतस्तस्मात् संभूतौ नात्र संशयः ॥२९॥ योगरूपेण सर्वत्र गणेशस्तिष्ठति प्रभो । धर्मस्य रक्षणं सोऽपि किं करोति विकारतः ॥ ३० ॥ अधर्मस्य तथा नाशं किमर्थं प्रकरोति सः । एतं संशयजातं मे छेत्तुमर्हसि सांप्रतम् ॥ ३१ ॥

काव्य उवाच । शृणु दंभ गणेशस्य चेष्टितं सर्वदं परम् । येन ते संशयः सर्वो नाशं यास्यति तत्क्षणात् ॥३२॥ इदं सृष्टं गणेशेन नानाभेदमयं जगत् । तत्र स्वस्वपदे चैव स्थापिता जंतवोऽभवन् ॥ ३३ ॥ अधर्मस्य च धर्मस्य व्यवस्था तेन सा कृता । तत्र लोभेन वै धर्ममधर्मो जयते यदा ॥ ३४ ॥ सुराणां वै तदा तेजः क्षीणं भवति सर्वतः । असुराणां महत्तेजो वर्धते च दिने दिने ॥ ३५ ॥ यदाऽयं गणराजस्तु देवानां पक्षवर्धनः । असुराणां विनाशाय स्वयं भवति चोद्यतः ॥ ३६ ॥ हत्वा देवगणैः सर्वैरसुराणां बलं महत् । स्वस्थाने स्थापयत्येव धर्मं सर्वप्रयत्नतः ॥ ३७ ॥ धर्मेण सकलं दैत्य ह्यधर्मस्य बलं हृतम् । तदा दैत्यादिकानां तु मूलच्छेदो भविष्यति ॥ ३८ ॥ देवानामुदितं तेजो भवेद्यदि महाद्भुतम् । दैत्याय वरदस्तर्हि भवेच्चानेकरूपवान् ॥ ३९ ॥ असुरैर्वरसंयुक्तैर्धर्मे क्षीणे समंततः । अधर्मस्य स संस्थां वै यथापूर्वमकल्पयत् ॥ ४० ॥ एवं लोभसमायुक्ताः सुरा दैत्या भवंति चेत् । तदा तेषां विनाशाय गणेशो यततेऽसुर ॥ ४१ ॥ नास्ति तस्य विचारेण स्वः परः क्वचिदेव च । क्रीडार्थं स्वात्मभावेषु स्थापयत्येव वै जनान् ॥ ४२ ॥ मुद्गल उवाच । शुक्रस्य वचनं रम्यं श्रुत्वा दंभः प्रतापवान् । गणेशं मनसा ध्यायन् संस्थितो नगरे स्वके ॥ ४३ ॥ एकांतेऽसौ महातेजा विचारं प्रचकार ह । अयं गणेशनामा वै पूर्णं ब्रह्म सनातनम् ॥ ४४ ॥ तमेव शरणं गच्छन् यशस्वी स भविष्यति । सर्वेषु समरूपेण स्थितोऽयं नात्र संशयः ॥ ४५ ॥ त्यक्त्वा सिद्धिपतिं सिद्धिमिच्छेद्यो दुर्मतिः परम् । असिद्धिर्भविता तस्य सुहृद्भिर्नात्र संशयः ॥ ४६ ॥ बुद्धेः पतिं गणेशं यस्त्यक्त्वा कुशलमिच्छति । तस्याऽकुशलमेवं च भविता दुष्टभावनः ॥ ४७ ॥ सिद्धिबुद्धिविहीनं तु ना किंचिद् दृश्यते मया । अतस्तं शरणं यामि सुरासुरसमं विभुम् ॥ ४८ ॥ इति निश्चितसंकल्पो दंभः सुष्वाप निर्भयः । गणेशं हृदि विन्यस्य भक्तिभावेन भावितम् ॥ ४९ ॥

॥ ओमिति श्रीमदांत्ये पुराणोपनिषदि श्रीमन्मौद्गले महापुराणे प्रथमे खंडे वक्रतुंडचरिते दंभासुरविचारो नाम चतुश्चत्वारिंशोऽध्यायः ॥

॥ श्रीगणेशाय नमः ॥ मुद्गल उवाच । शृणु दक्ष महाप्राज्ञ मद्द् दंभस्य कौशलम् । त्यक्त्वाऽऽसुरस्वभावं स संस्थितो विगतज्वरः ॥ १ ॥ प्रातरुत्थाय दैत्यान् स सर्वानाकारयत् स्वयम् । उवाच तान् महातेजा वचनं शुक्रसन्निधौ ॥ २ ॥ दंभासुर उवाच । शृणुध्वमसुराः सर्वे गुरुणाऽहं प्रबोधितः । शरणं वक्रतुंडं च यामि तत्र न संशयः ॥ ३ ॥ सुराणामधिपो नाऽयं

नायं दैत्याधिपः कदा । ब्रह्माकारेण सर्वत्र सिद्धिबुद्धिपतिः स्थितः ॥ ४ ॥ तस्य तद्वचनं श्रुत्वा कुपिता दानवास्तदा । ययुः स्वं स्वं गृहं सर्वे त्यक्त्वा दंभासुरं खलाः ॥ ५ ॥ दंभासुरः प्रसन्नात्मा काव्येन सहितः स्वयम् । शरणं गणनाथं च ययौ हर्षसमन्वितः ॥ ६ ॥ नगराद्बहिरागत्य ययौ देवस्य सन्निधिम् । दंडवत्पतितः पृथ्व्यां कृतांजलिरुपस्थितः ॥ ७ ॥ तुष्टाव तं गणाध्यक्षं तद्दर्शनमहोत्सवः । यथान्यायं पूजयित्वा निबद्धकरसंपुटः ॥ ८ ॥ दंभासुर उवाच । नमस्ते ब्रह्मरूपाय ब्रह्माकारशरीरिणे । ब्रह्मणे ब्रह्मदात्रे च गणेशाय नमो नमः ॥ ९ ॥ नमस्ते त्रिदशेशाय दैत्यदानवपाय च । सर्वत्र योगरूपाय भावहीनाय ते नमः ॥ १० ॥ सिद्धिबुद्धिपते तुभ्यं नमः सिंहध्वजाय च । गणानां पतये तुभ्यं हेरंबाय नमो नमः ॥ ११ ॥ एकदंताय देवाय ह्यनंतविभवाय ते । विघ्नेशाय महाविघ्ननाशनाय नमो नमः ॥ १२ ॥ अपारगुणधाराय दैत्यदानवमर्दिने । मनोवाणीमयायैव सर्वरूपाय ते नमः ॥ १३ ॥ मनोवाणीविहीनाय योगिभ्यो योगदायिने । योगाय योगनाथाय विश्वपाय नमो नमः ॥ १४ ॥ मायाधाराय मायायाश्चालकाय नमो नमः । मायाहीनाय सर्वत्र समभावधराय ते ॥ १५ ॥ अव्यक्ताय नमस्तुभ्यं व्यक्तिमूलधराय च । निर्मोहाय समोहाय लंबोदर नमो नमः ॥ १६ ॥ यं स्तोतुं न समर्थाश्च वेदाः सांगा महर्षयः । योगींद्रा ब्रह्मविष्णवाद्यास्तं किं स्तौमि परात् परम् ॥ १७ ॥ इत्युक्त्वा पतितः पृथ्व्यां दंभो भक्तिसमन्वितः । तमुत्थाप्य गणाधीश ऊचिवान् भक्तिभावितः ॥ १८ ॥ गणेश उवाच । त्वया दंभ कृतं स्तोत्रं मम संतोषवर्धनम् । यः पठेत् पाठयेत्तद्वा स सर्वं सुखमाप्नुयात् ॥ १९ ॥ पुत्रपौत्रकलत्रादि धनधान्यप्रदं भवेत् । आधिव्याधिहरं चैव सर्वोपद्रवनाशनम् ॥ २० ॥ एककालं द्विकालं वा त्रिकालं सततं तथा । यः पठेत् स नरोऽत्यंतं मम प्रीतिकरो भवेत् ॥ २१ ॥ त्वां हंतुं क्रोधसंयुक्त आगतोऽहं न संशयः । अधुना शरणं यातस्ततो हन्मि न निश्चितम् ॥ २२ ॥ वरं वरय मत्तस्त्वं यत्त्वच्चित्ते स्थितं परम् । स्तोत्रेण भक्तिभावेन संतुष्टोऽहं ददामि ते ॥ २३ ॥ गणेशवचनं श्रुत्वा दंभो हर्षसमन्वितः । उवाच गणपं तत्र भक्तिनम्रात्मकंधरः ॥ २४ ॥ दंभासुर उवाच । यदि देवेश तुष्टोऽसि यदि देयो वरो हि मे । अचलां देहि ते भक्तिं तदा नाथ नमोऽस्तु ते ॥ २५ ॥ आज्ञां त्वं ज्ञापय विभो वृत्यर्थं मे च सांप्रतम् । स्थानं देहि गणाध्यक्ष तत्र स्थास्यामि निश्चलः ॥ २६ ॥ दंभस्य वचनं श्रुत्वा गणेशस्तमुवाच ह । सुप्रसन्नतया दक्ष भक्तं गंभीरनिस्वनः ॥ २७ ॥ सिद्धिबुद्धिपतिरुवाच । भविता मयि भक्तिस्ते दृढा ह्यव्यभिचारिणी । तिष्ठ स्थाने स्वके त्वं वै दंभ

हर्षसमन्वितः ॥ २८ ॥ न त्वं न्यूनोऽसि मे क्वापि देवा नैवाधिका मताः । स्वस्वधर्मे स्थिताः सर्वे मम प्रीतिविवर्धनाः ॥ २९ ॥
स्वधर्मत्यागदोषेण क्रुद्धोऽहं नाशयामि तान् । अतस्त्वं निर्भयो भूत्वा चिरं तिष्ठ महासुर ॥ ३० ॥ यत्र मे स्मरणं नास्ति
कार्यादौ दैत्यसत्तम । तत्र त्वं दंभभावेन कार्यनाशं सदा कुरु ॥ ३१ ॥ कर्मादौ पूजनं यत्र मम नास्ति यदासुर । तदा
तन्नृंशभावेन निष्फलं कुरु सर्वदा ॥ ३२ ॥ मम भक्तिसमायुक्ता ये नराः सततं प्रियाः । तान् पालय प्रयत्नेन दंभ हीन-
स्वभावतः ॥ ३३ ॥ यत्र मे स्मरणं नास्ति पूजनं च महामते । आदौ तत्र च ते भागः कर्मरूपो मया कृतः ॥ ३४ ॥
एवमुक्त्वा स तं दंभं गणेशोऽन्तर्दधे स्वयम् । देवाश्च मुनयः सर्वे जयेत्युक्त्वा ययुस्ततः ॥ ३५ ॥ स्वस्वस्थानेषु दीप्तास्ते
स्थिता भयविवर्जिताः । पातालविवरे दैत्याः स्थिता निर्व्याकुलाः प्रभो ॥ ३६ ॥ एवं दंभासुरं शांतं स चकार गजाननः ।
ब्रह्मपुत्रत्वमापन्नस्तदप्युक्तं मया परम् ॥ ३७ ॥ य एतच्छृणुयान्नित्यं श्रावयेद्वा समाहितः । स दंभभयनिर्मुक्तो याति ब्रह्म
सनाननम् ॥ ३८ ॥ यं यं चिंतयते कामं तं तं प्राप्नोति मानवः । सर्वसंपत्समायुक्तस्तिष्ठेद्वै विघ्नवर्जितः ॥ ३९ ॥ अधुना
वामनस्यापि कथयामि समासतः । चरित्रं गणनाथस्य भक्त्या युक्तं महाद्भुतम् ॥ ४० ॥

॥ ओमिति श्रीमदान्त्ये पुराणोपनिषदि श्रीमन्मौद्गले महापुराणे प्रथमे खण्डे वक्रतुंडचरिते दंभासुरशांतिकथनं नाम पंचचत्वारिंशोऽध्यायः ॥

॥ श्रीगणेशाय नमः ॥ दक्ष उवाच । श्रुत्वा कथां गणेशस्य हर्षश्चेतसि वर्धते । अतः कथय सर्वज्ञ चरित्रं वामनस्य यत् ॥ १ ॥
मुद्गल उवाच । कश्यपो मुनिशार्दूलः प्रजापतिसमोऽभवत् । अदितिस्तस्य पत्न्यासीत् ज्येष्ठा परमधार्मिका ॥ २ ॥ तस्यां च
कश्यपाद्देवा इंद्राद्या जज्ञिरे प्रभो । तेषां विरुद्धभावेन स्थिता दैत्या मुनेः सुताः ॥ ३ ॥ बलेन वरगर्वेण देवान् हंतुं
समुद्यताः । अभवन् विष्णुना ते वै नानारूपेण नाशिताः ॥ ४ ॥ न प्रापुः स्वर्गराज्यं ते सर्वमान्यं यदा तदा । काव्यं
सकलनीतिज्ञं शरणं प्रययुः पुनः ॥ ५ ॥ तेषां सर्वं स वृत्तांतं विदित्वा मुनिपुंगवः । दैत्यानुवाच सर्वज्ञः काव्यो वेदविदां
वरः ॥ ६ ॥ काव्य उवाच । बलिदानवमुख्या वै शृणुध्वं मे वचो हितम् । यज्ञे देवाः समुत्पन्ना यज्ञाधारास्ततः सुराः ॥ ७ ॥
अतोऽश्वमेधयज्ञैश्च यजध्वं शतसंख्यकैः । बलिरिंद्रो महाबाहुर्भविता नात्र संशयः ॥ ८ ॥ द्वेषभावं च देवानां सदा

संछाद्य यत्नतः । तेन स्वर्गभुजो दैत्या यूयं सर्वत्र पूजिताः ॥ ९ ॥ भविष्यथ महाभागास्तस्मात् कुरुत मद्वचः । सर्वे हृष्टाश्च तं तत्र साधु साध्वब्रुवन् स्थिताः ॥ १० ॥ ततस्ते बलिराजं च मुख्यं कृत्वा महाबलाः । त्वरिता अश्वमेधेषु दीक्षितं चक्रुरादरात् ॥ ११ ॥ बलिर्विरोचनाज्जातो विष्णुभक्तिपरायणः । अधर्मे न रुचिस्तस्य जायते हि कदाचन ॥ १२ ॥ आदौ त्यक्त्वा गणेशानं विष्णुं स्मृत्वा महासुरः । आद्यं तं यज्ञमारेभे विष्णुभक्ततया खलः ॥ १३ ॥ तस्य चेष्टितमाज्ञाय विघ्नः परमहर्षितः । उवाच सदसि ह्यादौ पूजितो न गणाधिपः ॥ १४ ॥ भुक्तिमुक्तिप्रदाता यः सर्वसिद्धिकरो विभुः । सिद्धिमिच्छंति तं त्यक्त्वा तेऽसिद्धाः प्रभवंति हि ॥ १५ ॥ विष्णोर्बलेन दैत्यस्य भवेत् सिद्धिश्च कीदृशी । भक्षयिष्यामि तत्सर्वं कर्म तेन मखे कृतम् ॥ १६ ॥ इत्युक्त्वा स स्वयं विघ्न आययौ क्रोधसंयुतः । प्रविश्य देवराजस्य हृदये संस्थितोऽभवत् ॥ १७ ॥ यज्ञाः संकल्पितास्तस्य विप्रैस्तु शतसंख्यकाः । आद्ये यज्ञे समारब्धे इंद्रश्चिंतातुरोऽभवत् ॥ १८ ॥ शतयज्ञप्रभावेण बलिरिंद्रो भविष्यति । ततः स शरणं विष्णुं जगाम सुरनायकः ॥ १९ ॥ नत्वा स्तुत्वा महातेजाः प्रार्थयामास सादरम् । विष्णुं देववरं तत्र बलियज्ञविनाशने ॥ २० ॥ एतस्मिन्नंतरे तत्र विघ्नः कालस्वरूपधृक् । बलवान् विष्णुमाविश्य संस्थितो हृदयेऽभवत् ॥ २१ ॥ बलेः प्रचेष्टितं पूर्णं कथितं वज्रपाणिना । तज्ज्ञात्वा सकलं विष्णुरिंद्रं प्रोवाच सत्वरम् ॥ २२ ॥ विष्णुरुवाच । अदित्या कश्यपेनापि तपस्तप्तं सुदारुणम् । शतवर्षं मदर्थं च तस्मिन् काले सुराधिप ॥ २३ ॥ तयोरहं प्रसन्नात्मा वरदश्च पुराऽभवम् । ताभ्यां त्वं पुत्रतां याहि याचितं सर्वभावतः ॥ २४ ॥ ओमित्युक्तं मया तत्र तं वरं सफलं प्रभो । अधुनाऽहं करिष्यामि बलेर्यज्ञस्य नाशने ॥ २५ ॥ विस्मृता विष्णुनाऽत्यंतं बलेर्भक्तिर्महाद्भुता । स बलेर्निग्रहार्थं च स्वयमेवोद्यतोऽभवत् ॥ २६ ॥ स विष्णुः कश्यपाज्जातो ह्यदित्यां वामनः प्रभुः । बलेर्बलं निरीक्ष्यैव न शशाक प्रचालितुम् ॥ २७ ॥ मनसि क्षुभितो विष्णुः कश्यपं पितरं तदा । पप्रच्छ बलिनाशाय वदोपायं महामुने ॥ २८ ॥ षडक्षरं महामंत्रं वक्रतुंडस्य तं ददौ । ततोऽसौ च विदर्भेषु गत्वा तपसि संस्थितः ॥ २९ ॥ दशवर्षं महोग्रं स तपस्तेपे सुदारुणम् । निराहारतया दक्ष गणेशं हृदि चिंतयन् ॥ ३० ॥ उग्रेण तपसा तस्य प्रत्यक्षः सिंहवाहनः । षडक्षरप्रभावेण तं ययौ भक्तवत्सलः ॥ ३१ ॥ चतुर्बाहुधरः पूर्णः सिद्धिबुद्धिसमन्वितः । एकदंतो गजाकारमुखः पाशांकुशादिधृक् ॥ ३२ ॥ सिंदूरारुणदेहश्च शूर्पकर्णो महोदरः । कोटिसूर्यसमानेन तेजसा सुविराजितः ॥ ३३ ॥ तं दृष्ट्वा सहसोत्थाय

वामनः प्रणनाम सः । बद्धांजलिपुटो भूत्वा स्तोतुं समुपचक्रमे ॥ ३४ ॥ वामन उवाच । नमो विघ्नपते तुभ्यं भक्तविघ्नविनाशिने । अभक्तविघ्नदात्रे च गणेशाय नमो नमः ॥ ३५ ॥ वक्रतुंडाय सर्वेश पालकाय नमो नमः । नानारूपधरायैव सर्वांतर्यामिणे नमः ॥ ३६ ॥ सर्वं चराचरं स्वामिंस्त्वदाज्ञा वशवर्ति च । विभूतिभिर्महाराज कुरुषे सर्वमंजसा ॥ ३७ ॥ ब्रह्मा प्रजापतीनां त्वं यज्ञानां विष्णुरेव च । ईश्वराणां स्वयं शंभुर्देवानां त्वं पुरंदरः ॥ ३८ ॥ प्रकाशानां रविस्त्वं च चंद्रोऽन्नेषु गणाधिप । यमो यमवतां त्वं वै वरुणो यादसां प्रभो ॥ ३९ ॥ वायुर्बलवतां त्वं च निधीनां धनपः स्वयम् । अग्निर्वै दाहकानां त्वं रक्षसां निर्ऋतिः स्वयम् ॥ ४० ॥ नागानां शेषरूपोऽसि योगिनां शुक्र एव च । कुमाराणां त्वं च सनत्कुमारोऽसि न संशयः ॥ ४१ ॥ गुहः सेनापतीनां त्वं मृगाणां सिंहवेषभृत् । एवं नानास्वरूपैस्त्वं जगद्रक्षणतत्परः ॥ ४२ ॥ त्वां स्तोतुं कः समर्थः स्याद्योगरूपं सनातनम् । वेदाः शेषश्च वेधा च शक्ता न स्तवनेऽभवन् ॥ ४३ ॥ तत्र मंदमतिः काहं पारं गंतुं तव स्तुतेः । तथापि च यथाबुद्धि संस्तुतोऽसि च विघ्नप ॥ ४४ ॥ तव दर्शनमात्रेण कृतकृत्योऽस्मि सांप्रतम् । धन्यं जन्म मदीयं वै येन दृष्टो गजाननः ॥ ४५ ॥ धन्यौ माता पिता मेऽद्य स्थलं धन्यं तपोऽपि च । षडक्षरश्च मंत्रोऽयं धन्यो येन त्वमागतः ॥ ४६ ॥ एवमुक्त्वा ननर्तासौ भक्तिभावपरिप्लुतः । रोमांचितशरीरोऽभूदानंदाश्रु सृजन्मुहुः ॥ ४७ ॥ देहभावं परित्यज्य वामनो हर्षसंयुतः । नर्तकनिष्ठतां प्राप्तो महाभागः प्रजापते ॥ ४८ ॥ तं तादृशं गणाधीशो दृष्ट्वा प्रेमपरिप्लुतम् । जगाद परमात्माऽसौ वामनं भक्तवत्सलः ॥ ४९ ॥ गणेश उवाच । शृणु वामन मे वाक्यं वरं वृणु हृदीप्सितम् । तव भक्त्या तपोयुक्त्या स्तुत्या वै तुष्टिमागतः ॥ ५० ॥ दास्यामि सकलं तुभ्यं यद्यपि स्यात् सुदुष्करम् । धन्योऽसि बालभावेऽपि भक्तिस्ते मे पदापदि ॥ ५१ ॥ त्वया कृतमिदं स्तोत्रं सर्वदं प्रभविष्यति । यः पठेच्छ्रावयेद्वापि तस्य सिद्धिर्भविष्यति ॥ ५२ ॥ यं यं चिंतयते कामं तं तं दास्यामि दुर्लभम् । अंते मोक्षं महाविष्णो स्वानंदं प्रददाम्यहम् ॥ ५३ ॥ इति तस्य वचः श्रुत्वा वक्रतुंडस्य शोभनम् । वामनः प्रणतो भूत्वा तं जगाद गजाननम् ॥ ५४ ॥ प्रसन्नो यदि देवेश देहि भक्तिं दृढां च ते । बलिं देवरिपुं ढुंढे मत्साध्यं कुरु दैन्यपम् ॥ ५५ ॥ यदाहं त्वां स्मरिष्यामि तदात्मानं प्रदर्शय । यथा न मां भवेद्विघ्नो वरं देहि गजानन ॥ ५६ ॥ तथेति तमथोक्त्वाऽसौ गणेशोंऽतर्दधे

स्वयम् । वामनस्तत्र देवेशं स्थापयामास हर्षतः ॥ ५७ ॥ अदोषाख्यं महाक्षेत्रं विदर्भे स्थानमुत्तमम् । वक्रतुंडस्य संभूतं नराणां सर्वसिद्धिदम् ॥ ५८ ॥

॥ ओमिति श्रीमदान्त्ये पुराणोपनिषदि श्रीमन्मौद्गले महापुराणे प्रथमे खण्डे वक्रतुण्डचरिते वामनवरप्रदानं नाम षट्चत्वारिंशोऽध्यायः ॥

॥ श्रीगणेशाय नमः ॥ मुद्गल उवाच । वरं लब्ध्वा स संपूज्य वक्रतुंडं च वामनः । कश्यपं प्रणतो भूत्वा ययौ यज्ञं बलेरपि ॥ १ ॥ तं दृष्ट्वा सूर्यसंकाशं वेदाध्ययनसंयुतम् । ह्रस्वाकृतिं मुनिश्रेष्ठं विस्मिता मुनयोऽभवन् ॥ २ ॥ बलिरुत्थाय तं नत्वा पूजयामास भक्तितः । पप्रच्छ किं ददे तुभ्यं मां तद् ब्रूहि महामुने ॥ ३ ॥ ततः शुक्रेण सर्वं तज्ज्ञातं तस्य प्रयोजनम् । गणेशपूजनं चादौ न कृतं दुष्टबुद्धिना ॥ ४ ॥ तेन विघ्नस्वरूपं च विष्णुरूपेण संस्थितम् । अधुना यादृशं भावि तथा भवतु तादृशम् ॥ ५ ॥ बलेर्वचनमाकर्ण्य वामनः प्राह तं ततः । देहि त्रिपदरूपां मे भूमिं दैत्यपते किल ॥ ६ ॥ ददौ बलिर्महा-भक्त्या तां भूमिं सादरो यथा । तथा वामनदेवोऽपि गणेशं मनसाऽस्मरत् ॥ ७ ॥ विराड्रूपं ततो धृत्वा पादं चिक्षेप देवपः । एकेन सकलं स्वर्गं पादेनावृत्य सत्वरः ॥ ८ ॥ द्वितीयेन स भूमिं वै सर्वामावृत्य वामनः । उवाच दैत्यपं देहि तृतीयस्य स्थलं प्रभो ॥ ९ ॥ बलिर्विस्मयमापन्नो भ्रांतः शोकाकुलो भवत् । किंचिन्नोवाच तं तत्र किं ददामीति विह्वलः ॥ १० ॥ ततो विष्णुः प्रकोपेन तं बबंध महासुरम् । विप्रस्य त्वमृणी जातो नरकं गच्छ दैत्यप ॥ ११ ॥ विष्णोर्वचनमाकर्ण्य बलिर्वै दुःखितोऽभवत् । नरकं विष्णुभक्ताय दत्ते वै विष्णुरद्भुतम् ॥ १२ ॥ अहो मोहो महान्मे-ऽभूद्येन वेदविवर्जितम् । कृतं कर्म विना पूज्यं गणेशं विघ्ननायकम् ॥ १३ ॥ तस्येदं हि फलं प्राप्तं विष्णुभक्तस्य विष्णुतः । अतस्तं शरणं यामि स रक्षिष्यति मां प्रभुः ॥ १४ ॥ एवं विचार्य तस्यैव मनसि ध्यानमादधे । ढुंढिं तुष्टाव दैत्येशः सर्वभावसमन्वितः ॥ १५ ॥ बलिरुवाच । नमस्ते विघ्नराजाय भक्तानां विघ्नहारिणे । अभक्तानां विशेषेण विघ्नकर्त्रे नमो नमः ॥ १६ ॥ सर्वाकाराय देवाय गम्यागम्यस्वरूपिणे । स्वानंदपतये तुभ्यं हेरंबाय नमो नमः ॥ १७ ॥ नमो ब्रह्मपते तुभ्यं गणाध्यक्षाय ते नमः । सिद्धिबुद्धिपते तुभ्यं नमो विश्वंभराय ते ॥ १८ ॥ अपाराय नमस्तुभ्यं


नानामायाश्रयाय च । मायामोहहरायैव गणेशाय नमो नमः ॥ १९ ॥ सर्वांतर्यामिणे तुभ्यं चिंतामणिसुरूपिणे । सततं ब्रह्मभूताय नमस्ते जगदादये ॥ २० ॥ अंते मध्ये च सर्वत्र संस्थिताय नमो नमः । आदिमध्यांतहीनाय सिंहवाहाय ते नमः ॥ २१ ॥ अपराधानसंख्यातान् मदीयान् जगदीश्वर । क्षंत्वा पाहि गणाधीश पतंतं नरके च माम् ॥ २२ ॥ त्वन्माया-मोहयोगेन मोहितोऽहं न संशयः । तेन मत्सरभावेन त्वां त्यक्त्वा विष्णुमाश्रितः ॥ २३ ॥ सकलं विघ्नसंयुक्तं जगदेतच्चराचरम् । शिवविष्णवादिभिः सार्धं तव मायाविमोहितम् ॥ २४ ॥ यदि त्वां शरणं ढुंढे शिवविष्णवादयः प्रभो । गच्छंति मोहहीना वै निर्विघ्नास्ते भवंति च ॥ २५ ॥ अन्यथा भ्रष्टरूपास्ते पदहीना भवंति च । अतस्त्वं सर्वदेवानां धारको नात्र संशयः ॥ २६ ॥ सत्तारूपा महाविघ्नास्तेषां स्वामी भवान् मतः । सर्वेषां स्थापकाश्चैव तथोत्थापनकारकाः ॥ २७ ॥ अधुना त्वत्प्रसादेन मया बुद्धं गजानन । अतस्त्वां शरणं यातो दीनोऽनाथश्च सांप्रतम् ॥ २८ ॥ रक्ष रक्ष गणाध्यक्ष नरकान्मां दयानिधे । त्वत्स्मृत्या चैव भवति जनः सर्वार्थसिद्धिभाक् ॥ २९ ॥ एवं नानाविधैः स्तोत्रैस्तुष्टाव दनुजेश्वरः । तदैवाकाशजां वाणीं शुश्राव परमाद्भुताम् ॥ ३० ॥ मा भयं कुरु दैत्येंद्र रक्षामि शरणागतम् । नरकात्ते भयं नास्ति मत्स्मृतेः करणात् कदा ॥ ३१ ॥ त्वया कृतमिदं स्तोत्रं नरकस्य हरं भवेत् । यः पठेच्छ्रावयेद्वापि नरकात्तस्य नोभयम् ॥ ३२ ॥ धर्मार्थकाममोक्षाणां साधनं प्रभविष्यति । मद्भक्तिवर्धनं चैव बले भवति निश्चितम् ॥ ३३ ॥ श्रुत्वाऽऽकाशभवां वाणीं बलिर्हृष्टो बभूव ह । तमेव गणपं चित्ते ध्यायंस्तत्रैव संस्थितः ॥ ३४ ॥ एतस्मिन्नंतरे विघ्नो विष्णुं तत्याज वै यतः । ततो बुद्धिप्रकाशश्च विष्णोर्जातस्तु तत्क्षणात् ॥ ३५ ॥ वामनो मनसा तत्र ध्यायति स्म प्रजापते । मम भक्तो बलिः पूर्णस्तस्य प्राप्तं महद्भयम् ॥ ३६ ॥ विप्रस्य ऋणमुग्रं यत्तेनायं नारकी भवेत् । अहो मयातिमूर्खेण मम भक्तः प्रपीडितः ॥ ३७ ॥ वेदवाह्यं कृतं कर्म बलिना मत्स्मरान मखे । न पूजितो गणाध्यक्षः फलहीनोऽभवत्ततः ॥ ३८ ॥ अधुना भक्तरक्षार्थं किं करोमि विचारतः । गणेशं शरणं यामि ततः सौख्यं भविष्यति ॥ ३९ ॥ एवं विचार्य देवेशो गणेशं हृदि सोऽस्मरत् । स्मृतिमात्रेण तस्याग्रे प्रकटोऽभूद्गजाननः ॥ ४० ॥ तं दृष्ट्वा प्रणनामादौ पूजयामास भक्तितः । सर्वे देवगणास्तत्र मुनयस्तमपूजयन् ॥ ४१ ॥ एतस्मिन्नंतरे तत्र बलिः प्रोवाच वामनम् । गणेशदर्शनेनैव प्राप्तबुद्धिर्महायशाः ॥ ४२ ॥ बलिरुवाच । ब्रह्मन् देहि तृतीयं ते पादं शिरसि चाशु मे । देहोऽयं दानरूपेण मया दत्तो न संशयः ॥ ४३ ॥ तच्छ्रुत्वा हर्षितो विष्णुस्तथेति स चकार ह ।

ब्राह्मणस्यर्णनिर्मुक्तं भक्तं कृत्वा च संस्थितः ॥ ४४ ॥ ततस्तं मुनिभिर्देवैः सहितोऽसौ जनार्दनः । तुष्टाव प्रांजलिं बध्वा गणेशं सर्वसिद्धिदम् ॥४५॥ वामन उवाच । नमस्ते गणनाथाय सर्वेषां पतये नमः । नानागणविभक्ताय जगत्कर्त्रे नमोऽस्तु ते ॥४६॥ विघ्नानां पतये तुभ्यं नमश्चंद्रार्धधारिणे । त्रिनेत्राय नमस्तुभ्यं भक्तसंरक्षकाय च ॥ ४७ ॥ अमेयमायया देव तवेदं रचितं जगत् । तव मायाविमोहेन मोहितान् रक्ष विघ्नप ॥ ४८ ॥ तव मायाप्रभावं च को जानाति गजानन । वयं योगिगणाश्चान्ये न तं वेत्तुं क्षमाः कदा ॥ ४९ ॥ अतोऽपराधं जातं मे क्षंतुमर्हसि मानद । तव भक्ता वयं नाथ देवदेव नमोऽस्तु ते ॥ ५० ॥ बलिस्त्वयं मदीयश्च भक्तः परमभाविकः । मच्छ्रेष्ठत्वेन देवेश जातोऽसौ मत्सरान्वितः ॥ ५१ ॥ तेन वेदविरुद्धं च कृतं कर्म महाद्भुतम् । त्वां विना यज्ञमारेभे फलहीनोऽभवत्क्रतुः ॥ ५२ ॥ अधुना मुनिभिर्देवैः सहितोऽहं गजानन । प्रार्थयामि तदर्थं त्वां सफलं कुरु दानवम् ॥ ५३ ॥ त्वं विनायकनामाऽसि त्वया यत्कृतमादरात् । तदेव मान्यतां याति वेदादिषु न संशयः ॥ ५४ ॥ वयं नायकसंयुक्ता वेदबाह्यं यदा प्रभो । कुर्मश्चेद्वै पदभ्रष्टाः क्रियंते च त्वया तदा ॥ ५५ ॥ यज्ञस्य फलसंयुक्तमतो भक्तं कुरु प्रभो । इत्युक्त्वा पादयोस्तस्य पपात गणपस्य सः ॥ ५६ ॥ तमुत्थाप्य गणाधीशो जगाद वचनं हरिम् । किं करोमि पुरा चैवं वरदोऽहं बभूव ते ॥ ५७ ॥ त्वदीयहस्ततो दैत्यं नरके पातयाम्यहम् । इति क्रोधसमाविष्टोऽधुना स्मरति मां खलः ॥ ५८ ॥ कायेन मनसा वाचा दैत्यो मां शरणं गतः । त्वं च प्रार्थयसे विष्णो वाञ्छितं च करोमि ते ॥ ५९ ॥ अधुना मां पुरस्कृत्य एतं यज्ञं समापय । तेनाऽयं सकलानां च यज्ञानां फलमश्नुते ॥ ६० ॥ अपराधस्य माहात्म्यं किंचित्पश्यतु केशव । इंद्रे निवृत्तेस्मिन्नेष इंद्रः पश्चाद् भविष्यति ॥ ६१ ॥ पाताले स्थापयस्वैनं नात्र कार्या विचारणा । अधुना फलहीनत्वं जनार्दन कृतं मया ॥ ६२ ॥ गणेशवचनं श्रुत्वा सर्वे हर्षसमन्विताः । साधु साधु महाराज गजानन कृतं त्वया ॥ ६३ ॥ इत्युक्तस्तं पुरस्कृत्य यज्ञं चक्रे बलिस्ततः । अंतिमं भावयुक्तः सन् कृतकृत्योऽभवद्यथा ॥ ६४ ॥ गणेशोंऽतर्दधे तत्र देवाः स्वं स्वं पदं ययुः । एवं वामनमाहात्म्यं कथितं ते प्रजापते ॥ ६५ ॥ यः शृणोति नरो भक्त्या वाञ्छितं लभते ध्रुवम् । श्रावयेच्छृणुयाद्वा यस्तस्य सर्वं न दुर्लभम् ॥ ६६ ॥

॥ ओमिति श्रीमदान्त्ये पुराणोपनिषदि श्रीमन्मौद्गले महापुराणे प्रथमे खण्डे वक्रतुंडचरिते वामनचरितं नाम सप्तचत्वारिंशोऽध्यायः ॥



॥ श्रीगणेशाय नमः ॥ शौनक उवाच । त्वया प्रकथितं सूत वक्रतुंडस्य धीमता । मत्सरासुरनाशाख्यं चरित्रं सर्वसिद्धिदम् ॥१॥ स स्थितः कुत्र तत् क्षेत्रस्थानं ब्रूहि महात्मनः । आदौ तस्यावतारस्य तिथिमुत्सववर्धिनीम् ॥ २॥ सूत उवाच । प्राचीदिगंत-संस्थाने स्थापितोऽसौ महर्षिभिः । देवैश्च गणसंयुक्तैर्महोत्सवपरायणैः ॥ ३॥ भाद्रशुक्लचतुर्थ्यां वै प्रकटोऽभूत्स देवराट् । वक्रतुंडः प्रसन्नात्मा सा तिथिः परमा मता ॥ ४॥ मध्याह्नसमये तस्य पूजनं सुखदायकम् । अपारसिद्धिदं प्रोक्तमाद्यंते स्वल्पसिद्धिदम् ॥५॥ द्वीपे द्वीपे च खंडेषु स्वस्वपूर्वदिगंतरे । प्रतिमा वक्रतुंडस्य स्थापिता मुनिभिःपुरा ॥६॥ तत्र क्षेत्रं समाख्यातं दशयोजनमात्रकम् । चतुरस्रं महापुण्यं भुक्तिमुक्तिप्रदं परम् ॥७॥ मध्ये स संस्थितो देवो वक्रतुंडो गणेश्वरः । वामांगे सिद्धिराद्या सा बुद्धिर्वै दक्षिणांगके ॥८॥ संमुखे सिंहरूपं च वाहनं तस्य शोभनम् । अष्टदिक्षु स्थितास्तस्य सिद्धयोऽष्टौ च शौनक ॥९॥ गणा अष्टौ तथा ज्ञेयाश्चतुर्दिक्षु क्रमेण ते । शिवो विष्णू रविः शक्तिर्भक्तियुक्ताः स्थिता इमे ॥१०॥ ब्रह्माद्या देवताः सर्वास्तत्पश्चात् पूर्वतः स्थिताः । गंगाद्याः सरितः सर्वा दक्षिणे संस्थिताः प्रभो ॥११॥ क्षेत्राणि काशिकादीनि पश्चिमे संस्थितानि च । वसिष्ठाद्या मुनिश्रेष्ठाः संस्थितास्तत्र चोत्तरे ॥१२॥ शेषाद्या नागभूपाश्च गंधर्वाः पर्वतास्तथा । सिद्धा अप्सरसश्चैव विद्याधाः किंनरा गणाः ॥१३॥ नानाजातिषु ये श्रेष्ठा अभवंस्तत्र संस्थिताः । न वक्तुं शक्यते स्वामिन् मया वर्षशतैरपि ॥१४॥ सेवार्थं वक्रतुंडस्य लालसाधारिणः प्रभोः । हृष्टाः प्रमुदितास्तत्र परस्परहिते रताः ॥१५॥ वक्रतुंड-चरित्राणि कथयंति परस्परम् । हृष्टरोमाण एवं ते भवंतो भावतः पुनः ॥१६॥ समुद्रे स्नानकर्तारस्तत्र तीर्थानि चक्रिरे । स्वस्वनामांकितान्येव स्वल्पदेहधरा मुने ॥१७॥ गणेशतीर्थं तत्रैव वक्रतुंडस्य हर्षदम् । कृतकृत्या भवंत्यत्र स्नानमात्रेण जंतवः ॥१८॥ यात्रामात्रेण तत्रैव जन ईप्सितमाप्नुयात् । क्षेत्रे मरणतो जंतुर्ब्रह्मभूतश्च जायते ॥१९॥ दूरे स्थित्वा नरो यस्तु स्मरणं प्रकरोति चेत् । तस्यापि शुक्लगत्या सा मुक्तिर्भवति शाश्वती ॥२०॥ वक्रतुंडस्य ये भक्ता यत्र कुत्र स्थिता मुने । ब्रह्मभूता न संदेहः पावना दर्शनान्नृणाम् ॥२१॥ संक्षेपेण मया तस्य स्थानं ते कथितं मुने । विस्तरेण न शेषोऽपि ब्रह्मविष्णुमहेश्वराः ॥२२॥ वेदाः सस्मृतयः सर्वे स्कंदो योगिन एव च । अयुतायुतवर्षैस्ते कथितुं न क्षमाः कदा ॥२३॥ मुद्गलेन यथा प्रोक्तं दक्षाग्रे तन्मया तथा । कथितं भावयुक्तेन किमन्यच्छ्रोतुमिच्छसि ॥२४॥ शौनक उवाच । सूत सूत महाभाग धन्यं क्षेत्रसमुद्भवम् । माहात्म्यं श्रुतमस्माभिर्ब्रह्मसायुज्यदायकम् ॥२५॥ अधुना ब्रूहि धर्मज्ञ यद्दक्षेण च



संश्रुतम् । मुद्गलात्तेन कथितमग्रे यत् कीदृशं च तत् ॥२६॥ सूत उवाच । क्षेत्रस्य चरितं श्रुत्वा दक्षो हर्षसमन्वितः । उवाच मुद्गलं विप्रं भक्तिनम्रात्मकंधरः ॥२७॥ दक्ष उवाच । ढुंढिराजावतारस्य चरितं वद विस्तरात् । वक्रतुंडः स्वयं साक्षात् कथं शंकरदेहजः ॥२८॥ मुद्गल उवाच । शृणु दक्ष महाभाग कथयामि पुरातनम् । इतिहासं गणेशस्य गुणयुक्तं महाद्भुतम् ॥ २९ ॥ याज्ञवल्क्यमुनींद्रेण कथितं कौशिकाय यत् । तदहं संप्रवक्ष्यामि ब्राह्मणत्वप्रकाशकम् ॥३०॥ भार्गवो मुनिमुख्यो य ऋचीकस्तपसि स्थितः । बहुकाले व्यतिक्रांते तपसा जीर्णतां ययौ ॥३१॥ वृद्धत्वं परिपूर्णं च प्राप्तं तस्य महात्मनः । वनेषु मृगयूथानि स पश्यन् विस्मितोऽभवत् ॥३२॥ मृगीसंसक्तचित्तश्च मृगः स्वाधीनतां गतः । पुत्रपौत्रादिसंयुक्तो बभ्राम वनगोचरः ॥३३॥ एकैकाश्रितचित्तास्ते क्रीडां चक्रुः परस्परम् । दृष्ट्वा भृगुवरस्तत्र सकामः संबभूव ह ॥३४॥ उवाच स्वयमेवेदं धन्यं गार्हस्थ्यमेव च । इत्थं विचार्य विप्रस्तु ययौ गाधिं नराधिपम् ॥३५॥ स दृष्ट्वा सहसोत्थाय मुनिं गाधिरपूजयत् । भुक्त्वाऽयाचत तत्कन्यां भार्यार्थं नृपसत्तमम् ॥३६॥ राजा वृद्धं समालोक्य तं जगाद महामुनिम् । श्यामकर्णयुताश्वानां सहस्रं देहि मे मुने ॥३७॥ शुल्कं ग्राह्यं मया चैवं निश्चयः प्राकृतो मुने । अतस्त्वां प्रार्थये विप्र पश्चात्कन्यां ददामि ते ॥३८॥ श्रुत्वा मुनिर्गतः सद्यो वरुणस्य गृहं प्रति । गृहीत्वाऽश्वसहस्रं च तस्मात्तं प्रययौ ददौ ॥३९॥ राजा कन्यां ददौ तस्मै भार्गवाय महात्मने । विधिवद्भयभीतः स तां प्रगृह्य ययौ वनम् ॥४०॥ राजपत्नी सुतां प्राह त्वदीयं भाग्यमीदृशम् । अस्माभिः किं प्रकर्तव्यं वनवासं सुते कुरु ॥४१॥ विलप्य द्रव्यवस्त्रादीन् दत्वा पुत्रीकरे तदा । स्वगेहं सा जगामापि वने प्रस्थाप्य तां मुने ॥४२॥ राजपुत्री महाभागा ऋचीकं प्राप्य संस्थिता । सेवामनलसत्वेन कृत्वा तद्भक्तितत्परा ॥४३॥ तां दृष्ट्वा शीलसंयुक्तां प्रसन्नो मुनिसत्तमः । तदर्थं तपसा स्वेन निर्ममे नगरं वने ॥४४॥ चातुर्वर्ण्यसमायुक्तं हेमरत्नविभूषितम् । दासीदासादिसंयुक्तं नानाविभवदं परम् ॥४५॥ स्वयं तपःप्रभावेण यौवनं रूपमादधे । रेमे तया यथान्यायं देवेंद्रेण समः प्रभो ॥४६॥ निःस्पृहो भोगरागेषु दृष्ट्वा स्त्रीसुखमल्पकम् । मानसे धारयामास व्यर्थं पत्नीभवं सुखम् ॥४७॥

॥ ओमिति श्रीमदान्त्ये पुराणोपनिषदि श्रीमन्मौद्गले महापुराणे प्रथमे खण्डे वक्रतुंडचरिते ऋचीकगृहस्थाश्रमवर्णनं नाम चत्वारिंशोऽध्यायः ॥



॥ श्रीगणेशाय नमः ॥ मुद्गल उवाच । एकदा राजपत्नी सा वनं शोकसमाकुला । आययौ दर्शनार्थं तां पुत्रीं वस्त्रधनान्विता ॥१॥ ऋचीकस्याश्रमं तत्र न ददर्श रथे स्थिता । नगरं हेमशोभाढ्यं दृष्ट्वा सा विस्मिताऽभवत् ॥२॥ कस्येदं नगरं दिव्यं देवैर्वा निर्मितं भवेत् । क गतो मुनिशार्दूलो जामाता मे स भार्गवः ॥३॥ एवं शोकसमायुक्ता विचारमकरोद् हृदि । ददर्श पुरुषं कंचित्तं पप्रच्छ भयातुरा ॥४॥ कस्येदं नगरं ब्रूहि स जगाद च तां मुने । ऋचीकस्य पुरं देवि वयं तस्य प्रमार्जकाः ॥५॥ पुनस्तं विस्मिता राज्ञी जगाद वद सांप्रतम् । ऋषिपत्नीं च मे पुत्रीमागतां जननीं पुरे ॥६॥ तथेति पुरुषो गत्वा कथयामास तां ततः । सा स्वमातरमागम्य निनाय स्वगृहं पुरे ॥७॥ जामातरं श्रिया युक्तं दृष्ट्वा विस्मितमानसा । उवाच स्वसुतां राज्ञी पुत्रार्थं भावसंयुता ॥८॥ मम पुत्रार्थमेवं च तव पुत्रार्थमादरात् । याचस्व स्वामिनं पुत्रि समर्थं मुनिपुंगवम् ॥९॥ ऋषिपत्नी पतिं तत्र याचयामास तत्तथा । द्वौ चरू ह्यग्निकुंडे स चकार सुतलिप्सया ॥१०॥ द्विविधं स पुरोडाशं ब्रह्मक्षत्रप्रकाशकम् । अतुलं तेज आवाह्य ददौ पत्नीकरे मुनिः ॥११॥ जगाद तां मुनिश्रेष्ठो भक्षितव्यस्त्वया ह्ययम् । तव मात्रा तथाऽन्यो वै भक्षितव्यः शुचिस्मिते ॥१२॥ तदा पुत्रसमायुक्ते युवां किल भविष्यथः । एवमुक्त्वा मुनिस्तीर्थे माध्याह्नार्थं ययौ किल ॥१३॥ पुत्र्या मात्रे स वृत्तांतः कथितः साऽब्रवीत् सुताम् । त्वदीयो भक्षितव्यो मे मदीयं त्वं प्रभुंक्ष्व वै ॥१४॥ तथा पुत्र्या कृतं सर्वं गता माता स्वमालयम् । राज्ञी गर्भवती जाता ब्राह्मणी च प्रजापते ॥१५॥ एकदा मुनिना दृष्टा स्नुषा तेजोधरा बभौ । उवाच भार्गवः पत्नीं किं कृतः क्षात्र आदरः ॥१६॥ सोवाच भयभीता तं व्यतिक्रममसु चरैः । तामुवाच मुनिस्तत्र विस्मितो मानसेऽभवत् ॥१७॥ तव भ्राता तपस्वी च भविष्यति न संशयः । तव पुत्रो धनुर्धारी दारुणः प्रभविष्यति ॥१८॥ सोवाच स्वामिनं भीता द्विजं पुत्रं तु मे प्रभो । देहि नोचेज्जीवघातं करिष्यामि न संशयः ॥१९॥ ततो मुनिः स्वयं प्राह पुत्रपुत्रो भवेत्तथा । गर्भं विज्ञाप्य विष्णुं वै तपसा स तथाऽकरोत् ॥२०॥ ततस्तस्याऽभवत्पुत्रो जमदग्निर्महातपाः । तस्य पुत्रत्वमापेदे रामः शस्त्रभृतांवरः ॥२१॥ नवमे गाधिपत्नी सा मासे पुत्रं तपोनिधिम् । विश्वामित्रं महाभागं सुषुवे प्रेमविह्वला ॥२२॥ स तु यौवनमापन्नं संस्थाप्य वनमादरात् । गाधिर्ययौ स्वराज्ये च तपसे कृतनिश्चयः ॥२३॥ तद्राज्यमकरोत सर्वं विश्वामित्रः प्रतापवान । एकदा मृगयार्थं वै वनेषु प्रजगाम ह ॥२४॥ मृगयित्वामृगान राजा क्षुधितस्तृषितोऽभवत् । भ्रमन् समाययौ सोऽपि वसिष्ठाश्रममुत्तमम् ॥२५॥ प्रविश्य तत्र तं राजा ननाम भक्तिसंयुतः ।

ससैन्यो भोजितस्तेन कामधेनुबलेन सः ॥२६॥ भुक्त्वा तं प्रार्थयामास नंदिनीं देहि मे मुने । विश्वामित्रस्ततस्तस्मै न ददौ तां महामुनिः ॥२७॥ ततो राजा बलान्नेतुं दूतानाज्ञापयत् खलः । धेन्वा ते नाशिताः सर्वे ततः स्वयमुपाययौ ॥२८॥ कशाघातैश्च तां धेनुं ताडयामासुराग्रहात् । केचित्ततो महत्सैन्यं निर्ममे तत्र धेनुका ॥२९॥ ततो युद्धमभूद्धोरं सैन्ययोरुभयोर्महत् । नष्टं सैन्यं च संपूर्णं विश्वामित्रस्य तत्क्षणात् ॥३०॥ सोऽपि भग्नो गृहं गत्वा राज्यं न्यस्य ययौ वनम् । प्रधानेषु तपस्तेपे शंकरस्य महात्मनः ॥३१॥ शतवर्षेषु पूर्णेषु प्रसन्नश्च ददौ शिवः । अस्त्रविद्यां सुसंपूर्णां तां प्राप्य स्वगृहं ययौ ॥३२॥ पुनर्वसिष्ठमागम्य शस्त्रास्त्रैर्बलसंयुतः । विश्वामित्रो ममार्दासावग्न्यस्त्रेण तदाश्रमम् ॥३३॥ वसिष्ठस्तं ततस्तत्र योधयामास शौनक । ब्रह्मदंडधरः श्रीमान् सर्वास्त्राणि व्यमर्दयत् ॥३४॥ ब्रह्मदंडेन तस्याऽपि कृतस्तेन पराजयः । विश्वामित्रः पलायिष्ट भयभीतः समंततः ॥३५॥ ततः सुसांत्वितो विप्रो वसिष्ठो ब्राह्मणैस्तदा । स्वाश्रमं प्रविवेशाथ विश्वामित्रो गृहं ययौ ॥३६॥ अहो ब्राह्मं बलं दीप्तं क्षात्रं तुच्छं विशेषतः । ब्रह्मदंडेन सर्वाणि ममास्त्राणि हतानि च ॥३७॥ एवं स निश्चयं कृत्वा राज्यं त्यक्त्वा ययौ वनम् । ब्राह्मणत्वप्रसिद्ध्यर्थं तताप परमं तपः ॥३८॥ गायत्रीमंत्रजाप्येन पुरश्चरणमार्गतः । निराहारेण राजर्षिस्तापयामास विष्टपम् ॥३९॥ एवं दशसहस्राणि वर्षाणि जपतो ययुः । ततो जगाद तं ब्रह्मा वरं ब्रूहि महामते ॥४०॥ स वव्रे ब्राह्मणत्वं मे देहि देव नमोऽस्तु ते । तदा ब्रह्मा पुनः प्राह तपस्वेति च गाधिजम् ॥४१॥ दशवारं विधौ तत्र समागत्य च तं मुनिम् । अन्यं वरं ददाने स न जग्राह स बुद्धिमान् ॥४२॥ तपःप्रभावतस्तस्य व्याप्तमासीद्दिगंतरम् । देवाद्या अभवन्सर्वे तदाज्ञावशवर्तिनः ॥४३॥ स्वप्रतापेन राजर्षिर्ब्राह्मणान् प्राह गाधिजः । अहं ब्रह्मर्षिमुख्यो वै जातस्तु तपसो बलात् ॥४४॥ भयभीताश्च ते सर्वे तथेत्यूचुः प्रणम्य तम् । वसिष्ठो मुनिवर्यः स तं राजर्षिं जगाद ह ॥४५॥ विश्वामित्रः संक्षुभितो वसिष्ठहननाय च । नानायत्नांश्चकारापि न ममार महामुनिः ॥४६॥ ततोऽतिदुःखितो भूत्वा संस्थितः स्वाश्रमे मुनिः । विश्वामित्रो महाभागस्तपस्तेजोविराजितः ॥४७॥ तमाययौ महातेजा याज्ञवल्क्यः प्रतापवान् । ब्रह्मणोंऽगसमुत्पन्नः साक्षाद्योगीश्वरो महान् ॥४८॥ तं ननाम यथान्यायं पूजयामास भक्तितः । विश्वामित्रो महातेजा उवाच प्रकृतांजलिः ॥४९॥ अद्य मे सफलं जन्म तपःस्वाध्याय एव च । येन ते दर्शनं

जातं ब्रह्मभूतस्य मानद ॥५०॥ किमर्थमागतो ब्रह्मंस्तद्वदस्व महामुने । तवाज्ञां कर्तुमिच्छामि दासोऽहं शाधि मां प्रभो ॥५१॥
॥ ओमिति श्रीमदान्त्ये पुराणोपनिषदि श्रीमन्मौद्गले महापुराणे प्रथमे खण्डे वक्रतुंडचरिते याज्ञवल्क्यविश्वामित्रसमागमोनामैकोनपंचाशत्तमोऽध्यायः ॥

॥ श्रीगणेशाय नमः ॥ मुद्गल उवाच । विश्वामित्रस्य भावेन संतुष्टो मुनिपुंगवः । तमुवाच महायोगी याज्ञवल्क्यो महामुनिः ॥१॥ याज्ञवल्क्य उवाच । दुःखितं त्वां विदित्वाहमागतो मुनिपुंगव । न कार्यमपरं किंचिज्जानीहि त्वं महामते ॥२॥ वद किं कारणं ब्रह्मन् दुःखस्य तव तापस । पश्चात्तन्नाशयिष्यामि युक्त्या ज्ञानोपदेशतः ॥३॥ विश्वामित्र उवाच । तपस्तप्तं मया घोरं ब्रह्मा मे न ददौ वरम् । वसिष्ठो मां च राजर्षिं जगाद जनसन्निधौ ॥४॥ केनोपायेन योगींद्र ब्राह्मणोऽहं भवामि च । सर्वमान्यो महाभागस्तं करिष्यामि यत्नतः ॥५॥ ततस्तं मुनिशार्दूलो याज्ञवल्क्य उवाच ह । न चिंतां कुरु राजर्षे ब्रह्मर्षिस्त्वं भविष्यसि ॥६॥ अभिमानं महाघोरं त्यज त्वं मे सुवाक्यतः । मत्सरं त्यज दुष्टं च ततः क्षेमं भविष्यति ॥७॥ कथां शृणु महारम्यां काशीविश्वेशसंश्रिताम् । येन त्वं निर्मलो भूत्वा ब्राह्मणोऽपि भविष्यसि ॥८॥ काशीविश्वेश्वरेणैव न त्यक्ता प्रलयेऽपि च । न वियोगः क्षणं तस्याः काश्याः शंभोः कदाचन ॥९॥ तेनाहंकारसंयुक्तौ जातौ काशीमहेश्वरौ । विघ्नः समभवत्तत्र दारुणः प्रवियोगकृत् ॥१०॥ मुद्गल उवाच । याज्ञवल्क्यवचः श्रुत्वा हर्षितः कौशिको मुनिः । उवाच तं महाभागं प्रेमयुक्तेन चेतसा ॥११॥ विश्वामित्र उवाच । कीदृशं विघ्नरूपं चाविमुक्तस्य शिवस्य यत् । समुत्पन्नं महाभाग तद्वद त्वं विशेषतः ॥१२॥ याज्ञवल्क्य उवाच । षष्टिवर्षाणि पर्जन्यो न ववर्ष महीतले । तेन नष्टं जगत्सर्वं भूमिस्थं सचराचरम् ॥१३॥ प्रजाक्षयं ततो दृष्ट्वा ब्रह्मा लोकपितामहः । आययौ राजशार्दूलं दिवोदासं तपःस्थितम् ॥१४॥ राज्यं त्यक्त्वा स राजर्षिस्तताप परमं तपः । मोक्षार्थं भक्तिभावेन सूर्यवंशसमुद्भवः ॥१५॥ तपसा योगभावेन बभौ सूर्य इवापरः । तं ब्रह्मा स्वयमेवेदं वचनं प्रजगाद ह ॥१६॥ ब्रह्मोवाच । दिवोदास महाभाग शृणु मे वचनं हितम् । काशीराज्यं गृहाण त्वं मया दत्तं महामते ॥१७॥ ब्रह्माणं स उवाचाथ न राज्यं परिपालये । मोक्षार्थी वासनाहीनो मोक्षं देहि प्रजापते ॥१८॥ तं पुनः प्रत्युवाचेदं ब्रह्मा लोकहिताय च । कुरु राज्यं महाभाग मया दत्तं महामते ॥१९॥ त्वयि राज्ये स्थिते वृष्टिर्भविष्यति

महाद्भुता । अन्यथा लोकनाशः स्यात्तस्मात् कुरु वचो महत् ॥२०॥ लोकसंरक्षणार्थाय दयायुक्तो महामतिः । राज्यं जग्राह काश्याश्च देववर्जितमुत्तमम् ॥२१॥ देवानामखिलं राज्यं सदा स्वर्गेषु वर्तते । मनुष्याणां पृथिव्यां वै पाताले नागरक्षसाम् ॥२२॥ अतो देवतया शंभुं पूजयिष्यामि मानद । सर्वैः स्वधर्मे स्थातव्यं मयि राज्यं प्रशासति ॥२३॥ तथेति तमुवाचाथ ब्रह्मा लोकपितामहः । काशीराज्यं ददौ तस्मै दिवोदासाय धीमते ॥२४॥ ततो ब्रह्मा ययौ काश्यां शंकरं प्रणिपत्य सः । उवाच तं विशेषज्ञो मंदरं गच्छ शंकर ॥२५॥ मरीचिना तपस्तेपे तस्मै देहि वरं शिव । नो चेन्मरिष्यति स वै तस्माद्गच्छ जगद्गुरो ॥२६॥ ब्रह्मणो गिरमाकर्ण्य तेन सार्धं ययौ शिवः । देवर्षिगणसंयुक्तो वरार्थं ब्राह्मणस्य च ॥२७॥ तं दृष्ट्वेति वरं ब्रूहि शिवो वचनमब्रवीत् । स उवाच शिवं तत्र मुक्तिं देहि सदाशिव ॥२८॥ इत्युक्त्वा तपसो दुःखाज्जहौ प्राणान् महामुनिः । प्राप्तः शिवस्य सारूप्यं कैलासं स गतो मुनिः ॥ २९ ॥ एतस्मिन्नंतरे शंभुं ब्रह्मोवाच कृतांजलिः । वस त्वं मंदरे शंभो त्यज काशीं महापुरीम् ॥ ३० ॥ अनावृष्टिभवं दुःखं तन्निवृत्यर्थमादरात् । राज्यं दत्तं मया देव दिवोदासाय शंकर ॥३१॥ तेनापि कथितं देवराज्यं पृथ्व्यां न चेद्भवेत् । तदा राज्यं करिष्यामि नान्यथाऽहं कदाचन ॥ ३२ ॥ मया लोकस्य रक्षार्थं दत्तं राज्यं च तस्य हि । क्षमस्व चापराधं मे महादेव नमोऽस्तु ते ॥३३॥ तथेति शिव ऊचे तं निःश्वस्य परमं प्रभुः । पार्वत्या गणसंयुक्त उवास स च मंदरे ॥३४॥ अविमुक्तं महाक्षेत्रं दैवेन त्याजितं मम । अधुना मुक्तता केन कर्मणा भविता मम ॥३५॥ न ब्रह्मणो वचो मिथ्या भविष्यति कदाचन । अधुना किं करिष्यामि काशीविरहदुःखितः ॥३६॥ अहं विश्वेश्वरश्चाऽस्मि मदधीनं न किंचन । विश्वनाथेति नामेदं व्यर्थरूपं न संशयः ॥३७॥ अखिलप्राणितुल्योऽहं कृतो येन महात्मना । शरणं विघ्नराजं तं गच्छामि न च संशयः ॥३८॥ ममापि विघ्नरूपं यत् समुत्पन्नं महाद्भुतम् । अहंकार-विहीनोऽहं कृतस्तेन महात्मना ॥३९॥ इत्येवं निश्चयं कृत्वा शिवस्तत्राचले तपः । तताप गणपं ध्यात्वा काशीप्राप्त्यर्थमादरात् ॥४०॥ काशी च दुःखसंयुक्ता श्रुत्वा शंभोर्विनिर्गतिम् । तपस्तताप विघ्नेशं ध्यात्वा निश्चलचेतसा ॥४१॥ अहंकारविनिर्मुक्ता काशी दुःखितमानसा । शिवप्राप्त्यर्थमतुलं तताप परमं तपः ॥४२॥ दिवोदासस्तु तद्राज्यमकरोद्धर्मतः स्वयम् । ततो वृष्टिः समुत्पन्ना सर्वेषां सुखदायिका ॥४३॥ सकलं वृष्टियोगेन जगत्स्थावरजंगमम् । मोदयुक्तं तदा जातं तस्मिन् राज्यं प्रशासति ॥४४॥ स्वस्वधर्मरताः सर्वे वर्णाश्रमविभागशः । पापलेशो न तत्रासीत्तस्मिन् राज्यं प्रशासति ॥४५॥

हृष्टपुष्टजनाः सर्वे वृक्षाः पुष्पफलान्विताः । घटदुग्धास्तदा गावस्तस्मिन् राज्यं प्रशासति ॥४६॥ स्वाहास्वधायुता देवाः पितरश्च मुदा युताः । यज्ञादयो बभूवुश्च तस्मिन् राज्यं प्रशासति ॥४७॥ एवं नानाविधैर्भोगैर्युताः सर्वे महामुने । दिवोदासः स्वयं राजा नित्ययात्रां चकार ह ॥४८॥ आदौ ढुंढिं पुपूजाऽसौ पश्चाद्विश्वेश्वरं मुने । जगदंबां च काशीं वै मणिकर्णीं ततः परम् ॥४९॥ भागीरथीं माधवं च जैगीषव्यगुहां ततः । कालभैरवमेवं च दंडपाणिं महाबलम् ॥५०॥ जनैः स मानिमान् राजा कारयामास सर्वदा । धर्महीनं जनं हंतुं दंडपाणिरिव स्थितः ॥५१॥ अशीतिवर्षसाहस्रं गतं तत्र महामुने । न किंचित्स्वल्पपापस्य प्रवेशोऽपि बभूव ह ॥५२॥ ततो देवा विचारं ते चक्रुः स्वर्गेषु विस्मिताः । पृथिव्यां देवराज्यं तु विनष्टं तेन कारितम् ॥५३॥ अतो वयं किमर्थं च स्थास्यामः पृथिवीतले । स्पर्धते नः स राजर्षिश्छलयामस्ततो वयम् ॥५४॥ तत इंद्रोऽग्निमाहूय जगाद क्रोधसंयुतः । दिवोदासस्य राज्ये ते स्थानं मास्तु बहिस्त्विति ॥५५॥ इंद्रस्य वचनं श्रुत्वा वह्निरंतर्दधे तदा । पृथिव्यां वह्निहीनास्ते जनाः सर्वे तमन्वयुः ॥५६॥ तान् दृष्ट्वा स दिवोदासो वह्निरूपेण संस्थितः । पृथिव्यां यत्र कुत्रापि तपोबलसमन्वितः ॥५७॥ एवं नानाविधैर्भावैर्देवाः सर्वे क्रमेण च । गतास्तत्र स्वयं राजा तेषां रूपधरो बभौ ॥५८॥ वाय्वादिरूपमास्थाय स राजा देवकृत्यवित् । पृथिव्यां ये जनाः सर्वे न तं जानंति कौशिक ॥५९॥ एवं बहौ गते काले देवाः सर्वे विसिस्मिरे । देवकृत्यं कृतं सर्वं राज्ञाप्याश्चर्यमुत्तमम् ॥६०॥ ततो देवगणाः सर्वे ब्रह्माणं शरणं ययुः । दिवोदासस्य मोहार्थं पृथ्वी त्यक्ता च निर्जरैः ॥६१॥ स तपोबलयुक्तस्तु देवानां कृत्यमादरात् । स्वयं देवस्वरूपैस्तैश्चकार परमाद्भुतम् ॥६२॥ वयं विहारहीनाश्च किं कुर्मो वद भो विभो । तेषां वचनमाकर्ण्य ब्रह्मा प्रोवाच तांस्तदा ॥६३॥ भवद्भिस्तत्र गंतव्यं प्रार्थनीयो नराधिपः । स दास्यति स्वकं स्थानं देवानां नात्र संशयः ॥६४॥ ततो देवा दिवोदासमाययुश्चेंद्रमुख्यकाः । तान् दृष्ट्वा सहसोत्थाय ननाम विनयान्वितः ॥६५॥ तमुत्थाप्य ततो देवास्तुष्टुवुस्तं नराधिपम् । सोऽपि देवान् प्रतुष्टाव स्वपदानि ददौ ततः ॥६६॥ स्वयं नरस्वरूपेण चैकदेहेन संस्थितः । अग्न्यादयो निजस्थाने देवाः सर्वे सुसंस्थिताः ॥६७॥

॥ इति श्रीमदांत्ये पुराणोपनिषदि श्रीमन्मुद्गले महापुराणे प्रथमे खंडे वक्रतुंडचरिते दिवोदासमहिमवर्णनं नाम पंचाशत्तमोऽध्यायः ॥



॥ श्रीगणेशाय नमः ॥ याज्ञवल्क्य उवाच । ततः शंभुः परां चिंतामापेदे मनसा मुने । देवा हतोद्यमा जातास्तपसा तस्य धीमतः ॥ १ ॥ स्वधर्मपर एवायं तपसा च समन्वितः । नोचालितुं भवेच्छक्यः किं भविष्यति वै ततः ॥ २ ॥ मया काशी कदा लभ्या दग्धोऽहं विरहाग्निना । मरिष्यामि न संदेहो विललाप महेश्वरः ॥ ३ ॥ अस्थिचर्मावशेषोऽपि शुशोच बहुधा शिवः । तं देवा मुनयः सर्वे सांत्वयामासुरादरात् ॥ ४ ॥ देवर्षय ऊचुः । मा कुरुष्व वृथा चिंतां त्वं समर्थो महेश्वर । तव प्रसादयोगेन गच्छामः काशिकां वयम् ॥ ५ ॥ नानासिद्धिभिरालोभ्य लोकांस्तत्र समंततः । तत्पापभागिनं भूपं दिवोदासं च कुर्महे ॥ ६ ॥ ततस्त्वया विशेषेण काशी ग्राह्या सदाशिव । एवमुक्त्वा ययुस्तत्र देवाः सर्वे प्रहर्षिताः ॥ ७ ॥ तत्राभवन् गताः काश्यां नानारूपधराः सुराः । जनान् संमोहयामासुः सिद्धिं कृत्वा विशेषतः ॥ ८ ॥ धर्मशीला जनाः सर्वे तेषां वाक्यं न चक्रिरे । एकवर्षं प्रयत्नं ते कृत्वा शांतिं प्रलेभिरे ॥ ९ ॥ ततः सदाशिवस्तत्र प्रेरयामास भैरवान् । तेपि यत्नैश्च विविधैर्न समर्था बभूविरे ॥ १० ॥ एवं क्रमेण आदित्या वसवश्चर्षयः पराः । योगिन्यश्च गणाः सर्वे हतोद्योगास्तथाऽभवन् ॥ ११ ॥ ततो ब्रह्माणमाबोध्य प्रेषयामास शंकरः । दशाश्वमेधाश्च कृतास्तेन शांतिं जगाम सः ॥ १२ ॥ ततस्तु शंकरस्तत्र ध्याननिष्ठो बभूव ह । चरणे विघ्नराजस्य सर्वाशापूरके परे ॥ १३ ॥ सविघ्नं मां गणाध्यक्ष निर्विघ्नं कुरु सर्वदा । दासोऽहं तेऽविमुक्तस्य संरक्ष विरहात्प्रभो ॥ १४ ॥ एवं निश्चितचित्तस्तु वर्षमेकं गजाननम् । ध्यानेन तोषयामास शंकरः कार्यसिद्धये ॥ १५ ॥ दृष्ट्वाऽहंकारनिर्मुक्तमत्यंतं शंकरं प्रभुः । दर्शयामास रूपं स्वं योगिध्येय-मनुत्तमम् ॥ १६ ॥ सिंहारूढं चतुर्बाहुं पाशांकुशधरं प्रभुम् । वरदाभयहस्तं च सिद्धिबुद्धिसमन्वितम् ॥ १७ ॥ रक्तवर्णं सुशोभाढ्यं गजवक्त्रं महोदरम् । विविधैः शेषनाभिं तं भूषणैः सुविराजितम् ॥ १८ ॥ चिंतामणिधरं पूर्णं तेजोराशिं महाप्रभम् । दृष्ट्वा देवं मुदा युक्तः शंकरः प्रणनाम ह ॥ १९ ॥ ततस्तं पूजयामास तुष्टाव स यथामति । देवदेवं गणाध्यक्षं वक्रतुंडं विधानतः ॥ २० ॥ शिव उवाच । नमस्ते वक्रतुंडाय सर्वसिद्धिप्रदाय च । निराकाराय देवाय साकाराय नमो नमः ॥ २१ ॥ नमः सर्वप्रबोधाय नमः सर्वप्रियंकर । गणानां पतये तुभ्यं गणेशाय नमो नमः ॥ २२ ॥ ब्रह्मणे सृष्टिकर्त्रे ते पालकाय च विष्णवे । संहर्त्रे ते हरायैव गुणेशाय नमो नमः ॥ २३ ॥ ब्रह्माकाराय वै तुभ्यं ब्रह्मभूताय ते नमः । नमः प्रपंचरूपाय प्रपंचानां प्रचालक ॥ २४ ॥ अनंतगुणधाराय ह्यनंतविभवाय ते । अनंतोदररूपाय हेरंबाय नमो

नमः ॥२५॥ कारणानां परायैव कारणाय नमो नमः । अकारणाय वै तुभ्यं सिंहवाहाय ते नमः ॥२६॥ अहं जीवसमानश्च संजातो नात्र संशयः । अविमुक्तं विमुक्तं मे जातं देव दयानिधे ॥२७॥ अतस्त्वां शरणं यातो निर्विघ्नं कुरु मां प्रभो । देहि काशीं गणाध्यक्ष अविमुक्ततया च मे ॥२८॥ त्वया पुरा वरो दत्तः स्मरणेन त्वदग्रतः । स्थास्यामि पुत्रभावेन तं पालय गजानन ॥२९॥ इत्युक्त्वा पादयोस्तस्य प्रणनाम महेश्वरः । तमुत्थाप्य गणाध्यक्ष उवाच प्रहसन्निव ॥३०॥ वक्रतुंड उवाच । त्वया कृतमिदं स्तोत्रं सर्वसिद्धिकरं भवेत् । पठते शृण्वते चैव भुक्तिमुक्तिप्रदं शिव ॥३१॥ अन्यद्यत्प्रार्थितं सर्वं करिष्यामि सदाशिव । अविमुक्तं प्रदास्यामि सार्थकं ते च सांप्रतम् ॥३२॥ इत्युक्त्वा निर्ममे देहाद्ब्राह्मणं सर्वसुंदरम् । सर्वज्ञं च गुणेशस्य तेजोयुक्तं प्रभाविणम् ॥३३॥ आज्ञापयच्च तं देवो गच्छ त्वं शिवसिद्धये । काश्यां तु बुद्धिसंमोहं जनानां कुरु सत्वरम् ॥३४॥ मोहयित्वा दिवोदासं काशीराज्यं शिवाय च । ममाज्ञया देहय त्वं सर्वपूज्यो भविष्यसि ॥३५॥ ढुंढिं ज्योतिर्विदं त्वां तु वदिष्यंति जना द्विजाः । त्वदीयवंशगाः सर्वे भविष्यंति न संशयः ॥३६॥ इति श्रुत्वा द्विजो ढुंढिं प्रणनाम मुदा युतः । ययौ प्रदक्षिणीकृत्य काशीं स गणपं स्मरन् ॥३७॥ ततो विष्णुं समाहूय तं जगाद गजाननः । बौद्धरूपेण विष्णो त्वं काशीं गच्छ मदाज्ञया ॥३८॥ द्विजेन ढुंढिना सर्वं मोहितं नगरं भवेत् । कुरु त्वमधुना भ्रष्टं मम वाक्याज्जनार्दन ॥३९॥ प्रणम्य तं तदा विष्णुर्गणेशं बौद्धरूपधृक् । ययौ काशीं महाभागो वक्रतुंडं हृदि स्मरन् ॥४०॥ तौ यथा गणराजेन कथितं चक्रतुस्तथा । मोहयुक्तं पुनर्भ्रष्टं नगरं सर्वमंजसा ॥४१॥ अन्यच्छृणु चरित्रं त्वं विश्वामित्र तपोधन । काशीध्यानयुता तत्र संस्थिता गणपस्य तु ॥४२॥ सहस्रं तत्र वर्षाणां गतमेकं महामुने । तस्यास्तपःप्रभावेण संतुष्टोऽभूद्गजाननः ॥४३॥ वरं दातुं समायातः काश्यै मुनिश्वरः प्रभुः । सिंहारूढः प्रसन्नात्मा नानाभूषणभूषितः ॥४४॥ तं दृष्ट्वा सहसोत्थाय काशी परमपावनी । पादयोः प्रणनामाथ कंपिता विह्वला भृशम् ॥४५॥ पुनरुत्थाय तं देवं पूजयामास भक्तितः । तुष्टाव सुस्थिरा भूत्वा निबद्धकरसंपुटा ॥४६॥ काश्युवाच । नमस्ते गणनाथाय नमस्तेऽनंतरूपिणे । नमस्ते सर्वदात्रे वै मायाधाराय ते नमः ॥४७॥ गजवक्त्रधरायैव शूर्पकर्णाय ते नमः । सर्वभूपाय वै तुभ्यं वक्रतुंड नमोऽस्तु ते ॥४८॥ निराकाराय नित्याय निर्गुणाय गुणात्मने । वेदवेद्याय सततं ब्रह्मणे ते नमो नमः ॥४९॥ ब्रह्मणां ब्रह्मदात्रे च सिंहारूढाय ते नमः । सिद्धिबुद्धिपते तुभ्यं नमः सर्वाभयंकर ॥५०॥ अनाथाय च नाथाय सर्वेषां पालकाय च । भक्तेभ्यः

सर्वदात्रे ते विघ्नहर्त्रे नमोऽस्तु ते ॥५१॥ विघ्नकर्त्रे ह्यभक्तानां भुक्तिमुक्तिप्रदाय च । योगिनां हृदि संस्थाय योगगम्याय ते नमः ॥५२॥ मनोवाणीविहीनाय शांतिरूपाय ते नमः । शांतिभ्यः शांतिदात्रे च गणेशाय नमो नमः ॥५३॥ किं स्तौमि त्वां गणाध्यक्ष यत्र वेदाः सशास्त्रकाः । शांतिं प्राप्ता महाभागा अतस्त्वां प्रणमामि वै ॥५४॥ रक्ष रक्ष च दासीं ते विरहेण प्रपीडिताम् । अविमुक्ता शिवेनैवं नाम व्यर्थं बभूव मे ॥५५॥ शिवहीना कृता देव दैवं तु परमाद्भुतम् । अतस्ते शरणं प्राप्ता शंकरं दर्शयस्व माम् ॥५६॥ इत्युक्त्वा पतिता तस्य पादयुग्मे महामुने । तामुत्थाप्य गणाधीशो जगौ मधुरया गिरा ॥५७॥ गणेश उवाच । मा शोकं कुरु कल्याणि शंकरं दर्शयामि ते । अविमुक्तमिदं नाम सार्थकं प्रभविष्यति ॥५८॥ त्वया कृतमिदं स्तोत्रं वियोगहरणं भवेत् । यः पठिष्यति भक्त्या च श्रोष्यते तस्य सुंदरि ॥५९॥ यं यमिच्छति भावेन तं तं दास्यामि सर्वगः । ब्रह्मभूयकरं स्तोत्रं भविष्यति न संशयः ॥६०॥ इत्युक्त्वा गणनाथश्च तत्रैवांतरधीयत । तमेव सापि ध्यायंती स्थिता कालप्रतीक्षिका ॥६१॥

॥ ओमिति श्रीमदान्त्ये पुराणोपनिषदि श्रीमन्मौद्गले महापुराणे प्रथमे खण्डे वक्रतुंडचरिते काशीशिववरप्रदानं नामैकपंचाशत्तमोऽध्यायः ॥

॥ श्रीगणेशाय नमः ॥ याज्ञवल्क्य उवाच । एतस्मिन्नंतरे तत्र ययौ ज्योतिर्विदुत्तमः । ढुंढिनामा द्विजो यस्तु पुरा प्रोक्तो मयाऽनघ ॥ १ ॥ सर्वं तन्नगरं तेन मोहितं तत्क्षणान् मुने । पश्चात्समागतो बुद्धो विष्णुर्भ्रष्टं तथाऽकरोत् ॥ २ ॥ ढुंढिना स दिवोदासो बोधितः स च त्यक्तवान् । राज्यं बौद्धेन संतस्थौ प्रतीक्षन् शिवदर्शनम् ॥ ३ ॥ ताभ्यामाकारितः शंभुः प्रययौ गणपं पुरः । कृत्वा संपूज्य तं काश्यामादौ चक्रे हि वासिनम् ॥ ४ ॥ स्वयं देवगणैः पश्चादृषिभिश्च विवेश ह । ननाम चरणे काशी विघ्नपस्य शिवस्य च ॥ ५ ॥ यथास्थानं स्थिताः सर्वे देवा ऋषिगणाः सुखम् । दिवोदासाय मोक्षं स शंकरः प्रददौ ततः ॥ ६ ॥ ततः कदाचिद्देवेशो जगाद गिरिशं वचः । तुभ्यं दत्ता मया काशी कृतं सर्वं यथायथम् ॥ ७ ॥ अधुनाऽहं महादेव यास्ये स्वं धाम शोभनम् । यदा मे स्मरणं कुर्यास्तदा द्रक्ष्यसि मां शिव ॥ ८ ॥ इत्युक्त्वा ढुंढिविप्रेण सहितोऽसौ गजाननः । अंतर्धानं ययौ तत्र देवानां पश्यतां मुने ॥ ९ ॥ ततः स्वयं विश्वनाथस्तस्य मूर्तिं विधाय सः ।

स्थापयामास यत्नेन देवैश्च ब्राह्मणैः सह ॥ १० ॥ विधिवत्पूजयामास चोपचारैर्मनोरमैः । सर्वैः कृत्वा नमस्कारं प्रादक्षिण्यं चकार सः ॥ ११ ॥ सर्वान् जगाद विश्वेशो हितं शृणुत मे वचः । आदौ ढुंढिं समभ्यर्च्य ये मां तोषयंति तत्त्वतः ॥ १२ ॥ तेभ्यो भुक्तिं तथा मुक्तिं दास्यामि त्वन्यथा न च । काशीवासफलस्यापि दाताऽयं वक्रतुंडकः ॥ १३ ॥ वेदादीनां रहस्यं यदन्विष्टं तु मया बहु । तन्मूलोऽयं हृदि प्राप्तः साक्षाद्ब्रह्मपतिः प्रभुः ॥ १४ ॥ अतोऽयं ढुंढिराजेति नाम्ना ख्यातो मया कृतः । धर्मार्थकाममोक्षाणां दाता क्षेत्रे न संशयः ॥ १५ ॥ एवमुक्त्वा महादेवो नित्यं पूजापरायणः । ढुंढिराजस्य सेवायां सावधानो बभूव ह ॥ १६ ॥ तथा त्वमपि देवेशं विघ्नराजं भज प्रभो । त्यक्त्वाहंकारभावं तु ब्राह्मणः प्रभविष्यसि ॥ १७ ॥ मुद्गल उवाच । याज्ञवल्क्यवचः श्रुत्वा विश्वामित्रो महातपाः । जगाद तं महाभागं विनयेन समन्वितः ॥ १८ ॥ विश्वामित्र उवाच । याज्ञवल्क्य महाभाग त्वयाऽहं बोधितः खलु । अधुना वद मे ज्ञानं सर्वज्ञोऽसि महामुने ॥ १९ ॥ अहंकारो मया त्याज्यः केन मार्गेण तद्वद । कीदृशो मे शरीरेऽसौ वद तिष्ठति सांप्रतम् ॥ २० ॥ गणेशानमहं केन भजेयं विधिना वद । स्वरूपं च कथं तस्य योगींद्रोऽसि यतः स्वयम् ॥ २१ ॥ याज्ञवल्क्य उवाच । शृणु त्वं कौशिक ब्रह्मन्नहंकारं वदामि ते । तपसा ब्राह्मणत्वं वै प्राप्स्यामि न हि संशयः ॥ २२ ॥ एतमेव विजानीह्यहंकारं तु महामते । तस्य त्यागे विधिं वक्ष्ये तं शृणुष्व यथायथम् ॥ २३ ॥ प्राप्तये ब्राह्मणत्वस्य तप्स्ये तप उत्तमम् । यदा दास्यति देवोऽसौ तदा ब्राह्मणता भवेत् ॥ २४ ॥ यदा न दत्ता देवेन राजर्षित्वं तदा खलु । अस्तु मे सततं तच्च कोऽहं मे कीदृशं तपः ॥ २५ ॥ अहं सदा पराधीनो देहधारी न संशयः । करोमि यत्नमत्यंतं दैवं चेत्प्रभविष्यति ॥ २६ ॥ अनेन विधिना विप्र तपस्व त्वं महामुने । तदा प्रभविता सर्व गताहंकारभावनः ॥ २७ ॥ अन्यत्त्वं शृणु मे वाक्यं मत्सरं त्यज कौशिक । शरणं गणराजं तं याहि तेन सुखं भवेत् ॥ २८ ॥ न मत्समं तपः कस्य स्पर्धसे तेन वै द्विजान् । मत्सरेण समाविष्टः कुतस्त्वं ब्राह्मणो भवः ॥ २९ ॥ त्वया मत्सरभावेन वसिष्ठस्य महात्मनः । पुत्राणां च शतं पूर्णं नाशितं रक्षसा यथा ॥ ३० ॥ अपरा सृष्टिरारब्धा त्रिशंकर्थे पुरा त्वया । वसिष्ठहनने यत्नं नानारूपं करोषि वै ॥ ३१ ॥ तं मत्सरं त्यज त्वं वै विधिं च शृणु तत्त्वतः । नीचोऽहं सर्वविप्रेभ्यस्तपस्विभ्यो न संशयः ॥ ३२ ॥ मया किंवा तपः कार्यमेभ्यश्चाधिकमादरात् । एषां तपःप्रभावोऽपि मनसा गम्यते न च ॥ ३३ ॥ एवं ज्ञात्वा तपस्व त्वं ब्राह्मणः प्रभविष्यसि । अन्यथा युगसाहस्रं तपस्तप्त्वा

मरिष्यासि ॥३४॥ सर्वेभ्यो नमनं विप्र हृदि भावसमन्वितम् । कर्तव्यं च त्वया नित्यं राजर्षिवन्महामते ॥३५॥ एवमुक्त्वा महायोगी वक्रतुंडप्रभावजाम् । कथां संश्रावयामास पूर्वजातां महायशाः ॥३६॥ कथां श्रुत्वा महाभागो विश्वामित्रः सुविस्मितः । उवाच तं नमस्कृत्य याज्ञवल्क्यं तपोधनम् ॥३७॥ विश्वामित्र उवाच । वक्रतुंडस्य योगींद्र चरित्रं संश्रुतं मया । अधुना वद मे ब्रह्मन् तस्यानुभवरूपकम् ॥३८॥ याज्ञवल्क्य उवाच । शृणु यत्नेन माहात्म्यं पुरावृत्तं कथानकम् । कथयामि च ते प्रीत्या मदीयं ज्ञानदायकम् ॥३९॥ एकदाऽहं गतो ब्रह्मन् वैकुंठं स्वर्गमुत्तमम् । तत्र नारायणं नत्वाऽपृच्छं तं जगदीश्वरम् ॥४०॥ किं सारं सर्वभूतेषु कस्याधारेण संस्थितम् । मह्यं वद महाभाग साक्षात्त्वं जगदीश्वरः ॥४१॥ इदं सर्वं त्वदाधारं भासते हृदि सर्वदा । तथापि प्रष्टुमिच्छामि श्रवणार्थं यथायथम् ॥४२॥

॥ ओमिति श्रीमदांत्ये पुराणोपनिषदि श्रीन्मौद्गले महापुराणे प्रथमे खंडे वक्रतुंडचरिते याज्ञवल्क्य - नारायणसंप्रश्नवर्णनं नाम द्विपंचाशत्तमोऽध्यायः ॥

॥ श्रीगणेशाय नमः ॥ नारायण उवाच । गणेशाधारमेतत्त्वं जानीहि ब्राह्मणोत्तम । हृदि बुद्धिप्रदातृत्वाद्बहिः सिद्धिप्रदानतः ॥१॥ अतोऽस्माभिः सदा देव आदौ पूज्यो महामुने । आदौ स एव मध्येऽपि तिष्ठत्यंते न संशयः ॥२॥ गुणरूपा वयं सर्वे ब्रह्माकारो गणेश्वरः । सिद्धिबुद्धिपतिः सो हि सर्वपूज्यश्च भो मुने ॥३॥ स्वानंदो यस्य लोकोभूद्भावाभावविवर्जितः । अगम्यो मुनिदेवानां द्वंद्वहीनः परात्परः ॥४॥ एवं गणपतिं ज्ञात्वा मुच्यते सर्वबंधनात् । तदाधारमिदं सर्वं जगद्ब्रह्म महामते ॥५॥ सर्वैरप्येकदा तत्त्वैर्मत्सरेण समन्वितैः । वादः कृतो महाभाग अहं श्रेष्ठ इति ध्रुवम् ॥६॥ मदाधारमिदं सर्वं पालयामि सृजाम्यहम् । हरामि मायया तस्मात् स्वेच्छारूपोऽहमेव च ॥७॥ एवं परस्परं सर्वे तत्त्वात्मानो महाबलाः । विवादं चक्रिरे तत्र सामर्थ्येन विमोहिताः ॥८॥ ततस्तत्र गुणाधीशो ब्राह्मणस्य च वेषभृत् । आययौ वादशांत्यर्थं ज्ञानदानार्थमादरात् ॥९॥ तं दृष्ट्वा विस्मिता देवाः कोऽयमत्र समागतः । आत्माकारा वयं सर्वे तत्रास्य च गतिः कथम् ॥१०॥ ततस्तं सर्वतत्त्वानि पप्रच्छुः को भवानिति । कथं मार्गस्त्वया प्राप्तो ब्रह्माकारेषु वर्त्मसु ॥११॥ ततस्तान् स द्विजो हृष्टो जगौ वै योगमायया । मया मार्गः कृतो ह्यत्र ब्राह्मणेन सुयोगिना ॥१२॥ किमर्थं वै यूयमपि विवादं कुरुथ स्वयम् । तन्मे वदत तत्त्वानि करिष्यामि


हितं महत् ॥१३॥ ततो हृष्टानि तत्त्वानि तमूचुः श्रेष्ठभावतः । कस्तिष्ठति वद प्राज्ञ तत्त्वेष्वस्मत्सु वै प्रभो ॥१४॥ तेषां वचनमाकर्ण्य तानुवाच द्विजोत्तमः । तत्त्वाधारमिदं सर्वं विद्यते नात्र संशयः ॥१५॥ विश्वं त्यक्त्वा यूयमपि पश्यतो मम तिष्ठत । विश्वं विदीर्यते सर्वं येन त्यक्तं स वै प्रभुः ॥१६॥ इति श्रुत्वा वचः सर्वैस्तथेति प्रतिपाद्य तम् । क्रमेण त्यक्तुमारेभे आत्माकारा महाबलाः ॥१७॥ ब्रह्माकारा च या पृथ्वी विश्वं त्यक्त्वा स्थिताऽभवत् तथेदमखिलं विश्वं न विनष्टं तु भावतः ॥१८॥ ततो जलेन तत्त्यक्तं तथा वै तादृशं स्थितम् । ततस्तु तेजसा त्यक्तं न विनष्टं तथापि च ॥१९॥ ततो वायुश्च तत्त्यक्त्वा स्थितो दूरं महामुने । तथापि सकलं विश्वं पूर्ववत् संस्थितं बभौ ॥२०॥ आकाशेन च संत्यक्तं तथा वै तादृशं बभौ । तन्मात्राभिस्ततस्त्यक्तं तथा वै पूर्ववद्बभौ ॥२१॥ तन्मात्राभिः सहैतानि भूतानि च महामुने । पंचापि दूरतः स्थित्वा शुशुचुर्विप्रमाणि च ॥२२॥ ततो ज्ञानेंद्रियैस्त्यक्तं पंचभिस्तत्तथा बभौ । ततः कर्ममयैस्त्यक्तं तथापि तादृशं बभौ ॥२३॥ तत इंद्रात्मकं ब्रह्म त्यक्त्वा दूरं स्थितं मुने । तथापि विश्वमेवेदं पूर्ववत्संस्थितं किल ॥२४॥ एवं देवगणाः सर्वे इंद्रियाणां प्रकाशकाः । आत्माकाराः स्थिताः दूरं त्यक्त्वा विश्वं महामुने ॥२५॥ तथापि सकलं विश्वं बभौ तेऽपि सुविह्वलाः । निस्तेजसोऽभवंस्तत्र स्थितास्तत्त्वसमन्विताः ॥२६॥ ततोऽन्नब्रह्मणा त्यक्तं विश्वं तदपि संबभौ । प्राणात्मकेन संत्यक्तं तथा वै तादृशं बभौ ॥२७॥ ततो मनोमयेनैव ब्रह्मणा त्यक्तमादरात् । तथापि संबभौ विश्वं धृतं केनचिन्मुने ॥२८॥ ततो विज्ञानरूपेण त्यक्तं तदपि तद्बभौ । तत आनंदरूपेण त्यक्तं विश्वं बभौ तदा ॥२९॥ ततो नादात्मकेनैव ब्रह्मणा त्यक्तमादरात् । ततो बिंदुमयेनैव त्यक्तं विश्वं बभौ मुने ॥३०॥ सोऽहंब्रह्मात्मकेनापि त्यक्तं विश्वं बभौ मुने । ततो बोधात्मना त्यक्तं तथा विश्वं च संबभौ ॥३१॥ ततो विदेहरूपेण त्यक्तं तदपि संबभौ । ततोऽप्यसत्स्वरूपेण त्यक्तं तदपि संबभौ ॥३२॥ ततोऽपि सत्स्वरूपेण त्यक्तं विश्वं बभौ मुने । ततः समस्ववेद्येन त्यक्तं विश्वं समाबभौ ॥३३॥ ततो नेतिस्ववेद्येन त्यक्तं वै विश्वमाबभौ । ततः स्वानंदरूपेण त्यक्तं विश्वं लयं ययौ ॥३४॥ ततस्ते विस्मिताः सर्वे स्वानंदं तुष्टुवुर्मुने । प्रहृष्टमनसो भूत्वा प्रार्थयामासुरादरात् ॥३५॥ सकलं यत्त्वदाधारमस्माकं त्वं विशेषतः । नायकः सर्वतत्त्वानामतो भव विनायकः ॥३६॥ विनायक नमस्तुभ्यं पुनर्विश्वं सृज प्रभो । यथा पूर्वं स्थितं स्वामिंस्तथा कुरु जगत्पते ॥३७॥ एवं तैः प्रार्थितो देवो विशेषेण विनायकः । निर्ममे सकलं विश्वं यथापूर्वं मुनीश्वर ॥३८॥ ततस्ते ब्रह्मरूपत्वात्तद्विश्वं विविशुः पुनः । यथा

स्वस्थानमात्मानमाश्रित्य मुमुदुस्ततः ॥३९॥ जगदीश्वरनामानः सर्वेशास्ते प्रकीर्तिताः । अनेन विधिना ब्रह्मन् ज्ञातव्यं तद्विशेषतः ॥४०॥ स विनायक इत्युक्तो द्विविधो याज्ञवल्क्यक । संयोगेन निजानंदो निरानंदो ह्ययोगतः ॥४१॥ द्विविधे नाशभूते च योगरूपोऽयमुच्यते । विनायको महातेजा ब्रह्मणां नायकः स्मृतः ॥४२॥ तं विदित्वा ततः शांतिं वयं प्राप्ता महामुने । अतः शांत्यर्थमत्यंतं तमाराधय भो द्विज ॥४३॥ माया भ्रांतिकरी जंतोर्वक्रा संकथिता मुने । तुंडेन हंति तां भक्त्या तेनाऽयं वक्रतुंडकः ॥४४॥ वक्रतुंडं च सर्वेशं शरणं याहि भो मुने । तदा योगींद्रसेव्यस्त्वं भविष्यसि न संशयः ॥४५॥ मनोवाणीमयं सर्वं गकाराक्षरमेव च । मनोवाणीविहीनं च णकारं विद्धि मानद ॥४६॥ तयोः स्वामी गणेशोऽयं योगरूपः प्रकीर्तितः । तं प्राप्य ब्रह्मभूताश्च भवंति खलु जंतवः ॥४७॥ इदं वेदांतसंभूतं रहस्यं कथितं मुने । गोपनीयं प्रयत्नेन तेन सिद्धिमवाप्स्यसि ॥४८॥ इत्युक्त्वा विररामाथ तदा नारायणः स्वयम् । गणेशाय नमस्तुभ्यमित्युवाच पुनः पुनः ॥४९॥

॥ ओमिति श्रीमदांत्ये पुराणोपनिषदि श्रीमन्मौद्गले महापुराणे प्रथमे खंडे वक्रतुंडचरिते नारायण - याज्ञयल्क्यसंवादो नाम त्रिपंचाशत्तमोऽध्यायः ॥

॥ श्रीगणेशाय नमः ॥ याज्ञवल्क्य उवाच । ततोऽहं परमप्रीतस्तं प्रणम्य जनार्दनम् । गतस्तपोवनं तात योगाभ्यासं समारभे ॥१॥ क्रमेण पंचधा वृत्तिं जित्वा चित्तस्य साधनैः । गणपं शांतियोगेन प्राप्तोऽहं तदनुग्रहात् ॥२॥ अतस्त्वं शरणं याहि वक्रतुंडं विशेषतः । तेन ब्राह्मणसंबद्धो भविष्यसि न संशयः ॥३॥ गायत्रीजपसंभूतं श्रेयो देहि महामुने । गजाननाय तेन त्वं विघ्नहीनो भविष्यसि ॥४॥ विश्वस्मिन् मित्रभावं त्वं प्रकुरुष्व सदातनम् । विश्वामित्रश्च ते नाम तदा सार्थत्वमेष्यति ॥५॥ मुद्गल उवाच । इत्युक्त्वा याज्ञवल्क्यः स ययौ तेन प्रपूजितः । गणेशाय नमश्चेति नाममंत्रं सदा जपन् ॥६॥ तदा प्रभृति गायत्रीं विश्वामित्रः स धर्मवित् । त्यक्त्वाऽहंकारमत्यंतं मत्सरं च तथाऽजपत् ॥७॥ गणेशार्पणभावेन गायत्रीं च जजाप ह । तपस्तताप विप्रोऽसौ ध्यात्वा हृदि गजाननम् ॥८॥ गायत्री वेदमातेयं पिता प्रणव उच्यते । स एव गणनाथोऽयमोंकाराकृतिमस्तकः ॥९॥ सगुणो गणराजोऽयमोंकार इति

कथ्यते । तस्मै समर्प्य योगी स गायत्रीं योगमाप्नुवान् ॥१०॥ ततः स्वल्पेन कालेन ब्रह्मा लोकपितामहः । विश्वामित्रं ययौ दक्ष ब्राह्मणत्वं ददौ परम् ॥११॥ वसिष्ठमुनिना तत्र ब्राह्मणैः सह पूजितः । विश्वामित्रो महातेजा ब्राह्मणोऽयं प्रकीर्तितः ॥१२॥ सप्तर्षीणां महातेजा मध्ये प्रोक्तो महर्षिभिः । तथा गणेशभक्तेषु मुख्योऽभूत्स प्रतापवान् ॥१३॥ नित्यं पूजाप्रकारेण पूजयामास तं मुनिः । तुष्टाव सुस्थिरो भूत्वा यथामति गजाननम् ॥१४॥ विश्वामित्र उवाच । नमस्ते गणनाथाय विघ्नेशाय नमो नमः । निर्गुणाय गुणानां च पते वै ते नमो नमः ॥१५॥ नमः सर्वविदां श्रेष्ठ नमः सर्वप्रियंकर । गजाकाराय देवाय गणेशाय नमो नमः ॥१६॥ गजवक्त्र नमस्तुभ्यं ब्रह्मणां च पते नमः । अनादये च सततमादिपूज्याय ते नमः ॥१७॥ सर्वसिद्धिप्रदात्रे ते नानामायाधराय च । मायिभ्यो मोहदात्रे वै तद्धीनाय नमो नमः ॥१८॥ बुद्धेः पते नमस्तुभ्यं बुद्धिपंचकधारिणे । मनोवाणीमयायैव तद्धीनाय नमो नमः ॥१९॥ सिंहारूढाय देवाय देवानां च पते नमः । देवदेवेशसेव्यायानादिसिद्धाय ते नमः ॥२०॥ नमश्चतुर्भुजायैव मूषकध्वजधारिणे । नमो मूषकवाहाय हेरंबाय नमो नमः ॥२१॥ लंबोदर नमस्तुभ्यं शूर्पकर्णाय ते नमः । योगिनां कुलदेवाय योगिनां च पते नमः ॥२२॥ एवं तस्मिन् संस्तुवति प्रादुर्भूतो गजाननः । अनंतादित्यसंकाशः सिंहारूढो महोदरः ॥२३॥ तं दृष्ट्वा निपपातोर्व्यां साश्रुनेत्रो महामुनिः । पुलकांकितसर्वांगो भक्तिभावेन संप्लुतः ॥२४॥ तं दृष्ट्वा गणराजस्तु जगाद मुनिसत्तमम् । त्वया कृतमिदं स्तोत्रं मम प्रीतिकरं भवेत् ॥२५॥ यः पठेच्छृणुयाद्योऽपि स मे मान्यो भविष्यति । भुक्तिं मुक्तिं च दास्यामीप्सितं तस्मै न संशयः ॥ २६ ॥ त्वं तु मत्तो वरान् ब्रूहि सर्वान् दास्यामि दुर्लभान् । भक्तिभावेन संतुष्टस्तव योगीश्वराधुना ॥ २७ ॥ मुद्गल उवाच । गणेशवचनं श्रुत्वा सावधानोऽभवन्मुनिः । तं प्रणम्य महाभक्त्या जगौ वै हर्षसंयुतः ॥ २८ ॥ विश्वामित्र उवाच । धन्यो वंशो मदीयोऽद्य धन्यं जन्म तपो यशः । धन्यौ मे जनकौ देव त्वदंघ्रियुगदर्शनात् ॥ २९ ॥ किं वाञ्छामि गणाधीश सर्वं मायात्मकं प्रभो । अतो भक्तिं त्वदीयां मे देहि नाथ नमोऽस्तु ते ॥ ३० ॥ गाणपत्येषु मे देहि संवासं च गजानन । अमुमेव वरं ब्रह्मन्मायामोहविनाशनम् ॥ ३१ ॥ एवमस्त्विति तं प्रोच्य सोऽन्तर्धानं ययौ प्रभुः । विश्वामित्रस्तदारभ्य गाणपत्यो बभूव ह ॥ ३२ ॥ एवं नानावताराश्च वक्रतुंडस्य धीमतः । भक्तानां सिद्धिदातारो दानवानां विनाशकाः ॥ ३३ ॥ चरित्रमखिलं तेषां वक्तुं नैव प्रशक्यते । अतः संक्षेपतो विद्धि कथितं सुकथानकम् ॥ ३४ ॥ एतद्वै वक्रतुंडस्य चरितं पापनाशनम् । भुक्तिमुक्तिप्रदं पूर्णं




खण्ड १ चित्र ३ — नववारं नव खण्डा ब्राह्मणरूपेण धुंडिना दत्ताः।

कथितं ते प्रजापते ॥ ३५ ॥ यः शृणोति नरो भक्त्या संश्रावयति यः पुमान् । पठेद्यः कृतकृत्यः स भविता नात्र संशयः ॥ ३६ ॥ पुत्रपौत्रप्रदं चैव धनधान्यकरं परम् । विद्यायुष्यप्रदं दक्ष चरितं कथितं परम् ॥ ३७ ॥ सहस्रमाघमासान् यः प्रयागे स्नाति मानवः । वक्रतुंडचरित्रस्य श्रवणेन च तत्फलम् ॥ ३८ ॥ आजन्ममरणांतं यः काशीवासं करोति च । यथाविधि यथाशास्त्रं श्रवणादस्य तत्फलम् ॥३९॥ इष्टापूर्तादिकं यस्तु लक्षवारं करोति च । संपूर्णभावयुक्ताच्च श्रवणादस्य तत्फलम् ॥ ४० ॥ यज्ञानां चैव सांगानां फलं प्राप्नोति मानवः । अस्य श्रवणमात्रेण संपूर्णं तत्प्रजापते ॥ ४१ ॥ बहुनाऽत्र किमुक्तेन ब्रह्मभूयपदप्रदम् । श्रवणेन न संदेहो जानीहि त्वं महामते ॥४२॥ सूत उवाच । एवमुक्त्वा महायोगी मुद्गलो विरराम ह । तदेतदखिलं तेऽद्य मयाऽपि कथितं मुने ॥४३॥ वक्रतुंडस्य माहात्म्यं संक्षेपेण च शौनक । कथितं ते मया विप्र भावं ज्ञात्वा विशेषतः ॥४४॥ श्रोतुमिच्छा पुनः किं ते वर्तते मुनिसत्तम । तवाऽहं सुप्रसादेन संतुष्टाऽस्मि न संशयः ॥ ४५ ॥ वक्रतुंडस्य माहात्म्यं गुह्यं वेदरहस्यकम् । गोपनीयं विशेषेण तेन सिद्धिं लभेन्नरः ॥४६॥ न श्रावयेत् दुर्जनेभ्यो गणेशद्विषते तथा । पापकर्मभ्य एवेदं विषयिभ्यः कदाचन ॥४७॥ यदि तेषां पुरश्चेदं श्रावितं च महामुने । तदा कोपः प्रभविता वक्रतुंडस्य निश्चितम् ॥४८॥ स चानादरमात्रेण दशपूर्वान् दशापरान् । नरकं च श्रावयतः प्रापयत्येष पूरुषान् ॥४९॥ अतः साधुजनेभ्यश्च गाणपत्येभ्य एव च । प्रयत्नेन श्रावयेद्यः स्वानां कोटिं समुद्धरेत् ॥५०॥ अतो यः पृच्छको वक्ता स्वस्वकोटिकुलोद्भवम् । पुरुषाणां समूहं स उद्धरेन्नात्र संशयः ॥५१॥ कलिकल्मषदाहघ्नं वक्रतुंडचरित्रकम् । कृतादिषु किमाश्चर्यं दहेत्पापगणानिति ॥५२॥ अहो कलौ विकुंठं च सर्वदेवचरित्रकम् । गाणपत्यं विशेषेण गतिदं च सदा भवेत् ॥५३॥ इदं मुने चरित्रं ते वक्रतुंडस्य भावतः । कथितं तेन विप्रर्षे कृतकृत्योऽस्मि सांप्रतम् ॥५४॥ धन्योऽहं भवतां संगात्येन संस्मरणं कृतम् । गणेशस्य परेशस्य सफलो मे भवोऽभवत् ॥५५॥

॥ ओमिति श्रीमदान्त्ये पुराणोपनिषदि श्रीमन्मौद्गले महापुराणे प्रथमे खण्डे वक्रतुंडचरिते वक्रतुंडचरित्रसमाप्तिर्नाम चतुःपंचाशत्तमोऽध्यायः ॥

॥ श्रीगजाननार्पणमस्तु ॥



॥ इति श्रीमुद्गलपुराणे प्रथमः खंडः समाप्तः ॥